स्मितरेखा

(कथासङ्ग्रहः)

रूपान्तरकारः

डॉ. राधावल्लभः त्रिपाठी

संस्कृतभारती

नवदेहली

स्मितरेखा

(कथासङ्ग्रहः)

रूपान्तरकारः

राधावल्लभः त्रिपाठी

Bharatiya Vidya Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya
489

संस्कृतभारती

नवदेहली

प्रकाशनम्
संस्कृतभारती
मातामन्दिरगली, झण्डेवालान
नवदेहली - ११० ०५५

© लेखकस्य एव।

प्रथममुद्रणम् २०११

मूल्यम् - रू ३५/-

प्रतिकृतयः १०००

मुद्रणम् -
नन्दी प्रोसेस्
त्यागराजनगरम्, बेङ्गलूरु - ५६० ०२८

ISBN - 976-81-87276-90-8

SMITAREKHA :

Fiction Collection of original short stories in Sanskrit by Prof. Radhavallabh Tripathi.

Publisher - Samskrita Bharati, Mata Mandir Gali, Jhandevalan, New Dlehi - 100005
Tel. & Fax - 011-23517689

Pages - VIII+ 98

Price - Rs. 35/-

First Print - January-2011

Printed at : **Nandi Process, Bangalore - 28 Ph : 26772292, 26766242**

Bhawan's Sri Sankaracharya Sa... Mahavidyalaya * Bharatiya Vidya
489
Bhawan's Sri Sankaracharya ... Mahavidyalaya

प्रायोजनम् -

रामकृष्णजयदयालडालमिया-श्रीवाणीन्यासः

४, सिन्धिया हौस्

नई दिल्ली - ११० ००१

प्रास्ताविकम्

आ शैशवात् कथाः मां कर्षन्ति स्म। मातुर्मुखाच्छ्रुताः कथाः, पितामहस्य मुखाद्वा श्रुताः कथाः, अनन्तरं प्रथमकक्षायां भाषाज्ञाने जाते पञ्चवर्षीयेण मया स्वयं पठ्यमानाः कथाः कथालोके चित्तं बम्भ्रमीति स्म। प्रथमकक्षायां द्वितीयकक्षायां वा अहमासम्, तदानीं विक्रमादित्यकथायाः पुस्तकमेकं प्राप्तं, पठितं च। प्रायः षड्वर्षीयस्तदा स्याम्। अत्यन्तं कौतुकाविष्टोऽपठम् इति स्मरामि। एतेन स्वयमपि कथाः लिखामीति क्वचित् प्रवृत्तिरभवत्। षष्ठकक्षायां यदा विद्यालये पठामि स्म, तदा कदाचिद् हिन्द्यां कदाचिच्च संस्कृते कथाकौतुककीलितो यद्वा तद्वा लिखामि स्म।

बी.ए-कक्षायामधीयानेन मया काश्चन कथाः संस्कृते प्रणीताः। तासु द्वे कथे - 'अविस्मरणीया स्मृतिः' 'कादम्बरी' च अमृतलतायां मासिक्यां प्रकाशिते। कथयोरनयोः प्रकाशनवर्षः अभितः १९६७ई.-वर्षः स्यात्। अमृतलताया विशेषः कथं वर्ण्येत? एतादृशी पत्रिका न तदानीमन्या अभवत् संस्कृते, न च ततः परमपि इदानीं यावत् तादृशी काऽपि पत्रिका संस्कृते विद्यते। श्रीपाददामोदरसातवलेकरमहोदया अस्याः संस्थापकाः सम्पादकाश्चासन्। शतवर्षीयास्ते तदानीमासन्।

तदानीं रवीन्द्रनाथ-शरच्चन्द्रादीनां बङ्गभाषासाहित्यकाराणां प्रेमचन्दादीनां च हिन्दीकथाकाराणां कृतयो मनसि मे भ्रमन्ति स्म। बी.ए. कक्षायां प्रवेशं प्राप्य आङ्ग्लसाहित्यमधीतम्, तदा आस्करवाइल्डस्य सुखी राजकुमारः इत्येतादृशीभिः कथाभिः, हेंस- क्रिश्चियनएण्डरसनस्य कथाभिर्वा चित्तमभिभूतम्। संस्कृतकथालेखने कदाचिन्मां बाणभट्टश्चकर्ष कदाचित् प्रेमचन्दः। संस्कृतकथायाः समग्रं परिदृश्यमेव परिवर्तयिष्यामीति सङ्कल्पेन संस्कृते लिखामि स्म।

शनैः शनैः स सङ्कल्पः क्षीणः। आधुनिकभावबोधसमन्वितानाम् उत्कृष्ट-संस्कृतकथानां क्व सन्ति पाठकाः? किमर्थं लिखेयं संस्कृते इति क्वचित् प्रश्नो मनसि आसीत्। संस्कृतपण्डिताः प्राध्यापकाश्च पुरातन-साहित्यपरिधौ सीमिताः, अपरिचिताश्च नवसाहित्यरीतिभिः। यत्किमपि लिखामि तद् एतेषां समाजे न श्लिष्येत्। एवमूहापोहेन हिन्दीभाषायां कथालेखनेऽहं प्रवृत्तः। छतरपुरस्थे महाविद्यालये स्नातककक्षायामध्ययनं कृतम्। एम.ए.-कक्षायां प्रवेशाय सागरमागतः। छतरपुरात् सागरं यावत् बसयानेन प्रायः चतुर्णां

पञ्चानां वा होराणां यात्रा भवति। एतादृश्या यात्राया स्मृतिमुपजीव्य हिन्द्यामेका कथा प्रायः १९७०-तमे वर्षे प्रणीता। 'एक रुपया' इति शीर्षकेणेयं 'नई कहानियाँ' इति पत्रिकायां १९७१तमे वर्षे मार्चमासाङ्के प्रकाशिता। इयं पत्रिका सुविदितैः साहित्यकारैः प्रेमचन्दस्य पुत्रैः अमृतरायैः सम्पाद्यते स्म। अथ सार्धैकवर्षमुदयपुरे सेवां कृत्वा अहं पुनः सागरविश्वविद्यालये प्राध्यापकत्वेन नियोजितः। १९७३ई. वर्षस्य जेनुअरीमासादद्यावधि तस्यैव विश्वविद्यालयस्य सेवायामस्मि। महान्तः पण्डिताः विविधशास्त्रपारङ्गताः बच्चूलालावस्थि-वर्यास्तदानीं सागरविश्वविद्यालयस्य हिन्दीविभागे प्राध्यापका आसन्। ते मम प्रतिवेशे न्यवसन्। आसीत् तेषां मां प्रति सहजः स्नेहः। यदा कदाचिच्च गृहमायान्ति स्म। एकदा ते मम गृहे समायाताः, बी.ए.कक्षाणां कृते एकं पाठ्यपुस्तकं सङ्कलनीयं मया, तत्र भवदीयां कथामेकां हिन्द्यां रचितां कामये -इति चोक्तवन्तः। मया 'एक रुपया' इति इयमेव कथा तेषां हस्ते अर्पिता। तदानीमेव प्रायः दशभिर्निमेषैः तैरियं कथा पठिता, पठित्वा च प्रशंसा विहिता, परस्ताच्च प्रायः १९७५तमे ई.वर्षे प्रकाशिते कथाकालिन्दीति पाठ्यपुस्तकेऽपि तैरियं कथा सङ्कलिता। अथ अस्याः संस्कृतं रूपम् अयोध्याप्रसादद्विवेदिवर्येण सम्पादिते १९८२तमे वर्षे प्रयागतः प्रकाशिते संस्कृतगद्यविहार इत्याख्ये पाठ्यपुस्तके सङ्कलितमभवत्। इयमस्मिन् प्रकृते सङ्कलनेऽपि प्रथमा कथा।

१९७०-९० इत्यस्मिन् वर्षाणां दशकद्वये मम प्रायः चत्वारिंशत्प्राया हिन्दीकथाः धर्मयुग-नवनीत-सारिका-प्रभृतिपत्रिकासु प्रकाशिताः। इमाः पत्रिकास्तदानीं साहित्याकाशे नक्षत्रायमाणा अभूवन्। स्वयं धर्मवीरभारतीवर्येण धर्मयुगसम्पादकेन स्वहस्ताक्षरैः पत्रं लिखित्वा ममैका कथा श्लाघिता। नवनीतसम्पादकैः नारायणदत्तवर्यैः सदाक्षिण्यमाशीर्वादा वितीर्णाः। हिन्दीकथानां मम सङ्कलनत्रयम् एक उपन्यासश्च अस्मिन्नवधौ पुस्तकाकारेण प्रकाशितानि।

परस्तात् कथालेखनादहं मनाग् विरक्तोऽभूवम्। धर्मयुग- नवनीत- सारिका-प्रभृति- पत्रिकाः अवसानं याताः। अतीतेषु विंशतिवर्षेषु पुनरपि संस्कृतकथालेखने मे प्रवृत्तिर्जागरिता। आख्यानशैलीं स्वीकृत्य उपाख्यानमालिका विक्रमचरितम् च इति द्वौ गद्यग्रन्थौ मया विरचितौ। अनन्तरं प्रणीताः काश्चन कथा अपि। अभिनन्दनम्, वायवाः इति कथाद्वयी दूर्वापत्रिकायां प्रकाशिता। वायवा इति कथाया मराठीभाषायां तेलगुभाषायामपि चानुवादः एतयोर्भाषयोः साहित्यिक-पत्रिकयोः प्रकाश्यतां गतः। २००२वर्षतः २००५वर्षं यावत् बैङ्काकनगरस्य

सिल्पाकान-(शिल्पाकर)-विश्वविद्यालये अतिथिप्राध्यापकत्वेन कार्यमकरवम्। तस्मिन् काले मया वनमालिविश्वालस्याग्रहेण करुणेति कथा प्रणीता। अस्यां कथायां बैङ्काकनगरस्य तेषां तेषाम् आपण-राजमार्गादीनां नामानि यथार्थं वर्णितानि कथावस्तु तु सर्वथा काल्पनिकम्। परावर्तनमिति कथा अतीतेषु पञ्चसु वर्षेषु विरचिता। अनन्तरमियं कालिदाससंस्कृताकादेम्या प्रकाश्यमानायां दूर्वापत्रिकायां प्रकाशिता। अत्र संस्थानस्य उल्लेख आयाति। वर्तमानकाले यस्मिन् संस्थाने अहं कार्यरतस्तेन अस्या सम्बन्धो नास्ति। इयं कथापरम्परायाः परिवर्तनशीलतां प्रकटीकरोति। वस्तुत उपाख्यानमालिकाया उपाख्यानेषु मदीयासु अन्यास्वपि कथासु इदं विषयवस्तु पुनः पुनरुन्मीलति।

'स्मितरेखा' गताब्दे (२००९-तमे वर्षे) विरचिता। इत्थम् अस्मिन् लघुसङ्कलने मम विगतचत्वारिंशद्वर्षेषु प्रणीतानां कथानां षट्कथाः सङ्कलिताः। क्वचिदियं स्मितरेखापि भगवत्याः सरस्वत्या अधरोष्ठयोः स्मितरेखां विरचयेत्, एतासामपि कथानां पाठकाः क्वचिद् भवेयुरिति भावयामि।

मान्यवर्यैः कविपण्डितैः श्रीमद्रामकरणशर्मभिः, विदुषीभिः दीक्षितपुष्पाभिः मम सुयोग्यशिष्येण नारायणदाशेन वनमालिबिश्वालवर्येण च अस्य सङ्कलनस्य मातृका विलोकिता संशोधनानि च यथोचितं तस्यां कारितानीति एतेभ्यः कृतवेदितां बिभर्मि। मान्यानां रामकरणशर्मणामाशीर्वचांसि अस्य सङ्कलनस्य कृते प्राप्तनीति धन्यतामनुभवामि।

– राधावल्लभः

आशीर्वचांसि

याथार्थ्यमस्य देशस्य श्यामस्यापि सुवर्णितम्।
त्वया सौन्दर्यसर्गेऽस्मिन्नादर्शो नाप्युपेक्षितः।।
धन्यस्त्वमसि संवेत्ता धन्याऽस्ति तव लेखनी।
धन्यः सौन्दर्यसर्गोऽयं धन्योऽहमपि पाठकः।।

- रामकरणशर्मणाम्, 29.10.2010

सकार्तज्ञं समर्पणम्
पाणिनेरवतारभूताभ्यः
दीक्षितोपाह्वपुष्पाभ्यः

अनुक्रमः

एकं रूप्यकम् १

अभिनन्दनम् ७

वायवाः २८

परावर्तनम् ४४

करुणा ७४

स्मितरेखा ९७

एकं रूप्यकम्

छतरपुरात् सागरं गन्तव्यमासीत्। यात्रापत्रं गृहीत्वा मध्यप्रदेश- राज्यपरिवहन-निगमस्य बसयाने अहमुपविष्टः। मईमास आसीत्। अहो सन्तापो निदाघकालस्य। हिमशीतलं पेयं पायं पायमपि घर्मपरि- क्लिष्टा नववारिसम्पातक्लिन्ना भूरिव मदीया तनुरन्तरन्तरदह्यत। स्वेदस्य धारा वदनात् च्योतन्ति स्म। अन्तरङ्गिका स्वेदेन क्लिन्ना पृष्ठेन वक्षसा च संसक्ता अभवत्। कञ्चुकोऽपि उभयोः पार्श्वयोः सुदूरं स्वेदाञ्चितः। मुहुर्मुहुः करकर्पटेन मुखं गलं च प्रोञ्छन् हस्ते धारितया पत्रिकया कयाचन व्यजनं चालयन्निव किञ्चिदुच्छ्वसितुमिच्छामि स्म। इतः प्रयाते मयि कोऽपि मम आसनम् अधिकुर्यादिति भिया यानादुत्तीर्य बहिर्गत्वा जनसम्मर्दात् तापाच्च मुक्तिमपि प्राप्तुमक्षमः। अतितरां काठिन्येन कथञ्चिद् यानस्य पृष्ठतमे भागे आसनमिदं मया आसादितम्। अग्रतो मे अधुनाऽपि चत्वारः पञ्चषा वा जना आसन-प्राप्तिकाम्यया स्थिताः। ते आसनस्थितान् जनान् - किञ्चित् किञ्चिदपसर्पन्तु भवन्तो येन अस्माकमपि उपवेशनं भवेदिति साग्रहमनुरुन्धन्ति स्म। अहं मणिबन्धघटिकायां समयं दर्शं दर्शं कदा नु खलु यानं प्रतिष्ठेत इति व्याकुलः प्रतीक्षे। मत्पार्श्व उपविष्टो महाभागस्तावता कालेन द्विस्त्रिर्मां किं वदति घटिकेति पृष्ट्वा अनन्तरं शासकीयबसयानानां गमने आगमने च अनियमिततामधिकृत्य प्रवचनं करोति स्म। अहं गवाक्षाद् वदनं निस्सार्य अद्राक्षम् - यानचालकः सम्मुखस्थे जलपानगृहे स्थितश्चायं पिबति स्म। पुनश्च मणिबन्धघटिकायाम- वालोकयम् - द्विवादनं जातमासीत्। अवस्थानके अधिभित्ति लिखितायां राज्यपरिवहनसमय सारण्यां छतरपुरनगरात् भोपालयायिनोऽस्य बसयानस्य गमनकाल उल्लिखित आसीत् सार्धैकवादनम्। घटिकायाः कण्टकं कष्टेनैव अग्रे सरति स्म। मम मनसि अमर्षः असूया च साटोपं वर्धेते स्म। आसीच्च मे मनसि - अहो अनयोः शाठ्यं वाहनचालक-

-परिचालकयोः! सर्वथा तापेन भर्जितेष्वस्मासु एतौ चालयिष्यतो यानम्।

अथैवं निदाघोष्मणा घूर्णमानमस्तकेषु यात्रिकेषु, हाहाकारं कुर्वाणासु महिलासु, वर्धमाने यानाभ्यन्तरम् असह्ये कोलाहले, क्वचित् साम्प्रतिकीं व्यवस्थां, क्वचित् सर्वकारं, क्वचित् नेतॄन् निन्दत्सु जनेषु चालकपरिचालकौ अन्ततः बसयानाभ्यन्तरं प्रविष्टौ। परिचालको याने वाहने यथा तथा स्थितेषु जनेषु कांश्चन विनयेन, कांश्चन कुत्सया कांश्चन उपालम्भैश्च आसनेषु उपावेशयत्। इदानीमपि बहवो जनाः उत्थिता आसन्, तेषु चासीदेको वृद्धः। स तूष्णीं स्थितः, स्वयम् आसनम् अधिगन्तुं न क्वचित् प्रायतत इति प्रतीयते। तस्य वार्धक्यं शीलयन् परिचालकस्तमाक्रोशत् - अयि वृद्ध, त्वमपि अस्य महाभागस्य पार्श्वे उपविश। मदीयमेवासनं लक्ष्यीकृत्य प्रावर्तत तदीयं वचनमिति मया बुद्धम्।

मत्पार्श्ववर्ती जनः परिचालकेन विवदितुमारभत - अयि भोः द्वयोः कृत आसनम् अत्र, कथं नाम त्रय उपविशेयुः?

परिचालकोऽपि आर्जवं तस्य वृद्धस्य वक्रां च भ्रुवं मत्पार्श्ववर्तिनो यात्रिकस्य प्रेक्ष्य प्राह - अस्तु अस्तु, तिष्ठतु अयं वृद्धस्तथैव।

वृद्धः कमपि प्रतिवादं नाकरोत्। तथैव तूष्णीमतिष्ठत्। अहं तं निरवर्णयम्। आगुल्फं प्रसृता शीर्णा शाटी, तदुपरि जीर्णः कञ्चुकः शिरसि च आकुलीकृतम् उष्णीषम्। प्रायश आसप्ताहात् क्षौरकर्म न सम्पादितं स्यात् तेन। प्ररूढेषु कूर्च-श्मश्रु-केशेषु सम्भ्रम- सारल्ययोः रेखाः गुम्फिताः। मौग्ध्यमुकुलिते चक्षुषी। वेषेण ग्रामीणोऽप्यग्राम्यः सभ्यश्च स प्रत्यभात्। मदीये चित्ते ईषत् करुणा जागरिता। अहं पार्श्वोपविष्टं भद्रपुरुषमवदम् - उपविशतु तपस्वी। कियच्चिरं स्थास्यत्येवम्। इत्युक्त्वा स्वकीयं शरीरं कथञ्चित् गवाक्षदिशि अपासारयम्। सोऽपि मत्पार्श्ववर्ती यात्रिको मदीयामुदारताम् असहमानः अनिच्छयैव किञ्चित् मद्दिशि अपसृत्य षडङ्गुलपरिमितमवकाशं तस्य वृद्धस्य कृते निर्माय उपेक्षया तमवदत् - 'उपविश रे उपविश।'

अनेनोपकारभारेणावनत इव सङ्कोचेन ग्लपित इवासनस्यैककोणे

उपाविशदसौ वृद्धः। नासीदियमपि स्थितिस्तस्य कृते स्वस्तिकरी। अहं चालकपरिचालकाभ्यां मनस्यद्रुह्यम् - अहो गृध्नुता यत् परस्परेण मन्त्रणया परिवहननिगमकर्मचारिभिः समम् अभिसन्धिना चैतादृशाः चालक-परिचालका निकटस्थग्रामान् प्रति जिगमिषून् बहून् जनान् यात्रापत्रं विना बसयाने प्रवेशयन्ति, तेभ्यश्च यात्रापत्रराशिमादाय स्वकुक्षौ तं निक्षिपन्ति।

बसयानं प्राचलत्। परिचालकश्च यात्रापत्रवितरणमारभत। भद्रे, क्व गन्तव्यं भवत्या, इयं गृह्णातु शाहगढस्य यात्रापत्रचिटिकाम्, इयं हीरापुरस्य...गढमलहराया यात्रापत्रं न दीयते – चत्वारि रूप्यकाण्येव च देयानि स्युः अन्यथा अवतर - अवतर बसयानात् - अयि भोः, किं ब्रवीषि पञ्चवर्षकल्पा बालिका सार्धद्विवर्षीया प्रतिपाद्यते, अयं चतुर्दशवर्षीयः स्याद् डिम्भः यदि विवाहः क्रियेतास्य इदानीमेव तर्हि नवमासाभ्यन्तरमेव सन्ततिमुत्पादयेदयम्, अर्धं यात्रापत्रं तु ग्राह्यमेवास्य कृते - इत्थं यातॄन् वचनाङ्कुशैः प्रहरन् क्रमेणासौ ममासनम् उपासर्पत्। मया सागरस्य कृते यात्रापत्रं पूर्वमेव कार्यालयगवाक्षात् क्रीतमसीत्। अहं परिचालकं तथा असूचयम्। यात्रापत्रं दर्शयन्तु तर्हीति तेनोक्तोऽहं तथा अकरवम्। एवं च क्रमेण स मत्पार्श्ववर्तिने जनाय शाहगढस्य यात्रापत्रं दत्त्वा तदनन्तरं तं वृद्धम् अनुदत् - रे वृद्ध क्व गन्तव्यम्?

'सागरं यावत्।' - स वृद्धोऽवदत्।

परिचालकस्तं विस्मयेनापश्यत्। समीपवर्तिनं ग्राममेवायं कञ्चित् जिगमिषुः स्यात्, अहं च यात्रापत्रमदत्त्वा एतस्मात् एकं वा द्वे वा रूप्यके लभेयमिति परिचालकेन चिन्तितं स्यात्। त्वरया यात्रापत्रचिटिकां वृद्धाय तस्मै ददानः असौ अवदत् - 'एकादशरूप्यकाणि चत्वारिंशच्च पणकान् देहि।'

श्रुत्वा तदीयं जल्पितं स वृद्धः स्वपरिधानप्रसेवके हस्तं चालयन् कार्पण्योपहत इवावदत् - कण्डक्टरमहोदयाः, सागरगमनस्य तु दशरूप्यकाणि चत्वारिंशत्पणका भवन्ति। एतावदेव मत्समीपे वर्तते।

– अरे अरे किमत्र शाको वा कन्दो वाविक्रीयते, यन्मूल्यस्य उच्चावचत्वं

भवेत्? देहि देहि यात्रापत्रस्य राशिम्। नास्ति समयः। इति साटोपमाक्रोशन् परिचालकोऽन्यं यातारम् अपृच्छत् - कुत्र गन्तव्यम्, यात्रापत्रं गृहीतम्?

इतश्चाहमपश्यम् - याच्ञादीनं विवर्णं च तस्य वृद्धस्य मुखमभवत्। प्रसेवकात् दशरूप्यकमुद्रा अष्टाणकं च निस्सार्यासौ भीत इव त्रुट्यदक्षरैरवदत् - परिचालकमहाभागाः, गृह्णन्त्वेतत्। इतोऽधिकं तु मत्सकाशे नास्तीति।

कोपाटोपसमन्वितः परिचालकोऽगर्जत् - 'अरे एकवारमुक्तं न शृणोषि?' अथ च अन्यान् बसयात्रिकान् श्रावयन् साधिक्षेपमब्रवीत् - कीदृशा ग्रामीणा जाङ्गलिका आयान्ति बसे...

मम मनसि निरीहस्य तस्य वृद्धस्य कृते कारुण्यमुदितम्। वराकोऽयं कदाचित् षण्मासेभ्यः प्राक् वर्षाद्वा प्राक् छतरपुरात् सागरं गतो भवेत्। तदानीन्तनं यात्रापत्रराशिं स्मरति, तावन्तमेव च राशिं धत्ते अपि। नासौ जानाति यत् प्रतिवित्तवर्षं वित्तमन्त्रिणः लेखन्याः स्पर्शमात्रेण यात्रापत्रराशिषु वृद्धिर्भवितुमर्हति। तस्य दशां दर्शं दर्शमहं स्वचेतस्यकरवम्- अपि नामाहम् एतस्मै रूप्यकमेकं ददानि? पुनश्चाचिन्तयम् - नैतदुचितं स्यात्। इमे सहयातारो मयि कौतूहलगर्भां व्यङ्ग्यदृष्टिं निक्षिपन्तः स्मितं विधास्यन्ति। अपरे उपांशुजापं परस्परेण जल्पिष्यन्ति - अहो अस्य मूर्खता. व्यर्थमेवैकं रूप्यकं तस्मा अददात्। कदाचित् पार्श्वोपविष्टो जनो मां प्रक्ष्यति - अपि नामायं कश्चन दूरगतो ज्ञातिजनः सम्बन्धी वा भवताम्?

द्विधा विभक्तं मदीयं मनः। अथ आत्मनैवात्मानमहं प्राबोधयम् - सन्ति कियन्तः देशेऽस्मिन् एवंविधा दुर्भाग्यवन्तो निर्धना जनाः। एकस्य कस्यचित् साहाय्यं कृत्वा किं भवेत्?

मत्पार्श्ववर्ती यात्रिकः तं वृद्धं प्रबोधयति स्म - अरे वृद्ध, निस्सारय एकम् अपरं रूप्यकम्। एवं याच्ञया परिचालको यात्राव्ययं न न्यूनीकुर्यात्। स तु यावान् यात्रापत्रराशिस्तावन्तमेव वाञ्छति। एकस्य रूप्यकस्य रक्षणेन धनाढ्यस्तु न भविष्यसि त्वम्!

तावता अवसितधैर्यः स परिचालकोऽपि तं वृद्धं तृणाय मन्यमानो निर्भर्त्सयन्

न्यगादीत् - 'यदि नास्ति मुद्रा, त्वरितमवतर इत एव। अन्ये सन्ति सागरं प्रति गन्तारो यातारः, तेष्वेकं कमपि त्वदीयं यात्रापत्रं दास्ये।'

नैराश्यमहागर्ते निपतितोऽपि स वृद्धो यत् किमप्याशातृणमवलम्ब्य आत्मानमुद्धर्तुकाम आसीत्, तदपि विच्छिन्नम्। अथ स अवसन्न इवोत्थाय परिचालकाय यात्रापत्रं समर्प्य द्वारं प्रति प्रचलितः। मम पार्श्ववर्ती अवदत् - 'दृष्टं भवद्भिः? एतादृशा भवन्ति मूर्खा इमे ग्रामजनाः। एकस्य रूप्यकस्य कृते स वाहनादवतरति। अभावस्तु नास्ति एतेषां पार्श्वे मुद्राणाम्। सहस्रं व्ययीकुर्युः धूमपाने मदिरासेवने वा। परन्तु अत्र सर्वकाराय यद् देयम्, तत्र कृपणता!'

अहं जोषमतिष्ठम्। परिचालकः शीत्कृतिं प्रदाय वाहनम् अरुणत्। वृद्धोऽवातरत्। अहं गवाक्षान्निस्सार्य स्ववदनमवालोकयम्- स याति स्म। अभीष्टे क्रीडनीयके हस्तादाच्छिद्य- माने यादृशो भावः कस्यापि शिशोरस्य आनने अवतरति, तादृश एव भावस्तस्य मुखोपरि आसीत्। ममान्तःकरणात् कोऽपि चीत्कृत्य अवादीत् - 'अधुनाऽपि समर्पय तस्मै तपस्विने रूप्यकमेकम्। अतथात्वे स वराको यात्रां विधातुं शक्नुयान्न वा .. सागरगमनं यथा तवेप्सितं तथैव तस्यापि।' अहं स्वासनात् अर्धमुत्थाय स्वप्रसेवकात् रूप्यकमेकं निस्सार्य तं च वृद्धमाकार्य तस्मै रूप्यकं दातुमैच्छम्। तदानीमेव सवेगमधडधडायत मे हृदयम्, मुखाच्च न निःसृतः कश्चन शब्दः। बसयानं पुनरपि प्राचलत्। स वृद्धो मया छतरपुरबसस्थेषणं प्रति सर्पन् दृष्टः। शनैः शनैः तनुतां यान्ती तदीया छाया विच्छिन्नाभ्रविलायं विलीना। मम हृदयगतिः पुनरपि सामान्याऽभवत्। अभवच्च चेतसि - दूरं गतोऽसौ, कस्तमाह्वयेदधुना? स्वासनमुपविशतो मम दृष्टिः मार्गपार्श्वे कपिशीर्षके न्यपतत्। छतरपुरस्थेषणमितः पञ्चमीलदूरमिति तत्र सूचितमासीत्। ज्येष्ठमासस्य ज्वालावलीढे राजमार्गे गच्छतो घर्मतप्तस्य तस्य वृद्धस्य चित्रं मच्चक्षुःसमक्षं स्फुरितम्। वेगं गृहीतवति बसयाने तच्चित्रं धूमिलं जातं कणशः पवने विकीर्णं च। अहं च स्वदेहस्यार्धभारं मम देहे निपात्य तन्द्रया घूर्णमानं पार्श्ववर्तिनं यातारम् अपसरणाय प्रार्थयम्, स्वैरमुपाविशं

च।

परन्तु धूमिलं विच्छिन्नं सदपि तस्य निराकृतस्य वृद्धस्य छविर्मम चित्तफलके प्रश्नमुट्टङ्कयति स्म।

(क्षेपकम्- अस्याः कथाया लेखनात् परम् अतीताः प्रायशः चत्वारिंशद्वर्षाः। वृद्धस्य तस्य चित्रं इदानीमपि चित्तफलके मे टङ्कितम्।)

—000—

अभिनन्दनम्

विभागात् प्रत्यागत्य रामदयालुः उत्पीठिकायाः (टेबुल् इत्यस्य) कोणे व्यवस्थापितं पत्रराशिमपश्यत्। पत्नी दुलारीदेवी यदा पत्रालयतः समागतं पत्रजातं गृह्णाति, तदा सा उत्पीठिकाया अस्मिन्नेव कोणे सर्वं तद् व्यवस्थापति। रामदयालुः शनैः पत्राणि सारयित्वा एकैकमपठत्।

कस्मिंश्चिदपि पत्रे किमप्यवधेयं नासीत्। पत्रेषु यदि परीक्षकत्वप्रस्तावः, यस्यां कस्यां समितौ नामाङ्कनस्य सूचना, पारिश्रमिकराशेश्चैकपत्रं कस्यचिदुपवेशनस्य आमन्त्रणं वा भवति, तदा रामदयालवे तद् रोचते। अन्यथा प्रतिदिनमेवंविधानि पत्राणि नैकश आयान्ति पत्रालयमाध्यमेन, कुत्रचिदायोजितस्य संस्कृतसम्मेलनस्य विवरणम्, पाठ्यक्रमविषये कस्यचित् स्वाध्यायिनश्छात्रस्य जिज्ञासा, कस्यचित् पण्डितस्याभिनन्दनग्रन्थाय लेखप्रेषणानुरोध इत्यादि वस्तु तेषु भवति। एतादृशाणि पत्राणि न पत्राणि, पत्राभासभूतानि तानि।

एतैर्वृथापत्रैश्चेखिद्यते चेतो रामदयालोः।

अद्य समागतेषु पत्रेष्वपि पत्रद्वयम् अभिनन्दनग्रन्थाय शोधलेख-विसर्जनानुरोधपरकमासीत्। तयोरुपरि डयमानामेव दृष्टिं निपात्य स ते खण्डशः कृत्वाऽवस्करिकायां समार्पयत्। अथ भूयः केनापि कामेन कर्तित, इव चुलुकित इव, चेतसि चकार रामदयालुः- सज्जनलाल स्याभिनन्दनग्रन्थः प्रकाशमायाति, तथैव कालूलालशास्त्रिणोऽप्यभिनन्दनग्रन्थः प्रस्तावितचरः। मत्कृते का स्याद् व्यवस्था? इति।

पुनरपि स्वाभिनन्दनग्रन्थाय मुमुद्रयिषा जजागार तदीये चेतसि, पुनरपि अभिनन्दन- ग्रन्थस्य दिदृक्षा चुलुकयति स्म तदीयं चेतः। कार्यं वा साधयेयम्, देहं वा पातयेयमिति निश्चयेन प्रफुल्लितोऽसौ 'अद्य स्वशिष्येभ्यो लिखामि पत्रं यत् ते समुद्यता भवन्तु ममाभिनन्दनग्रन्थप्रकाशनायेति विचार्य कमलाकरं

रविकुमारं केशवप्रसादं च एकस्यैव वस्तुनः प्रतित्रयं विधाय समं पत्राणि लिखित्वा विससर्ज। तद्यथा -

प्रियवर (डा. मिश्र/डा. रविकुमार/डा. केशवप्रसाद)

भवादृशैः सच्छिष्यैर्ममाभिनन्दनग्रन्थनिर्माणाय तन्मुद्रणाय तत्प्रकाशनाय च यः सङ्कल्पो विहितस्तेन नेदं ममाभिनन्दनमपितु सरस्वत्या इति विचार्य मोमुद्यते मे मनः। यद्यप्यहमुदासीनोऽस्मि विरक्तोऽस्मि एतादृशेभ्यः प्रपञ्चेभ्यः परन्तु गौरवास्पदमेतन्मे यत् भवादृशः सुधीः अस्य ग्रन्थस्य सम्पादक-मण्डलमलङ्करोति। अभिनन्दनसमितेः सदस्यानामप्याग्रहो वर्तते यद् भवान् ग्रन्थस्यास्य सम्पादकमण्डले तिष्ठतु। आशासे भवान् प्रस्तावमिमं स्वीकरिष्यतीति।

कुशलमन्यत् सर्वम्। सर्वथा स्वस्थः प्रसन्नो भवानिति मन्ये।

भावत्कः
रामदयालुः।

इत्थं च कपोलकल्पिताया अभिनन्दनसमितेरनुत्थानोपहतं तथाकथितनिर्णयं स्वशिष्यत्रये समारोप्य तथैव च दाण्डेकर-वेङ्कटाचलम्-सदृशान् मूर्धन्यान् कांश्चिद् विदुषः तत्परामर्शसमितौ व्यवस्थाप्य निरुपादानसम्भारमभित्ति महच्चित्रं कलाश्लाघ्यो रामदयालुः निरमात्।

वयसा षष्टिं स्पृशति रामदयालुरिदानीम्। प्राध्यापकत्वेन प्रायः त्रिंशद्वर्षाणि सेवा कृता, प्रथमं फैजाबादसमीपमेकस्मिन् महाविद्यालये, अनन्तरमस्मिन् विश्वविद्यालये। वर्षद्वयान न्तरमसौ सेवानिवृत्तः स्यात्। सर्वमुपपन्नम्, भार्या अलङ्कारशाटिकादिक्रयैः सन्तोषिता, त्रिष्वपत्येषु कनीयसी कन्या भारती अतीतेषु दशसु वर्षेषु विवाहिता, सा सुखं वसति श्वशुरालये। द्वौ पुत्रौ स्तः-ज्येष्ठः प्रभुदयालुः प्रथमं सेनायामधिकारी जातः, परन्तु दैवयोगात् प्रकृत्या चञ्चल एकदाऽसौ सैन्यचिकित्सालये चिकित्सार्थं प्रवेशितस्तत्र परिचारिकया कयाचित् अश्लीलं व्यवहरति स्म, अतो निष्कासितः सेनायाः। समागते तस्मिन् गृहे सर्वं वृत्तं विज्ञाय रोरुद्यमानायां तन्मातरि दुलारीदेव्यां रामदयालुना धनागारात् स्वीयं सर्वं सञ्चितं राशिं निष्कास्य विंशतिसहस्रं रूप्यकाणि तस्य

हस्ते संस्थाप्य उक्तम्- पुत्र, एतावान् मे विभवः। इममादाय यत्रेच्छसि तत्र गच्छ। यद्वा तद्वा कुरु। नेतः परमहं ते किमप्यन्यत् साहाय्यं करिष्यामि। प्रभुदयालुस्तं धनराशिमादाय देहलीं गतः। ततो दशसहस्रमुत्कोचत्वेन दत्वा एकस्यां विज्ञापनकम्पन्यां सेवां प्राप। इदानीं तत्र निदेशकः सन् प्रतिमासं लक्षमितमर्जयति, ततो यत्किञ्चित् पित्रोः सेवार्थमपि प्रेषयति। कनिष्ठस्तनयः कृष्णदयालुः सांसारिकप्रपञ्चे परं प्रतिभानवान्। अतः स्वप्रतिभयैव इदानीमसौ महाविद्यालय एकस्मिन् प्राध्यापकपदे प्रतिष्ठितः, न रामदयालुना मनागपि साहाय्यं यथा तथा तस्य विहितम्। असौ कृष्णदयालुः अध्ययनं प्रति सर्वथा मन्दादरो यथा कथञ्चित् स्नातककक्षां तूदतरत्। अनन्तरं स्नातकोत्तरकक्षायां रामदयालोरेव विभागे प्रवेशं गृहीत्वा परीक्षायाः सद्योऽनन्तरं स कथञ्चित् परीक्षकाणां नामानि विज्ञाय तेषु तेषु नगरेषु तत्तत्परीक्षकं प्राप्तवानाह च प्रत्येकम् - अहं प्रोपेश्वराणां रामदयालूनां तनयोऽस्मि। देवयोगान्मम इदं प्रश्नपत्रं न अच्छं जातं यत् श्रीमतां सकाशमागतम्- अतः कृपा विधेया मदुपरीति। प्रायः सर्वे परीक्षकाः रामदयालुना उपकृताः अतः ते प्रत्युपकाराय निकृष्टास्वपि कृष्णदयालोरुत्तरपुस्तिकासु उत्कृष्टानङ्कान् ददुः। इत्थं स्नातकोत्तरपरीक्षां प्रथमश्रेण्यां सर्वप्रथमत्वेनोत्तीर्णः कृष्णदयालुः पश्चाच्च रामदयालोरेव शिष्येण रविकुमारेण स्वीयं शोधप्रबन्धं लेखयित्वा शोधोपाधिं प्राप्य स्वप्रतिभायाः नौकया अतरद् दुस्तरमपि भवसागरम्।

सम्प्रति सर्वथा सुखमयं जीवनं रामदयालोः। एकमेव कष्टं दुनोति मानसम् तदीयोऽभिनन्दनग्रन्थो न प्रकाशितः, न वा सार्वजनिकमभिनन्दनं तस्य जातम्। अत्रत्यास्तस्य सहयोगिनस्तु तस्य षष्टिपूर्तिमपि नायोजयिष्यन्ति का कथाऽभिनन्दनग्रन्थस्य? अत एव 'उद्धरेदात्मनाऽऽत्मानं नात्मानमवसादये'दिति गीतोक्तवचः स्मरन् रामदयालुः स्वयमेव स्वाभिनन्दनं कारयितुं कृतसङ्कल्पोऽभवत्।

अथ प्रापुस्तस्य शिष्या यथाक्रममेतदर्थं लिखितानि पत्राणि। पत्रसम्बोध्याः विश्वविद्यालये महाविद्यालये वा प्राध्यापकपदमलङ्कुर्वाणास्ते शिष्याः न

नासन् गुरोः ऋणस्य निर्यातनं प्रति पराङ्मुखाः असमर्था वा। तथापि तेषु गुवाहाटीनगरे नियुक्तिभाक् कमलाकरमिश्रः मद्गृहनगरे गोरखपुरे सम्भाव्यमाना मन्नियुक्तिः प्रियतरस्य शिष्यस्य रविकुमारस्य कृते गुरुवर्येण रामदयालुनान्तर्घातं विधाय मद्धस्तादाच्छिन्नेति गोपनीयमपि सर्वत्र प्रकाश्यमानं वृत्तान्तं विदित्वा प्रागेव गुरुसेवापराङ्मुख आसीत्। तथापि गुरुचरणास्तथापि गुरुचरणा एवेति सन्धार्य सम्प्राप्तं रामदयालोः पत्रमसावित्थमुदतरत्–

'सम्मान्याः डाक्टरसाहिबवर्याः,

'सादरं नमः। श्रीमताम् अभिनन्दनग्रन्थस्य सम्पादकमण्डले मन्नामनिवेशनस्य प्रस्तावं विज्ञायातितरां प्रसन्नोऽस्मि। परन्त्वतितरां विप्रकृष्टे आतङ्कवाद्यान्दोलनसङ्कुले विषमेऽसमप्रान्ते गोष्पदे इव मग्नः सीदामि। सुदूरस्थः सन्नैतादृशकार्येषु साहाय्यायालं नास्मि। अत एव मत्स्थाने अन्यः रविकुमारादिसदृशः सुयोग्यशिष्यो यदि नियोज्येत तर्हि शोभनं स्यादिति।

'धृष्टतायाः कृते क्षमां याचमानः –

भवतां शिष्यः- कमलाकरमिश्रः।'

गोरक्षपुरं निकषा एकस्मिन् महाविद्यालये प्राध्यापकोऽपरः शिष्यो रविकुमारो रामदयालोः पत्रं प्राप्य अस्य उत्तरं प्रेषयामि वा न वेति ऊह-प्रत्यूह-निर्यूह-कुहर-संविष्टो मासमेकं क्षपयामास। गुरोरेव रामदयालोर्दयालुतया तदीय-वरदहस्तक्षेपेण स्वनियुक्तिं तदानीं सञ्जातामसावजानात्। महाविद्यालय-प्राचार्यस्यानिच्छायां सत्यामपि तां नियुक्तिमसौ प्राप्तवान्। सम्प्रति रामदयालुं प्रति वर्तते तस्य प्राचार्यस्याहिनकुलम्। स रविकुमारमपि न स्निग्धदृशा पश्यति। रविकुमारस्तु तथापि प्रवाचकपदे स्वनियुक्तिमीहमानस्तदीयकृपाकटाक्षं कामयते, प्रयतते च तमनुकूलयितुम्। रामदयालुगुरोरभिनन्दनग्रन्थ-सम्पादकमण्डले मम नाम्नः समावेशेन प्राचार्यस्य कालकरालः क्रोधो मयि समिद्धतरः स्यादिति धिया रामदयालुं प्रति स्वकृतवेदितामधमर्णतामात्मनो विदन्नपि स तस्याभिनन्दनग्रन्थं प्रत्यन्यमनस्क एवाभवत्। अन्यच्च रामदयालुगुरोर्निर्देशने शोधकार्यं कुर्वता तेन तेषु दिवसेषु गुरुपत्न्या स्वैरं

समादिष्टस्य शाककन्दादिवस्तुजातस्यापणादानयनेन गुरोः कनिष्ठतनयस्य कृष्णदयालोः शोधप्रबन्धलेखनेन अन्यैश्चोपचारैरन्तेवासिदशायां सेवित एव गुरुरिति नेदानीन्तनी गुरुविमुखता गुर्वी भूत्वा तदीयां चेतनामतुदत्।

तृतीयस्तु शिष्यः केशवप्रसादश्रीवास्तवः प्रियंवदः प्रसन्नवदनो वाक्पटुरतीवचतुरः संस्कृतविद्याध्ययनं विहायेतरेषु सर्वविधकार्येष्वबाह्यो गुरुमुखलग्नस्तद्भालदर्शी दूरदर्शी पिशुनश्चासीत्। प्राप्तमात्र एव गुरोः रामदयालोः पत्रेऽसौ व्यचिन्तयत्- केयं योजना श्रीरामदयालोः, कीदृशी तत्र राजनीतिः, को नाम लाभोऽस्माकम् अनेन अभिनन्दनग्रन्थसम्पादन-दुर्व्यवसायेनेति। अनन्तरमसौ चिरं विचार्य रामदयालुं प्रति पत्रोत्तरमिमं व्यसृजत्-

'श्रद्धेया गुरुचरणाः,

'तत्र भवतां गुरुपादानामभिनन्दनग्रन्थः सङ्कल्पित इति विज्ञाय परमं प्रमोदमञ्चति चेतः। किन्तु कथमयं जनः प्राङ् नैव सूचितोऽस्मिन् विषये? अभिनन्दनसमितिर्निर्मिता। तत्र के के सन्ति? ग्रन्थस्य प्रकाशकः कः स्यात्? लोकार्पणं कस्य करकमलाभ्यां कारणीयम्? इति सर्वं विचार्यैवाभिनन्दनग्रन्थप्रकाशनोलूखले शिरो देयमस्माभिः।

'मम तावदयं प्रस्तावः। अभिनन्दनग्रन्थलोकार्पणाय राष्ट्रपतयो वा प्रधानमन्त्रिणो वा प्रार्थनीयाः। प्रकाशकस्तु मोतीलालबनारसीदासो वा अन्यो वा कश्चन प्रथितो भवेत्। यदि अभिनन्दनग्रन्थसमितिरेव प्रकाशयति ग्रन्थं तर्हि कति प्रतयः केन्द्रशासनेन कति प्रतयो राज्यशासनेन क्रेष्यन्त इति व्यवस्था करणीया। प्रारम्भिकव्ययार्थं काचन व्यवस्था करणीया। सर्वं व्यवस्थाप्योपक्रमः कार्यः। मत्कृते यः सहयोगोऽपेक्ष्येत स निर्देष्टव्यो निःसङ्कोचमित्यलं पल्लवितेन।

सादरं भवतां शिष्यः - केशवः।'

कमलाकरमिश्रस्य ननुनचपरायणं पत्रं प्राप्य विषण्णो, रविकुमारस्यानुत्तरेण खिन्नो रामदयालुरेतत् पत्रमधिगम्य स्वजीवनस्य शुष्कमरुस्थले स्रोतःसञ्चारमनुभवंस्तत्क्षणमुत्तरमित्थं प्रेषयामास केशवप्रसादाय- प्रियशिष्य,

सर्वं त्वयैव करणीम्, त्वमेवास्य ग्रन्थस्य सम्पादकः। तत्र यानि यानि मम चित्राणि तैस्तैः नेतृभिः सार्धं वर्तन्ते तानि प्रकाश्यानि। तानि चित्राणि सत्वरं प्रेषयिष्यामि। अभिनन्दनग्रन्थसमितेः परामर्शदातृमण्डलस्य संरक्षकमण्डलस्य च सदस्यानां सूच्यौ संलग्ने। तत्र संयोजकस्तु त्वमेव। नायं मम सम्मानोऽपितु सरस्वत्याः सम्मान इति मत्वा प्रवर्तनीयम्। परन्तु मम परिचयः प्रशस्तयश्च सम्यक् तत्र संयोज्याः। प्रशस्तिचतुष्टयं तु तेषां तेषां स्वशिष्याणां नाम्ना स्वयमेव लिखित्वा अहं प्रेषयिष्यामि। अपरे केचन स्वयमपि मम व्यक्तित्वं कृतित्वं चाधिकृत्य लेखान् लिखित्वा इतो दद्युः। यदि न प्रकाशयति कश्चन प्रकाशकस्तर्हि समित्या प्रकाशिते ग्रन्थे केन्द्रशासनेन राज्यशासनेन चास्य अधिकाधिकं प्रतयः क्रीयन्तामिति व्यवस्थापयिष्यामि। समग्रे भारते मम या शिष्यमण्डली वर्तते, सा सहयोगं दास्यत्येव, अतो अर्थव्यवस्था भविष्यति, का तत्र चिन्ता? अन्यच्चायमभिनन्दनग्रन्थ आवयोर्गुरुशिष्ययोः सम्पर्काय निःश्रेणी भविष्यति। भवांस्तु विज्ञः शिष्टं सर्वं स्वयमवगन्तव्यम्। इति।

पत्रमिदं विसृज्य अभिनन्दनाय स्वीयाय बद्धपरिकरोऽभवद् रामदयालुः। अभिनन्दनग्रन्थसमितेः संयोजकस्य केशवप्रसादस्य नाम्ना अभिनन्दनग्रन्थाय शोधलेखान् श्रीमद्रामदयालुगुरोर्व्यक्तित्वकृतित्व- समीक्षणपरान् वा निबन्धान् प्रेषयन्तु विद्वांस इत्यनुरोधपरं पत्रमेकं मुद्राप्य आसेतु हिमाचलं तेभ्यस्तेभ्यो विद्वद्भ्यो विसृष्टवान्। स्वपत्न्याः दुलारीदेव्या नाम अभिनन्दनग्रन्थसमितौ कोशाध्यक्षत्वेन स्थापयित्वा सर्वं दानादिकं तन्नाम्ना प्रेषणीयमित्यपि तत्र आह्वानमकरोत् पत्रे।

अथ स्वस्यैव विभागस्य प्राध्यापकेभ्योऽन्तर्घातसम्भावनया बिभ्यदभिनन्दनग्रन्थ- वृत्तान्तं तेभ्यः प्रच्छादयन्, केवलं केषुचित् प्रियशिष्येषु साकूतं नववधूरिव लज्जमानः स्वस्य अभिनन्दनग्रन्थस्य प्रकाशनवार्ताया रहस्यभाण्डमसावुद्बिभेद, आदिदेश च तान् धनसङ्ग्रहं विधातुं स्वव्यक्तित्वकृतित्वादिविषये लेखांश्च निबद्धुम्। सर्वेषां परिचितमित्राणां शत्रूणां चेङ्गिताकारं विभावयन्, अपि नामैते मम मित्राणि, उदासीनाः शत्रवो वा मम

अभिनन्दनग्रन्थस्य वार्तां जानन्ति वा न वेति शङ्काकुलः, अपि नामायं वा स वा सा वा मदीयस्य अभिनन्दनग्रन्थस्य प्रकाशने विघ्नमुत्पादयेत् इति तृणेऽपि चलति अनन्दनग्रन्थ- प्रकाशनावरोधायैव तृणमिदं कम्पत इति शङ्कितः बारं बारं क़ेशवप्रसादं दूरभाष्येण परामृशन् कथञ्चित् कृच्छ्रेण कालं निनाय रामदयालुः।

केशवप्रसादस्तु वयसः षष्टिं प्राप्नुवन् अपि बुद्ध्या शीर्णतां गतो गुरुरिति सन्दिहानः न तथा तत्वरे। रामदयालुस्तु केशवप्रसादादनवाप्य कामपि वार्तामभिनन्दनग्रन्थस्य प्रगतिविषये मुहुरुत्सुको व्यथितः प्रतिसप्ताहं तस्मै पत्रं प्रेषयामास। केषाञ्चन शिष्याणां नाम्ना स्वस्य कृते प्रशस्तिपरान् लेखान् स्वयमेव लिखित्वा कैश्चित् पृष्ठतो लग्नः साग्रहं लेखयित्वा काव्यानि लेखांश्च केशवप्रसादाय प्रेषयामास।

मध्याह्नप्रखरः कालः। सूर्यस्य प्रखराः किरणा रामदयालोर्गृहोद्यानस्य लिलीपुष्पाणि दहन्ति। तपति स्म धरणी। विभागीयकार्यं सत्वरं सम्पाद्य गृहं प्रत्यागतो रामदयालुर्भोजनं कृत्वा घूत्कारघोरनासारवपूरितभुवनाभोगो स्वपिति स्म। सहसा द्वारि पत्रवाहको घण्टिकामवादयत्। प्रतिक्षणं पत्रमेव प्रतीक्षमाणस्य रामदयालोर्गहनामपि निद्रामाच्छिनत् स घण्टिकाध्वनिः। - 'अये कदाचित् पत्रवाहकः स्यादि'ति निद्राकषायितस्वरेण निगदन्नसौ गृहद्वारमधावत्।

समागतानि पत्राणि पत्रवाहकहस्तादादाय तेषु शूर्पतुषन्यायेन निरर्थकानि पत्राणि अपाकृत्य केशवप्रसादस्य पत्रमसौ गवेषयामास। अवाप्य च तत् हरिचन्दनेन्दुसंस्पर्शशिशिरमिव सञ्जातं हृदयं तदीयम्। एकान्ते प्रकम्पमाणेन करेण लघु लघुभिरुच्छ्वसितैः समुद्घाट्य पपाठ पत्रम्। लिखितमासीत् तत्र-

'श्रद्धेया गुरुवर्याः,

'अभिनन्दनग्रन्थप्रकाशनाय केचन शोधलेखाः भवतां जीवनं कृतित्वं चाधिकृत्य लेखापिताः। लेखाः कविताश्च सम्प्रति प्रचुरं सङ्कलिताः सन्ति। इदानीं मुद्रणं कारणीयम्। मुद्रणाय धनमपेक्ष्यते। कोऽपि प्रकाशकस्तु न तत्परः प्रकाशनाय, समयोऽपि नास्ति, यतो हि भवतां षष्टिपूर्त्यवसरे ग्रन्थोऽयं

समर्पणीयो भवते। षष्टिपूर्तौ च दिनान्येव कियन्ति? स्वल्पः कालः कार्यं च महत् करणीयम्। अभिनन्दनग्रन्थस्य लोकार्पणाय केन नेत्रा सम्पर्को विधेयः? षष्टिपूर्त्यवसरे समारोहः करणीयः। भवांस्तत एव अर्थराशिं प्रबध्नातु। अन्यच्च यत्किमपि करणीयं तदाज्ञापययन्त्विति - भवतां शिष्यः केशवप्रसादः।

पठित्वा पत्रं चिरनिद्राया उत्थित इव महासागरसमुत्थिततरङ्गव्रजे तरन्निव नभसि डयमान इव रामदयालुश्चिरमास। सत्यं लिखितं केशवेन। स्वल्पः कालः कार्यं च महत् करणीयम्। केशवप्रसादो यद्यपि बहु करोति तपस्वी, तथापि यावत् स स्वयमेव नास्मिन्नात्माभिनन्दनयज्ञे आत्मानं जुहोति तावन्नाप्स्यतेऽपूर्वम्।

अथ द्वितीयं पत्रमुद्घाट्य पठतो रामदयालोर्मनः सहर्षं ननर्त। पत्रमासीत् देहल्यां शिक्षामन्त्रालयस्यैकस्मिन् उपवेशने उपस्थानार्थम्। आगामिनि सप्ताहे आसीत् तदुपवेशनम्। इदानीं सिद्धं कार्यम्, यतो यदि देहली प्राप्ता, तर्हि न किमपि अशक्यम्।

अथ नियततिथौ यावच्छक्यं धनराशिं गृहीत्वा देहलीं प्रस्थितो रामदयालुः। देहल्यां त्रीणि दिनान्युपवेशनान्तरं स उवास। राष्ट्रपतिना, तदनु प्रधानमन्त्रिणा ततश्च कैश्चनान्यैर्मन्त्रिभिः केशवप्रसादनाम्ना मेलनाय नियुक्तिं प्राप्तुं भृशमसावयतत, परं त्रिचतुरेभ्यो मासेभ्यः पूर्वं न मेलनाय नियुक्तितिथिरपि नावापि। अनन्तरमसौ देहलीस्थान् प्रकाशकान् कांश्चित् गत्वा गत्वा स्वाभिनन्दनग्रन्थं मासत्रयावधौ प्रकाशयितुमनुरुणद्धि स्म। वरिष्ठाः प्रकाशका रामदयालोर्नाम्नाऽप्यपरिचिता दूरादेव तं पर्यहरन्। केचन क्षुद्राः प्रकाशकास्तु पञ्चाशत्सहस्रं मुद्राः प्रदेयास्ततोऽभिनन्दनग्रन्थं षण्मासावधौ प्रकाशयिष्याम इत्यवादिषुः। सर्वथा परास्त इव पराहत इव रामदयालुरभिनन्दनमहोत्सवस्योद्घाटनाय अभिनन्दनग्रन्थस्य च लोकार्पणाय केन्द्रीयशासने उपमन्त्रिणा निजग्रामबन्धुना पूर्णमलेन सम्पर्कं साधयामास। पूर्णमलस्तु सदैव लालायितोऽभूत् उद्घाटनलोकार्पणादिषु मुख्यातिथित्वं विधातुम्। अतः स सहर्षं स्वीकृतिं ददौ। अभिनन्दनमहोत्सवस्य अभिनन्दनग्रन्थस्य च लोकार्पणाय तिथिं निर्धार्य,

नैराश्यमहातमिस्राया बहिरागतः स्वाभिनन्दनग्रन्थस्य लोकार्पणमहोत्सवं नेदीयांसं पश्यन् प्रमुदित इव महोत्सवावसरे भाषमाण इत्थमित्थं वदिष्यामि अनेन चानेन तेन वा तया वा पुष्पमालाः मत्कण्ठोपहारतां नेष्यन्त इति मनोरथसहस्र-समारूढो भुवमपहाय नभसि डयमान इव 'सोयमिषोरिव दीर्घदीर्घतरो व्यापार' इति सिद्धान्ते श्रद्धालू रामदयालुरनयैव यात्रया मध्येमार्गमागरानगरमवतीर्य किमर्थं न केशवप्रसादोऽपि मिलित्वाऽभिनन्दनमहोत्सव विषये सन्नाह्य इति सन्धार्य अन्येद्युरेवागरां प्राप।

केशवप्रसादस्तु पत्रोत्तरमनवाप्य अनुत्थानोपहतः गुरोः रामदयालोरभिनन्दन-स्याभिनन्दनग्रन्थप्रकाशनस्य च प्रस्तावः, न भविता कापि तदनुकूला व्यवस्था इति मन्यमानो निश्चिन्त आसीत्। अथ अकालवातावलीमिव सहसोद्गता-मनभ्रविद्युन्निपातमिवानाकलितोपस्थानं स्वगुरुचरणं निजसद्मनि समागतं वीक्ष्य चकितः अन्तःकीलितोऽपि बहिःसर्वाकारप्रकटरमणीयतां दधौ। मिथ्याप्रपञ्च-रचनापटू रामदयालुस्तु देहल्यां मन्त्रालये किञ्चिदुपवेशन मतीवावश्यकमासीत्, तत्रोपस्थाय मध्येमार्गमिह द्वित्रा होरा यापयित्वा निवर्तिष्य इति समायातो-ऽस्मि, त्वत्कृते पौलेण्डदेशेऽतिथिप्राध्यापकत्वेन निमन्त्रणं व्यवस्थापितवानस्मि तत्र देहल्या मित्यादिभिर्वचोभिः केशवप्रसादं फणधरमिव मान्त्रिकः सुषिरवीणया, व्याध इव शकुन्तं जालेन, गोपीव हरिणं गीतमाधुर्येण वशीकर्तुमचेष्टत। केशवप्रसादोऽपि पोलेण्डीय-निमन्त्रणविषये पूर्वमेव विदितवेदितव्यः गुरोर्गुरुघण्टालतां जानन्नपि महतीं गुरुभक्तिं विनयं च प्रकटीकुर्वन्नुवाच- 'अहो सौभाग्यम्, अनुग्रहो मयि गुरुचरणानां शिष्यवात्सल्यं चास्मिन् क्षुद्रातिक्षुद्रे तृण इव लघुनि जन इत्यादिवचोवितानप्रतानसन्तानिनीं गिरं निजगाद।

रामदयालुस्तु – 'वत्स मैवं वादीः। त्वमेव मम शिष्येषु योग्यत्वेन धुरं वोढासि अपगतगौरवेऽस्मिन् गुरुतरवैषम्यविमर्दिते काले। इदानीन्तनेषु के नः पृच्छन्ति? पश्य तेषां कमलाकरमिश्र- रविकुमारादीनां कृते मया कि किं न कृतम्, परन्तु ममाभिनन्दनग्रन्थ- प्रकाशनवार्तामधिगत्य त एव सुप्ता अद्यापि न जाग्रति। अस्मिन् युगे तु तादृशाः शिष्या मिलन्ति ये गुरोः

पादवन्दना तावद् दूरे तिष्ठतु नाम, गुरोः पादौ पृष्ठतः कर्षन्ति तं धूलिसात् कर्तुम्। भवतु अस्माभिस्तु कार्यहानिः परिहर्तव्या– '

– 'गुरुवर, अहं तु सन्नद्धोऽस्मि सेवायै, परन्तु अनुरूपा व्यवस्था न भवेदिति बिभेमि–'

–'व्यवस्था तु भविष्यत्येव'– मध्ये छित्त्वा तदीयं कथनं रामदयालुरवदत् – 'न काऽपि चिन्ता कार्या..वित्तविषये मा क्लिश्यतु भवान्। गृह्णातु एतानि विंशतिसहस्रं रूप्यकाणि। एतानि तु अभिनन्दनग्रन्थस्य मुद्रणार्थम् अग्रिमत्वेन देयानि।' इति स्वस्यूतकेश- मुद्घाट्य तस्मै राशिं ददौ। यावत् केशवप्रसादः किमप्यवगच्छति, तावत् स तस्मै 'मम गुरुचरणानां व्यक्तित्वम्', 'मम गुरुचरणानां साहित्ययात्रा', 'मम गुरुचरणानां शोधयात्रे'ति शीर्षकेण कैश्चित् शोधच्छात्रैर्लेखायितान् लेखान् तस्य करेऽर्पयित्वा प्राह- 'काचन सामग्री पुरा प्रेषितैव, इयमपि सामग्री मत्सकाशमासीत्। काचन सामग्री तव सकाशमपि वर्तते। अद्यैव मुद्रकाय सामग्री देया। समयस्तु स्वल्प एवावशिष्टः। अभिनन्दनमहोत्सवो भव्यः स्यात्। अथ पुनरपि निष्कास्य एकविंशतिसहस्रं रूप्यकाणि ददानो रामदयालुरुवाच– 'अभिनन्दनमहोत्सवे अयमेकविंशतिसहस्रं रूप्यकाणां राशिर्मह्यमर्पणीयः। इदमपि तत्र घोषणीयं यदस्य राशेः सदुपयोगो मया एकस्यशोधसंस्थानस्य स्थापनायै करिष्यत इति।'

उक्त्वा चैतत् क्षणं विरम्य पुरप्यसावाह- 'किं बहुना, विज्ञो भवान्। लोक- व्यवहारज्ञो भवान्। कालोऽयमेतादृशः। एवमेव प्रवर्तनीयं भवति। परस्परं भावयन्तः श्रेयः परमवाप्स्यथ इति उक्तं गीतायाम्। अतः गुरुभिः शिष्या भावनीयाः शिष्यैश्च गुरवः। स्थापिते शोधसंस्थाने तत्रापि भवानेव धूर्वहः। संस्थानस्य न्यासरूपेण पञ्जीकरणं कारयिष्यामः, तदर्थं च यथेष्टं वित्तसङ्ग्रहमनुदानादिव्यवस्थां च सम्पादयिष्याम' इति।

इत्थं केशवप्रसादं बहुश उच्चैर्नीचैश्च शिक्षयित्वा 'इदानीं कृतकृत्योऽस्मि, दिग्विजयी भवामि, अनेन संरम्भेनास्कन्दिता मया विरोधिनः, परास्ता वैरिणः, ध्वस्ताः शत्रवः। किं बहुना, अभिनन्दन- महोत्सवे केशवप्रसादेन महतोत्साहेन

समायोजिते स्थापिते मम महिमनि कुलपतिपदम् अन्यत्र वा महत्तरपदं वापि न दुर्लभमित्यनल्प- कल्पना- कवलितस्वान्तः आपृच्छ्य केशवप्रसादं स आगरातो गृहनगरमाजगाम।

यथा यथा अभिनन्दनं निकटायते स्म तथा तथोत्कायते स्म रामदयालोश्चेतः। केशवप्रसादाय प्रतिसप्ताहं पत्रमसौ विसृजति। तस्य पत्रोत्तरं प्रतीक्षते। उत्तरं नायाति। दूरभाष्येण सम्पर्कं साधयितुं प्रयतते। दूरभाष्येऽपि केशवो न मिलति। तथाप्यङ्गीकृतं परिपालयिष्यति केशव इति विश्वसिति रामदयालुः। यद्यसौ अभिनन्दनमहोत्सवं अभिनन्दन- ग्रन्थलोकार्पणं च सम्यक् साधयति, अहं च तदनु वर्धितप्रताप कुत्रचित् कुलपतिः स्याम्, तर्हि केशवप्रसादमवश्यं तत्र कस्मिन्नपि उच्चतरे पदे नियोजयिष्यामि, तेन तत्रापि स मे सहायकः स्यादिति कल्पनासु स क्वचित् विचरति, क्वचित् नैराश्यपराहतो भवति।

मुहुर्मुहुः पत्राङ्कुशैः प्रणोदितः केशवप्रसाद एकं प्रतिपत्रं सम्प्रेष्य सन्दिदेश- 'प्रकाशनाय दत्तो मया अभिनन्दनग्रन्थः। किन्तु प्रकाशकोऽसौ भूयोऽपि वाञ्छति मुद्रणार्थं धनम्। अन्यच्च – अभिनन्दनावसरे माइक-विद्युत्-सज्जादिव्यवस्थायै पुनरपि धनमपेक्ष्यते। तत्कृते भवन्त एव प्रमाणम्' इति।

पत्रं पठित्वा उद्विग्नोऽभवत् रामदयालुः। क्वचित् स कोपाकुलश्चिन्तयति- 'अरे किमयं केशवप्रसाद एतावदपि धनं व्यवस्थापयितुं न शक्नोति? अभिनन्दनसमितेः संयोजकः स एव वर्तते, स्वकीयस्याभिनन्दनमहोत्सवस्य माइक-विद्युदादिव्यवस्थायै अपि धनमहमेव चेद् ददामि, तर्हि स कीदृशः संयोजकः? पूर्वमेव विंशतिसहस्रं दत्तम्। इदानीं कियद् दीयेत? इति। अथापरा विचारसरणिस्तस्य मनसि उदेति- 'इदानीं तु पदमग्रे सारयित्वा परावर्तनमनुचितम्। केशवप्रसादोऽपि यदि उद्यमादस्माद् विमुखो भवति, तर्हि ममाभिनन्दनमहोत्सवः क्वचिदपि कदाचिन्नायोज्येत, अत एव न स किमपि वाच्यः। इत्थं परस्परं विरुद्धैर्विचारैः क्वचिदितः क्वचित् ततो नीतोऽसौ मनाक् सुस्थं विधाय मनः केशवप्रसादं पत्रमलिखत्- 'प्रिय केशव, अहं यथासम्भवं धनराशिं प्रेषयिष्यामि। समग्रेऽपि भारते मम शिष्यमण्डली प्रसृता।

अहमपीतः प्रेषयामि कांश्चन शिष्यान् पत्राणि, त्वमपि स्वपूर्वसहाध्यायिनः पत्राणि लिखित्वा मुहुर्धनसञ्चयं कुरु। कार्ये अवरोधो मा भूत्' इति।

अभिनन्दनदिनं निकटायते। रामदयालुरुत्कायते। कण्ठगता इव भवन्ति प्राणाः।

अन्ततः मुद्रितनिमन्त्रणपत्रस्यापि प्रतयः प्राप्ताः। इदानीमवसरोऽयं रहस्योद्घाटनस्य जीवने प्रतिपदमवरोधभूतायाः जीवनसङ्गिन्या दुलारीदेव्याः समक्षम्।

श्रुत्वा दुलारीदेवी अवादीत्- 'भवतामभिनन्दनम्? कः करोति? अस्मिन् जगति एतादृशा मूर्खाः सन्तीत्यहं तु न स्वीकर्तुं शक्नोमि। अत्र भवतामेव कोऽपि अभिसन्धिः स्यात्'–

– 'अरे अरे मम शिष्याः सन्ति न– तेषु केशवप्रसादः करोति एतत् सर्वम्'– रामदयालुर्मनाग् लज्जित इव अवदत्।

– अस्तु, अहमपि चलिष्यामि।

रामदयालुश्चकितोऽभूत्। कीदृशीयं पविपातपुरस्सरमनभ्र- वृष्टिः!

'अरे, त्वं तत्र किं करिष्यसि?'– रामदयालुः सस्खलितमाह।

- अरे भवतामभिनन्दनम्– अहं भवतां सहधर्मिणी– अहं तत्र यदि नोपस्थास्ये तर्हि महान् प्रवादः स्यात्– अन्यच्च - अह- मागरातः किमपि क्रयं कृत्वा आगमिष्यामि–

अयमपरो गण्डस्योपरि विस्फोटः! पत्नी सह याति, क्रयं च करिष्यति शाटिकादीनां तत्र गत्वा!

आगरां प्रस्थातुं सर्वं सन्निधापितम्। अत्रान्तरे केशवप्रसादस्य दूरभाष्यं त्रिः समागतम्, रामदयालुस्त्रिष्वपि पर्यायेषु गृहे नासीत्। - अरे कश्चन केशवप्रसादो वर्तते आगरायां, तस्य दूरभाष्यं समागतमिति दुलारीदेव्या सूचितः स सम्पर्कं साधयितुमयतत केशवेन, सम्पर्को न जातः। प्रस्थानाद् दिवसद्वयं प्राक् केशवप्रसादस्य तन्त्रीद्वारेण सन्देशः प्राप्तः- मुद्रकः कर्गदक्रयाय विंशतिसहस्रं याचते इति। रामदयालुरनेन सन्देशेन मनागुद्विग्नः। परस्तादचिन्तयत्- यत्

स्यात् तत् स्यात्। इदानीं तु अग्रे प्रकृतमनुसरामि।

दुलारीदेवी न केवलम् आगरायात्रायां सङ्गता, पुत्रौ प्रभुदयालुकृष्णदयालू अपि सा तदानीमेव दूरभाष्येण सूचितवती। अतस्तावपि नियतदिने आगरां सम्प्राप्तौ। दुहिता भारती तु आपन्नसत्त्वा, अतः सा आगन्तुं नाशक्नोत्।

अभिनन्दनं भव्यं जातम्। सर्वमपि केशवप्रसादेन समीचीनं साधितमभूत्। शोभना सज्जा, समीचीना शाला, रम्यो मञ्चः पुष्पैरावृतः। रामदयालुर्हर्षगद्गदः केशवप्रसादं तत्रैवालिङ्गितुमुत्कण्ठितोऽभवत्। यथाकालं सम्प्राप्तो मन्त्री पूर्णमलोऽपि रामदयालुना सह ग्रामे व्यतीतस्य स्वबाल्यस्य स्मरन् कथं ग्रामविद्यालये रामदयालुर्मत्साहाय्यं करोति स्म, परीक्षामहासागरतरणाय कथं स कार्गलनौका निर्माय निर्माय मह्यं ददाविति संस्मरणैः प्रति- पादयन् बाल्यभाषणं बहुकालं यावद् विदधानः सोऽयं मम बालसखा मम कौपीनमित्रम् सम्प्रति महाब्राह्मणो महानाचार्यो महाविद्वांश्च सञ्जातः अहं च न तथा अध्ययने मेधावी, न महाविद्यालये विश्वविद्यालये वा प्रवेशं प्राप्तुमशक्नुवमिति हेतोरहं मन्त्री सञ्जात इति सूचनया सार्धं स्वभाषणं समाप्नोत्। अन्यैश्च कैश्चित् केशवप्रसादस्यानुरोधेन समागतैर्विद्वद्भिश्चाटु- प्रवीणै रामदयालोः प्रशंसायां द्यावापृथिव्यौ एकीकृते।

रामदयालोश्चित्तमतिमात्रमधडधडायत। अभिनन्दनग्रन्थस्य लोकार्पणं केशवप्रसादेन कारयिष्यते वा न वेति संशयितजीवित इव कण्ठसक्तप्राण इवासौ मुहुर्मुहुः सोत्सुकं निध्यायति स्म तम्। आगतमात्र एव ह्यस्तने दिने आगरामसौ अभिनन्दनग्रन्थो मुद्रितो वा न वेत्यपृच्छत् केशवम्। भूयो भूयोऽनुयुक्तोऽपि केशवः केवलमेतावदेव उक्त्वा विरराम- 'गुरुवर्याः किं कथयामि, सर्वं शोभनमेव स्यादिति कलयामि।' यदि मुद्रितोऽभिनन्दनग्रन्थस्तर्हि एकां प्रतिं पूर्वं द्रष्टुमिच्छामीत्युक्तवति तस्मिन् केशवप्रसाद आह- 'ग्रन्थो मया सपुटवस्त्रबन्धाय (क्लाथ- बाइण्डिङ्गकृते) बन्धकस्यापणे प्रेषितः, मन्ये श्व एव स दास्यति सपुटवस्त्रबन्धमभिनन्दन- ग्रन्थमिति। अभिनन्दनग्रन्थस्य पूर्वा छविस्तेन नावलोकिता इति चित्तं किञ्चित् कषायित- मासीत्। काऽपि

शङ्कापिशाची अपि चेतसि मुहुर्मुहुः समुत्तिष्ठति स्म- अभिनन्दनग्रन्थस्य प्रूफपत्राणि अहमवलोकयिष्यामीति निर्बन्धे कृतवति रामदयालौ केशवप्रसादेन न कदापि प्रूफपत्राणि प्रेषितानि, समयस्तु स्वल्पः, प्रूफप्रेषणे पुनर्विलम्बः स्यादिति स कथयति स्म दूरभाष्ये। अत एव इदानीमपि अभिनन्दनग्रन्थस्तस्य प्रकटीभविष्यति वा न वेति पर्याकुल- मासीन्मनो रामदयालोः। परन्तु इदानीं तु पृच्छाया अवसर एव नासीत्।

अथ स्वर्णपत्रावरणबद्धं मञ्जूषाकृति किमपि वस्तु स्वयंसेवकेषु कश्चन यदा- धिमञ्चमानीय केशवप्रसादस्य करेऽर्पितवान्, तदा समुच्छ्वसितं चेतो रामदयालोः। प्रत्यागताः प्राणाः। दिष्ट्या आपणात् प्राप्तः सपुटवस्त्रबद्धः अभिनन्दनग्रन्थः !

'मान्याः, बहुभिर्विद्वद्वरेण्यैरस्मद्गुरुचरणानां श्री रामदयालूनां श्रीरामस्येव दयालूनां कीर्तिकथा पाण्डित्यं महनीयं च कृतित्वं समुद्घाटितानि'– केशवप्रसादो ध्वनिविस्तारक- यन्त्र समक्षं स्थित उद्घोषयन्नासीत् – अहं तु मन्ये यदेतेषामौदार्यस्य विद्यानुरागस्य सीमैव नास्तीति। यतो हि एतेषामभिनन्दनावसरे समर्पणाय एकविंशतिसहस्ररूप्यकमितो धनराशिर्य एतेषां शिष्यैः प्रशंसकैः सङ्गृहीतस्तस्य सदुपयोगं स्वकोशेनापरमपि एकविंशतिसहस्रं संयोज्य एकस्य शोधसंस्थानस्य स्थापनां करिष्यामीति सद्य एतैः सङ्कल्पः प्रकटीकृतः।'

केशवप्रसादः श्रोतृमण्डल्यै तालिकावादनावसरं दातुं क्षणं विरराम। श्रोतृषु मन्त्रिणः पूर्णमलस्य पीठमर्दाः विटाः पञ्चाशत्प्राया आसन्, आसंश्चापरे केचन केशवप्रसादस्य छात्राः। ते सर्वे अधिमञ्चं यत्किमपि भवति, तत्र सर्वथा अनवधानाः परस्परमालपने लग्नाः। केचन प्रबुद्धा अपि प्राध्यापकाः केशवप्रसादस्यानुरोधेन तत्रागतास्तेऽपि रामदयालोरतिरञ्जितां प्रशस्तिं श्रावं श्रावमुद्वेजिता निद्रान्ति स्म। अतो न कोऽपि केशवप्रसादस्य विरामचिह्नमवागच्छत्। तथापि श्रोतृषु कश्चिज्जजागार कृतवांश्च तालिकावादनम्, तदा गड्डरिकाप्रवाहन्यायेनावसरमनवगत्यापि सर्वे तूर्यनादमिव तालिकाः अवादयन्।

रामदयालुस्तु केयं वार्ता स्वकोशात् एकविंशतिसहस्रात्मक-राशेर्विनियोगस्य, मया तु न तथोक्तम्; अस्तु, पूर्वं यदेकविंशतिसहस्रं मया दत्तं तत्तु प्रथमं स्वायत्तं स्यात् - इति विचार्य अभिनन्दनग्रन्थस्य तु इदानीमपि दर्शनं न जातम्, अयं राशिरेव त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पय इति भावेन केशवो मह्यं दापयेत् इति चिन्तयन् सोत्सुकं केशवप्रसादं निध्यायति स्म।

'इमं च एकविंशतिसहस्रात्मकं धनराशिम् अभिनन्दनसमितेः स्थानीयाध्यक्षा अस्माकं महाविद्यालयस्य प्राचार्याः श्रीमन्तो देवलीकरमहोदया गुरुवर्याणां करकमलयो- रर्पयिष्यन्ति। तानहं प्रार्थये....' केशवप्रसाद उद्घोषयति स्म।

एकविंशतिसहस्रं रूप्यकाणामावरणपत्रं देवलीकरमहाभागेभ्यो हस्ते गृह्णन् राम- दयालुरचिन्तयत्- मया तु केशवाय मुद्रास्वेव एकविंशतिसहस्रं समर्पितम्, तेन तस्य राशेः ड्राफ्टपत्रं निर्मापितं किम्, इदमावरणपत्रम् एतावल्लघु प्रतिभाति..

'इदानीं केन्द्रीयशासने उपमन्त्रिपदमलङ्कुर्वाणाः परमश्रद्धेयाः श्रीमन्तः पूर्णमलमहोदयाः श्रीमद्रामदयाल्वभिनन्दनग्रन्थस्य लोकार्पणं करिष्यन्ति, तस्यैकां प्रतिं च गुरुवर्येभ्योऽर्पयिष्यन्ति...

अभ्रङ्कषमुच्छलति स्म रामदयालोर्हृदयम्। अयं स क्षणः प्राप्त एव चिरप्रतीक्षितः। इदानीं सोऽजरोऽमरश्च सञ्जातः। नश्वरमिदं शरीरम्, इदं क्षयं यास्यति, परन्तु अभिनन्दनग्रन्थस्तु आसेतुहिमाचलं तेषु तेषु ग्रन्थागारेषु यावत् स्थास्यन्ति गिरयः सरितश्च महीतले तावत् स्थास्यति, अथवा न वा तिष्ठेत् तथापि तत्प्रभावेण उन्नतेः सोपानानि तु कानिचित् स सत्त्वरं रोक्ष्यति - इति विचारयन् ब्रह्मानन्दसहोदरस्य आनन्दस्य महासागरे उन्मज्जति स्म निमज्जति स्म रामदयालुः।

'अस्मिन् महति ग्रन्थे न केवलं गुरुवर्याणां व्यक्तित्वं कृतित्वं चाधिकृत्य गम्भीरा लेखा अपितु येषु येषु क्षेत्रेषु गुरुवर्याणामवदानं वर्तते, तेषु नूतनानुसन्धानदिश उन्मीलयन्ति शोधपत्राण्यप्यत्र विदुषां सङ्कलितानि।'

इति कथयन् स्वर्णिमपत्रावरणबद्धं सहस्रपृष्ठात्मकं विशालं ग्रन्थं केशवप्रसादो

मन्त्रिणः पूर्णमलस्य करयोरर्पितवान्। मन्त्री तु सुरतानभिज्ञो यथा नीवीग्रन्थिं मोचयितुं न जानाति, तथैव अभिनन्दनग्रन्थस्य स्वर्णपत्रावरणस्य बन्धनग्रन्थिं न विवेद। केशवप्रसादस्ततोऽग्रेसृत्य ग्रन्थिविमोचनं विधाय स्वर्णपत्रस्य आवरणमपसार्य ग्रन्थं तस्य करे निदधे। अधरम् ओष्ठं चान्तरा विलम्बितां स्मितरेखां विरचय्य अभिनन्दनग्रन्थस्य बाह्यावरणं श्रोतृसमाजसम्मुखं विधाय पूर्णमलश्छायाचित्रग्राहकाय स्वस्याश्छवेर्ग्रहणार्थं सानुग्रहमवसरं ददौ। विद्युत्प्रकाश इव तस्मिन्नेव क्षणे रामदयालुना दृष्टं ग्रन्थस्य सम्मुखावरणे अतिभव्यं स्वचित्रम्, 'श्रीमद्रामदयाल्वभिनन्दनग्रन्थ' इति विशदाक्षरमुद्रिता लिपिश्च।

अथासौ 'अहोभाग्यं, सफलं मे जन्म, सन्तर्पिताः पितरः, गुञ्जितो डिण्डिमघोषो मत्कीर्तेरनयाऽभिनन्दनग्रन्थजयघण्टयेति कलयन् पूर्णमलेन निजकराभ्यां स्वकरयोरर्प्यमाण- मभिनन्दनग्रन्थं जिघृक्षुस्तदावरणपृष्ठमुद्घाट्यान्तर्दिदृक्षुर्यावद् धारयति अभिनन्दनग्रन्थं तावदु- त्पत्येव विद्युत्पातनिभं केशवप्रासादोऽन्तरा तं च पूर्णमलं च झटित्युपेत्य ग्रन्थं तस्य हस्तादा- च्छिनत्, ददौ च तत्रैव सन्नद्धतया स्थिताय कस्मैचित् स्वयंसेवकाय। तत्क्षणं च स स्वयंसेवको ग्रन्थमादाय ततोऽन्तर्हितः। पिपासुरिव सतृष्णोऽपहस्तितपानीयपात्र इव तस्थौ रामदयालुः।

'इदानीमभिनन्दिता विद्वांसो गुरुवर्या सभामेनां सम्बोधयिष्यन्तीति केशवप्रसादघोषणां श्रुत्वा वाष्पवृत्या कषायितकण्ठः कथमपि गद्गदस्वरेण भाषणं विहितवान् रामदयालुः।

अभिनन्दनमहोत्सवः सम्पन्नः। पत्नी दुलारीदेवी अपि पुष्पस्तबकं प्राप्य प्रसन्ना। पुत्रौ कृष्णदयालुप्रभुदयालू तु कार्यक्रमस्थलादेव पित्रे प्रणामं निवेद्य प्रस्थितौ।

रामदयालुनापि सपत्नीकेन रात्रावेव परावर्तनीयमासीत्। गमनात् प्राक् केशवप्रसाद- स्य महदवदानं शिरसा वहन् सङ्कुचितोऽपि रामदयालुः अभिनन्दनग्रन्थस्तु मया नाद्याप्यवलोकितः, तस्यैका प्रतिर्मह्यं देये'ति तमाह।

केशवप्रसादः- 'वस्तुत एकैव प्रतिरभिनन्दनग्रन्थस्य वस्त्रपुट- बन्धकसकाशा-

न्नकुलेनान्तिमे क्षण आनीता। अत एव न अन्यस्मै कस्मैचिदपि प्रतिर्दत्ता.....यदा सर्वाः प्रतयः आयान्ति तदा विधिवदभिनन्दनग्रन्थस्य वितरणं प्रारभ्येत....'

रामदयालुराह– 'अस्तु तावत्, मह्यं तु सैव प्रतिर्देया...'

रामदयालोः स्वरे समाविष्टं दैन्यमभिलक्ष्य केशवप्रसादस्या- धरोष्ठयोः सूक्ष्मा स्मितरेखोदियाय। –' सा प्रतिः! सा प्रतिस्तु आसीत्, परन्तु मन्ये नकुलेन सा नीता–'

इदानीं रामदयालुरातुरमवादीत्– - अरे, कोऽयं नकुलो नाम?

– नकुलो मम छात्रः, स नितरां पटुः। स एव कथञ्चिदेकां प्रतिं वस्त्रपुटबन्धकस्य सकाशादानीतवान्। मञ्चव्यवस्थामद्यतनीं स एव पश्यति स्म। मञ्चे अस्मद्गृहात् या या सामग्री गता, सा तेन अपसारिता। मन्ये तया सह सोऽभिनन्दनग्रन्थस्य तामपि प्रतिं नीतवान्–

इदानीं रामदयालुरुद्वेजितः प्राह– 'अरे स किमर्थं नीतवान् ग्रन्थम्? अभिनन्दन- ग्रन्थस्तदीयो वा मदीयो वा?'

रामदयालोराननं क्लिष्टमभिलक्ष्य केशवः पुनः प्राह- 'मा तावत् क्लिश्यतु भवान्। अहं नकुलं शब्दापयामि। स आनेष्यति ग्रन्थस्य तामेव प्रतिम्। सम्प्रति तु किमपि अश्नन्तु मातृभिः सह। वाष्पगन्त्र्या गमनकालो नेदीयान् वर्तते....'

अनिच्छन्तमपि रामदयालुमभिनन्दनमहोत्सवे चाटूक्तिभिरतिशयोक्तिमय-प्रशंसाभिश्च पूरितोदरमिव पुनरुक्तवदाचरन् बलाद् भोजयामास सुशिष्यः केशवप्रसादः। रामदयालोस्तु चेत उत्कायते स्म अभिनन्दनग्रन्थमवलोकयतुम्, कामं परिहृता स्याद् वाष्पगन्त्री। परं प्रस्थानसमयो जात इति निगदन् केशवप्रसादः स्वयमेव तस्य परिच्छदं बहिर्निस्सारयामास, तदा रामदयालुरपि गृहाद् बहिरागतः, बहिरागता च केशवप्रसादस्य धर्मपत्न्यै आशिषो ददती दुलारीदेवी। कारवाहनम् आरोहति स्म रामदयालुः। तदानीमेव नकुलोऽभिनन्दनग्रन्थस्य स्वर्णपत्रावृतं पुटकं हस्तेन गृहीत्वा आगच्छन् दृष्टः। केशवप्रसादः पुटकं तत्करादादाय रामदयालोः परिच्छदे स्थापयन्नाह– 'समयो नास्ति। चर्ममञ्जूषायामिमं ग्रन्थं

स्थापयन्तु सम्प्रति तु, पश्चादवलोकयन्तु तत्र गत्वा' इति।

समयस्तु सत्यं नासीत्। सपत्नीको रामदयालुः अवस्थानकं प्राप्तस्ततः प्रागेव वाष्पगन्त्री आगता आसीत्। केशवप्रसादेन मल्लत्वमाचरता कथञ्चित् स दुलारीदेवी च सायासम् आरक्षितायां शायिकायां प्रवेशितौ, 'भवतु प्रणामाः' इति कथयन् स प्रस्थिताद् यानात् नीचैरकूर्दत।

दुलारीदेवी निरन्तरं प्रश्नकण्टकैर्भिनत्ति रामदयालुम्- 'अनेन केशवप्रसादेन भवतः कृते एतावानायासः कथं विहितः, अस्य तावदनेन अभिनन्दनमहोत्सवेन को लाभः, मन्ये लक्षमितानि रूप्यकाणि सङ्गृहीतानि स्युः, तेन तु एकविंशतिसहस्रमेव भवद्भ्यो दत्तानि... भवान् किं करिष्यति अस्य धनराशेः? अयं मह्यं तत्रैव देय आसीत्, अहं वध्वोः कृते शाटिके क्रीत्वा पुत्राभ्यामदास्यम्....'

रामदयालुस्तस्या वक्रभणितीनां वाक्कशाप्रहाराणां सम्मुखं सर्वथा मूकः अप्रतिक्रियः शनैः शनैः सर्वं परिच्छदजातं व्यवस्थाप्य चर्ममञ्जूषामुद्घाट्य स्वाभिनन्दनग्रन्थं निस्सारयामास। सोत्कण्ठं च ततः स्वर्णिमपत्रावरणमपसारयामास। अभिनन्दनग्रन्थस्य मुखपृष्ठस्थे स्वकीये भव्ये चित्रे दृष्टिस्तस्य स्तिमिता आस। दुलारीदेवी शयनप्रच्छदमास्तृणोति स्म शायिकायाम्, आस्तीर्य प्रच्छदं शयानाया तस्या अपि दृष्टी रामदयालोर्हस्तस्थितस्य अभिनन्दनग्रन्थस्य मुखपृष्ठे पतिता। -'अरे इयं छविस्तु रम्या वर्तते, कुत्रेयमाकृष्टा प्रतिकृतिरिति वदन्ती सा नयने न्यमीलयत्। रामदयालुः क्षणं स्वकीयां छविमेव निर्वर्णयन् स्थितः, यावत् दुलारीदेवी निद्राधीना बभूव। रामदयालुरभिनन्दनग्रन्थस्य मुखपृष्ठमुदघाटयत्। इदं पृष्ठं रिक्तमासीत्। एतत् तु वस्त्रावरणकर्त्रा संयोजितम्, अत एव रिक्तम्। स द्वितीयं पृष्ठमुदघाटयत्। तदपि रिक्तमासीत्- शुभ्रं निरभ्राकाशमिव स्वच्छं पृष्ठम्। किमपि शङ्कित इव रामदयालुस्तृतीयं पृष्ठमुद्घाटयत्- अस्मिन् पृष्ठे तु स्यादेव अनुक्रमणिका, सम्पादकानामभिनन्दनग्रन्थसमितिसदस्यानां वा नामानि... परन्तु इदमपि पृष्ठं रिक्तमेव। अये किमेतत्? आतङ्कितो रामदयालुः कम्पमानेन करेण सङ्कलय्य दश वा पञ्चदश वा पृष्ठानि परावर्तयामास। सर्वाणि पृष्ठानि रिक्तानि, अनन्तरं सर्वोऽपि ग्रन्थस्त्वरया

तेन आलोडितो विलोडितश्च। सर्वाणि पृष्ठानि सर्वथा रिक्तानि? मनसि रोरुद्यमान इव रामदयालुरात्मानमात्मनैवाह- अरे क्व गताः मम व्यक्तित्वकृतित्वादिविषये सर्वे ते लेखाः? किं ते सर्वे मत्करस्पर्शमात्रेण हेमन्ततुषारकणा इव सहसा उड्डीनाः? किमिदं शून्यमेव ममाभिनन्दनम्? अयं स्वप्नो नु माया नु मतिभ्रमो नु- ये मनोरथाः सृतास्ते क्व पराहताः? अथवा रात्र्यन्धकत्वान्मे नेत्रे कृष्णानि अक्षराणि नैव पश्यतः, सर्वं सितमेव केवलमवलोकयतः? इत्थं शङ्का-संशय-सन्त्रास-समारूढहृदयः उपनेत्रं प्रोञ्छ्य पुनः पुनः ग्रन्थमालोडयन् रिक्तपृष्ठव्यूहे प्रतिपर्यायं गाहमानो रामदयालुर्जड इव तत्र स्थितः। केवलम् ईश्वरस्येयमेव महती कृपा यद् भाग्यवती दुलारीदेवी इदानीं गाढं निद्राधीना नासारवं विमुञ्चति स्म, अन्यथा तु अस्मिन् दृश्ये तस्या उपस्थितिर्हस्तक्षेपो वा यादृशं सङ्कटस्यावर्तं विवर्तं वाऽजनयिष्यत्, तस्य कल्पनाऽप्यसह्या आसीत् रामदयालोः कृते।

तर्हि केशवप्रसादेन रिक्तानां पृष्ठानां ग्रन्थं निर्माप्य तस्मै दत्तोऽयं ग्रन्थः- – इयं रिक्ततैव तस्य सर्वस्याध्वसायस्य पुरस्कारः? किमयमेव तस्य सकलायाः सारस्वतसाधनायाः सारः?

सहसा रामदयालुरेकविंशतिसहस्ररूप्यकाणां प्रावरणस्य सस्मार। सम्मानराशिं गृह्णन्नपि तस्य मनसि तदानीमेव शङ्का समुत्थिता आसीत्- कथमिदं प्रावरणमियल्लघु इति। स कम्पमानकराभ्यां स्वस्यूतकेशमुद्घाट्य प्रावरणं निस्सार्य तदन्तर्ददर्श। एकस्य रूप्यकस्य कार्गलमुद्रा पत्रमेकं च तत्र आसीत्। –'अरे गतानि मम एकविंशतिसहस्रं रूप्यकाणि अपि!' इति सहाहाकारं सचीत्कारं प्ररुरोद रामदयालोरन्तःकरणम्। अन्ततश्च केशवप्रसादाय गालीसहस्रं ददत् कथमप्यवष्टभ्यासौ हृदयस्फोटकं पत्रं पपाठ। लिखितमासीत् तत्र–

'आदरणीया गुरुवर्याः,

'अभिनन्दनमहोत्सवसमायोजनार्थं प्राप्तस्य राशेरायव्यविवरण- मित्थं वर्तते-

'आयः

१. अभिनन्दनग्रन्थप्रकाशनाय भवत्प्रदत्तानि - २०,०००/००

२. अभिनन्दने समर्पणाय भवत्प्रदत्तानि २१,०००/००

३. अभिनन्दनग्रन्थाय प्राप्तं दानम्- १६२५/००

४. अभिनन्दनमहोत्सवाय स्थानीयसङ्ग्रहः १७५०/००

सकलयोगः ४४३७५/००

'व्ययः

१- अभिनन्दनार्थं गृहीतायाः शालाया भाटकम्- ५०००/००

२- विद्युद्- ध्वनिप्रसारणयन्त्रादिव्यवस्था ५०००/००

३- पुष्पहाराः मञ्चसज्जा च २५००/००

४- आमन्त्रितानां कृते स्वल्पाहारः ४८७४/००

५- अभिनन्दनग्रन्थमुद्रणार्थं मुद्रकाय अग्रिमम् २०,०००/००

६- अभिनन्दनग्रन्थस्यावरणमुद्रणम्, एकसहस्रं

७- रिक्तकर्गदानि, वस्त्रपुटबन्धनं च ग्रन्थस्य ७०००/००

'सकलयोगः ४४३७४/००

'अवशिष्टम्- १/००

'एकरूप्यकस्यावशिष्टो राशिर्मया अत्र प्रावरणे स्थापित एव।

'अभिनन्दनग्रन्थस्य मुद्रणवृत्तान्तस्त्वित्थम्- मुद्रणकार्यं विघ्नैर्मुहुर्मुहुः प्रतिहन्यमानं प्रचचाल। प्रूफपत्राणामेकः पाठः मया अत्र कृतः। अनन्तरं मुद्रणालयेन विज्ञप्तिर्दत्ता यत् यत्किमपि अग्रिमं दत्तं तत्तु मुद्रणकार्यार्थमासीत्, कर्गदक्रयाय पुनरपि विंशतिसहस्रं देयमिति। अहं दूरभाष्येण श्रीमतां सम्पर्कमाप्तुं भृशमयतम्, सम्पर्को नाप्तः. ततो भवन्तो मया सूचिता एतत्प्रकरणमधिकृत्य तन्त्रीद्वारेण। अग्रिमराशिमप्राप्य मुद्रणालयः एकपाठेन शोधितायाः सामग्र्या एकामपि प्रतिं दातुं सर्वथा प्रत्याचष्ट। अभिनन्दनमहोत्सवस्य यदा एकमेव दिन- मवशिष्टम्, भवतां सकाशान्नागतश्च धनराशिस्तदा अकिञ्चित्करतया मया भवतां सम्मानरक्षार्थं यः कश्चन राशिर्मत्सकाशे आसीत् तेन आवरणमात्रं मुद्रापितम्, एकसहस्रं रीमद्वयमितानि वा पृष्ठानि क्रीत्वा वस्त्रपुटबन्धनाय दत्तानि। दिष्ट्या इमं वृत्तान्तं ऋते भवन्तं मां नकुलं च न कोऽपि जानाति।

यदि मुद्रकाय कर्गदक्रयाय विंशतिसहस्रं दीयते, तर्हि स मुद्रयित्वा दास्यति ग्रन्थम्, अन्यथा तस्मै पूर्वं दत्तो राशिरपि निमज्जेत। अस्मिन् सर्वस्मिन्

प्रकरणे यदि कश्चन ममापराधः स्यात् तर्हि क्षन्तव्योऽयं जनः। इति भवतां शिष्यः-केशवः।'

पठित्वा छलितोऽहं केशवप्रसादेन, आत्मनैव वा स्वयमिति विचारयन् स्थितो रामदयालुः।

—000—

वायवा:

यात्रां मनो नाभिनिविशते। यात्राया आशयो भवति सुनिबद्धायां निरामयदिनचर्यायां व्याघातो नाम। अहं तावदस्मि मध्यवर्गीयः सुविधा- भोगी मनुष्यः। तथापि यात्राः निर्वर्तनीया भवन्ति। यथेयं यात्रा। इयं यात्रा 'वायवा'-ग्रहणाय विधीयते। 'पी-एच्.डी.'-त्युपाधये या मौखिकपरीक्षा भवति, सैव वायवेति शब्देन व्यपदिश्यते।

यन्नगरं प्राप्स्यामि, तस्मिन् नगरेऽप्येको विश्वविद्यालयो विद्यते, यथा मामकीने नगरे विद्यते विश्वविद्यालयः। यथा मन्नगरगतो विश्व- विद्यालयः पी-एच्.डीत्युपाधिं वितरति, तथैवासावपि विश्वविद्यालयो वितरत्युपाधिमिमम्। मुक्तहस्तं वितरतीति वक्तव्यम्। वितीर्यमाणस्य प्रत्येकं पी.एच.डीत्युपाधे-'र्वायवा' भवति। अहं हिन्दीसाहित्ये प्राध्यापकः। 'वायवा'-ग्रहणार्थं च परीक्षकत्वेन करणीया भवन्ति मादृशेन इतस्ततो यात्राः।

अयं वायवास्तावत् कस्याश्चन कन्यकाया महिलाया वा वर्तते। यस्या वर्तते तस्या नाम अहं न जानामि। न स्मरामीति वक्तव्यम्। तस्या नाम तस्याः शोधप्रबन्धस्य मुखपृष्ठे मुद्रितमस्ति। शोधप्रबन्धस्तु मम परिच्छदे वर्तते। तमुद्घाट्य अवलोकयामि चेत्, प्रबन्ध- कर्त्र्या नाम पुनर्ज्ञातं स्यात्। परन्तु प्रबन्धं सकृत् उद्घाट्यापि द्रष्टुं मनो न मनुते।

मूल्याङ्कनार्थं तेभ्यस्तेभ्यो विश्वविद्यालयेभ्यः प्रतिवर्षं प्राप्यन्ते मया शोधप्रबन्धाः। प्रतिप्रबन्धं पठित्वा प्रतिवेदनं तस्मै तस्मै विश्व- विद्यालयाय विसृज्यते। अनेकेषु शोधप्रबन्धेषु किमपि पठनीयं न भवति। तदा अपठित्वाऽपि प्रतिवेदनं निर्माय प्रेष्यते। यद्वायवार्थमहं यामि, असौ शोधप्रबन्धः पठनीयो नासीदिति तु न। विषय आकर्षकः, चिन्तनस्यापि प्रत्यग्रता तत्र क्वचित् प्रत्यभासत। आचार्यो विनय- शङ्करस्तन्निदेशक आसीदित्येव आश्चर्यकरम्। आचार्यविनय- शङ्करस्य तु न नवीनैरनुसन्धानविषयैः किमपि प्रयोजनम्।

नायक- नायिकादिभेदं कस्यचित् पुरातनप्रबन्धस्य सांस्कृतिकमनुशीलनं वेत्येतादृशं यं वा कं वा विषयमवलम्ब्यासौ शोधकार्यं कारयति। द्वित्रान् पृष्ठानवलोक्यैवावगतम् आसीन्मया यन्नास्ति शोधप्रबन्धेऽस्मिन् विनय-शङ्करस्य किञ्चिदप्यवदानम्। यदि शोधकर्त्री परिणीता स्यात् तर्हि शोधप्रबन्धस्तत्पतिना लिखितः स्यात्। अन्यथा केनचिद्विद्वत्तल्लजेन स्वकन्यायाः परिणयं विधातुमशक्नुवानेन तत्कृते विरच्य समर्पितः स्यात् प्रबन्धोऽयम्। यद्यपि शोधप्रबन्धलेखनस्यापणा अद्यत्वे सन्ति सर्वत्र समुद्घाटिताः, परन्तु ज्ञानपण्या वणिज एतादृशमुत्कृष्टं शोधप्रबन्धं पूरयेयुरिति न सम्भाव्यते। अस्तु तावत्। येन वा केनचिद्वा यस्याः कस्याः कृते यस्मै कस्मै हेतवे विरचितः स्यात् प्रबन्धः, तेन किं मे? अहं तावत् वायवां ग्रहीष्यामि। आम्रभक्षणेन मे प्रयोजनम्, न वृक्षगणनया। केवलं शोधप्रबन्धः उत्कृष्टः, अत एव पूर्वमेव सम्यक् पठनीय आसीत्। अतीतेषु चतुर्षु मासेषु मया प्रबन्धोऽयं पत्रालयद्वारेण प्राप्तः। अवकाशे लब्धे स्वैरं विश्रब्धं त समग्रं प्रबन्धं पठित्वा प्रतिवेदनं विरचय्य प्रेषयिष्यामीति धिया तदानीं द्वित्रान् पृष्ठानवलोक्य मयाऽयं पृथक् स्थापित आसीत्। एवमतीतास्त्रयो मासाः। अनन्तरं गणितविभागाध्यक्षः करुणेशमिश्र एकदा मत्सकाशमागतः, तस्य विश्वविद्यालयस्य यः कश्चन शोधप्रबन्धो मयि निहितस्तत्प्रतिवेदनं शीघ्रं प्रेषणीयमित्यसावनुरुणद्धि स्म माम्, यतो हि तस्मिन् विश्वविद्यालये ये सन्ति गणितविभागाध्यक्षास्तस्य परममित्राणि, ते दूरभाष्येण तं शब्दापितवन्तः। शोधकर्त्री कदाचित् तेषां दुहिता वा पुत्रवधूर्वा वर्तते। करुणेशमिश्रस्य मयि सन्ति केचन उपकाराः। 'न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय, प्राप्ते मित्रे भवति विमुखः' इति वचः संस्मृत्य मयापि स्थालीपुलाकन्यायेन प्रबन्धं परीक्ष्य अन्येद्युरेव प्रशस्तिपरकं प्रतिवेदनं विलिख्य पत्रालयद्वारेण तस्मै विश्वविद्यालयाय विसृष्टम्। यदि वायवार्थं स विश्वविद्यालयो मामेव आकारयति, तर्हि सम्यक् पठित्वा शोधप्रबन्धं परावर्तिष्ये इति कृत्वा तं शोधप्रबन्धं पुनः स्वकीय अध्ययनकक्ष एव स्थापितवान्। वायवार्थं निमन्त्रणमागतम्। तिथिरपि

वायवापरीक्षाया मया निर्धारिता। किन्तु शोधप्रबन्धं यथेष्टं मनोयोगेन पठितुं समयो नावाप्तः।

यात्रायामसौकर्यं किमपि नाजायत। रेलयानमपि समयेनैव मद्गन्तव्यं नगरं प्राप। अहं द्वितीयश्रेणिशायिकाया अवातरम्, परिच्छदं च हस्तेन समुत्तोलयन् अवस्थानकस्य निर्गमद्वारं प्रति असर्पम्।

निर्गमद्वारमुपेत्यापि न कश्चन परिचितो दृष्टः। विनयशङ्करस्य विभागीयाः सर्वे जनाः सन्ति मत्परिचिताः। न तेषु कोऽप्यदृश्यत।

– 'क्षम्यताम्। अपि श्रीमन्तः .....नगरात् समागताः?'

प्रश्नस्य लक्ष्यभूत आसमहमेव, परन्तु प्रश्नकर्तारं न परिचिनोमि। - आम्, तस्मादेव नगरादहमागतोऽस्मीत्यहमवोचम्, अददं च तस्मै स्वपरिचयम्।

श्रुत्वैव चासौ ससंरम्भम्, इत इतः श्रीमन्तः दीयतामेतन्मह्य'मिति सप्रश्रयं सनमोवाकं कथयन् परिच्छदं हस्तान्मे अगृह्णात्। अहं कश्चन नवनियुक्तोऽयं विनयशङ्करस्य विभागे स्यादिति मन्वानस्तम् अपृच्छम् - 'अपि भवान् विनयशङ्करमहोदयानां विभागे कार्यरतः?'

- 'नैव श्रीमन्!' स स्मितमुखः सविनयमवादीत्।

आवां बहिरागतौ। स किञ्चित् त्रिचक्रवाहनमाकारयिष्यति मां नेतुमित्यहमकलयम्, किन्तु तत्क्षणमेव कारवाहनमेकं पुरः समाययौ, तत्पृष्ठद्वारमुद्घाट्यासौ सादरं प्रोवाच - 'आस्यताम् श्रीमद्भिः।' अस्मिन् वारे मत्स्वागतस्य विशिष्ट एव प्रबन्धोऽकारि विनयशङ्करे- णेति तुष्टोऽहं कारयान उपाविशम्, मत्प्रत्युद्गन्तापि पार्श्व उपविशेदिति धिया स्थानं च परत अपसृत्य अरक्षम्। किन्तु स मत्परिच्छदं यानस्य परिच्छदपीठे निधायाग्रस्थिते वाहनचालकपार्श्ववर्तिन्यासन एव न्यषीदत्। अहमाश्वस्तः शिर आसनपीठेन संयोज्य सुखमुपाविशम्। आसीच्च मे मनसि- 'विनयशङ्करेण स्वयंसेवकोऽयं प्रेषितः, कारयानेन च मे गमनागमनव्यवस्था कारितेति सौकर्यं समजनि, अतथात्वे अहं त्रिचक्रवाहनमादाय विश्वविद्यालयातिथिगृहमप्राप्स्यम्, अतिथिगृहे च यथापूर्वं मत्कृते कक्षस्योद्घाटनाय भृत्यमप्राप्य व्यर्थं कदर्थितोऽभविष्यम्।

BYBSSMV

कारयानस्य गतिर्मन्दायमाना। शनैश्च विशति स्म कारयान-मुत्तुङ्गतोरणद्वार- मतिक्रम्य कञ्चित् परिसरम्। अहं विस्मितः। अयं तु नास्ति विश्वविद्यालपरिसरः, न चास्ति पुरतो मे तत्रत्यमतिथिगृहमपि।

यावत् किञ्चिदनुयुनज्मि सहागतं प्रत्युद्गन्तारं, तावदसौ वाहनादवतीर्य पृष्ठवर्तिनं द्वारमुद्घाट्य सूनृतं जगाद - 'आयान्तु महोदयाः।' इति।

अहं कारयानाद् बहिरागतः। स्थानं तु परिचितमिव प्रतिभाति। अतीतेषु वर्षेषु साहित्याकादेमीति संस्थया समायोजितायां सङ्गोष्ठ्या- मत्रैव अन्यैर्विद्वद्भिः सह मम आवासव्यवस्था आसीत्। उपरिसौधं 'पार्कव्यू होटल' इति विशदाक्षरा लिपिः सुवाच्या।

अस्यां यात्रायां विनयशङ्करः कथं 'वी.आइ.पी.'- व्यवहारेण मां सत्करोतीति विस्मित इव, पुरतः स्फुरता स्थानस्य तस्य वैभवेन विभावित इव चाकचक्येन चमत्कृत इव, निर्धारितं स्वकक्षमहमविशम्।

- 'भवद्भिः सह परिचयो नैव जातः।' - सहागतं युवानमहमपृच्छम्।

- 'श्रीमन्, भौतिकशास्त्रविभागेऽयं जनो राजेन्द्रशर्माभिधानो व्याख्यातृ-पदमलङ्कुरुते अत्रैव एकस्मिन् महाविद्यालये।'

– 'भौतिकशास्त्रविभागे!' इति सविस्मयमाम्रेडितं मया। स किञ्चिद् वक्तुकाम इवालक्ष्यत। तदानीमेव प्रतीक्षको मत्परिच्छद- मानिनाय। - 'श्रीमतां कृते चायमाज्ञापयामि, काफीं वा?' - राजेन्द्रशर्मा मामपृच्छत्।

- 'चायमेव ग्रहीष्यामि।' - इत्यन्यमनस्क इवोक्त्वा 'कोऽयं कुतस्त्योऽयं, किमर्थं मां सेवते, विनयशङ्करेण कश्चास्य सम्बन्ध इति विकल्पकल्पना-कवलितस्वान्तो नितान्तं भ्रान्त इव क्षणमतिष्ठम्।

'विनयशङ्करमहोदयमहम् अत्रैवानेष्यामि।'-राजेन्द्रो निजगाद 'यावच्छ्रीमन्तः परिपीतचायपेया निर्वर्तितस्नानाह्निका इह विश्रामं लभन्ताम्।'

'एवं भवतु राजेन्द्रवर्य!'- इति स्मयमानोहं तमवदम्।

-'आम् श्रीमन्!' -हर्षनिर्भर इवासौ साञ्जलिराह, सस्मित- वदनो मामवलोकयंश्च विनिर्गतः।

होरानन्तरं विनयशङ्करवर्यः समेयाय।

-'स्वागतं स्वागतं भवताम्!'- इति कक्षं प्रविशन्नसौ मामवलोक्योवाच।

नाम्नः प्रतिकूलं विनयस्य शमस्य चाभावो विनयशङ्करे वर्तते इति यदा यदा तेनाहं मिलितः पूर्वं तदा तदैतदनुभूतम्। परन्तु सम्प्रत्यसौ दरस्खलद्गात्रो मन्द्रवचनश्च प्रत्यभात्।

-'कुशलिनः श्रीमन्तः? किञ्चिद् दुर्बला दृश्यन्ते भवन्तः!'- अहमूचिवान्।

–नैवम्- मैवम्- साधु विद्यत एव सर्वम्- इति यत्किञ्चित् कथयतस्तस्य दृष्टि- परिधौ पश्चात् कक्षे प्रविष्टो राजेन्द्रः सहसा निपपात। तमवलोक्यैव दृप्तेन कठोर कर्कशेन स्वरेणासौ बभाण-'बन्धो राजेन्द्र, द्राक्तरमहोदया अत्र किमपि कष्टं नानुभवन्त्विति द्रष्टव्यम्।'

राजेन्द्रोऽपि तत्स्वरेण प्रकम्पित इव आनतशिराः प्रोवाच - 'एवं सर! एवं सर!' - इति।

– 'राजेन्द्रेण भवतः परिचयः समजनि वा न वा?- अनन्तरं पुनः कोमलया गिरा मामपृच्छद् विनयशङ्करः।

'आम्- जात एव परिचयः' - अहमनिश्चयेनावोचम्–'अयं कस्मिंश्चिन्महाविद्यालये भौतिकशास्त्रविभागे प्राध्यापकः।'

'न केवलमेतदेव। अयं निर्मलायाः पतिर्विद्यते।'- विनयशङ्कर उवाच।

- निर्मला!- मम मानसे काचन अस्पष्टा स्मृतिस्तरङ्गायिता।

- निर्मलां न स्मरति भवान्? - ऊहापोहनिमग्नं मामवलोक्य विनयशङ्करः दरस्मेराननोऽपृच्छत्।

- सम्यङ् न स्मरामि।

– अरे, सैव निर्मला यस्या वायवाग्रहणार्थं भवानागतः।

—अच्छा! सा..इदानीं स्मरामि!- विहसता मयोक्तम्, राजेन्द्रश्च सञ्जातनूतनपरिचय इव पुनर्विलोकितः।

- 'अरे इमे धुरन्धरा विद्वांसः। अखिलेऽपि भारते भ्रमन्ति। विदेशेष्वपि गच्छन्ति। एते किमपि क्लेशं नानुभवेयुः- अवगतं न वा?' पुनरपि मां

सङ्केतयन् वचोभिः कशाभि- स्ताडयन्निव राजेन्द्रं भर्त्सनागर्भितेन स्वरेण स्मारयति स्म विनयशङ्करवर्यः।

-चायपेयमाज्ञापयामि सर?'- इत्येवातितरां विनयान्वितेन स्वरेण राजेन्द्रोऽपृच्छत्।

– सद्य एव पीतं चायम्, आस्तां तावत्।' अहमवदम्।

– 'अरे अरे चायस्य का कथा? - आह - प्रातराशमेव ग्रहीष्यामः। इदानीं किञ्चित् सहजतां गतो विनययशङ्करोऽवदत्, परन्तु राजेन्द्रस्य कृते तस्य स्वरे सैव परुषता- 'अरे अरे किं तिष्ठति भवान्, आज्ञाप्यताम्, किञ्चिन् मिष्टान्नम्....

प्रातराशमादिश्य 'होरार्धेन विश्वविद्यालये सर्वं सज्जयित्वा प्रत्यावर्तिष्य' इत्युक्त्वा राजेन्द्रो निर्जगाम।

-बहोः कालात् सम्पर्को न जातः। गृहे परिवारे सर्वं कुशलं तु वर्तते?- गते तस्मिन्नहं विनयशङ्करेण सह किमप्यालपनीयम् इति धिया तम् अपृच्छम्।

- कुशलमेव वर्तते। एतावता कालेनाहं गार्हस्थ्यप्रपञ्चानां निर्वाहे प्रसक्त, आसम्। स्वकीयं भवनं निर्मापितम्। ज्येष्ठः पुत्रः प्रशिक्षणं समाप्याभियन्ता जातः। कनिष्ठ आयुर्विज्ञानमहाविद्यालये प्रशिक्षणं प्राप्नोति। कन्याया विवाहो व्यधायि। इदानीं मम आत्मा विशदो जातः।'

इति कथयतस्तस्य स्वरं सहसैव कटुता विवेश। -'विश्वविद्यालये किं वर्तते?' - स वक्तुमारेभे - 'नैव किमपि! किमर्थं शोधनिर्देशकः स्याम्? शोधार्थं प्रायशो महिला एव समायान्ति। इमा महिलाः! किमर्थं शोधार्थमायान्तीमाः? किमर्थं गृह एव न तिष्ठन्ति? मम तु ध्रुवं मतं यन्न महिलाः गृहाद् बहिर्गच्छेयुः कदापि। ननु पश्यतु भवानिमां निर्मलामेव तावत्। अस्याः श्वसुरो विश्वविद्यालये आचार्यपदमलङ्करोति। तदनुरोधादियं स्वनिर्देशे शोधार्थं स्वीकृता मया। अन्यथा को जानाति – कीदृशमनुसन्धानम्– केन कृतं केन कारितम्– किमपि न ज्ञायते कीदृशमनया लिखितं वा लेखापितं वा! वस्तुतो बन्धुवर्याः! एकामपि पङ्क्तिमस्याः निर्मलायाः शोधप्रबन्धस्याहं

न पठितवान्! भवन्त इयन्तः सज्जनाः, तत्कालं भवद्भिः शोधप्रबन्धस्य प्रतिवेदनं प्रेषितम्, वायवार्थं तिथिरपि सद्यो दत्ता, मया तु सङ्केतितमासीदेव यन्नास्ति त्वरा...'

अहं किञ्चिच्चकित इव विनयशङ्करमवलोकयामि। सत्यम्, यदा दूरभाष्येण वायवातिथिविषये तमहमालपितवान्, तदा तेनोक्तमासीन्नास्ति काऽपि त्वरा, तदानीं तस्य सङ्केतमनवबुध्यमानेन मयैव करुणेशमिश्राणामाग्रहं मानयित्वा नेदीयसी तिथिरियं निर्धारिता। परन्तु किमर्थमेतत् सर्वमिदानीं कथयति विनयशङ्करः, किमर्थं च दीर्घदीर्घां कथां करोति मत्समक्षम्? यावदसौ खरतरकटुकतरस्वरेण पुनरपि प्रारभत प्रस्तारम् - 'विवाहः सञ्जातः। यावदनूढा आसीत्, तावत्तु अवगम्यते स्म यद् यदि विदधाति शोधकार्यं विदधातु, किमन्यत् कुरुतां वराकी? ऊढायाः कीदृशः शोधः– उच्यतां तावत्! ऊढायाः कृते तु पतिसेवैव शोधः। अनया तु एतादृशं शोधकार्यं कृतं यदस्याः पतिः - अयमेव राजेन्द्रः - मया अदृष्टपूर्वस्य अस्यैव शोध- प्रबन्धस्य चतस्रष्टङ्किता मातृका मत्पुरतः संस्थाप्य लगुडहस्तैः पञ्चभिः मल्लैः परिवार्य मां साधिक्षेपं 'करोति भवान् अग्रेषणायास्य प्रबन्धस्य हस्ताक्षरं वा नवे'ति साकूतं भाययन् कर्षाकर्षि कुर्वन् बलान्मे हस्ताक्षरं जग्राह।

– 'अरे, अरे!'– सर्वमिदमतिविस्मयकरं निरुपमेयं निशम्य वृत्तमहं सखेदमवादिषम्।

विनयशङ्करवर्यः क्षणं जोषमास। अनन्तरमत्यन्तं क्षीणस्वरेण जगाद- - 'यद्वा तद्वा भवतु। अस्माकं किमनेन छिद्यते? अतो मया अयं राजेन्द्रस्तस्या निर्मलायाः पतिः कठोरेण भूत्वा उक्तः यद् भवाने- तावत्कष्टं सहमान इह आयाति, सम्यक् व्यवस्था कार्या भवतामावासादिकस्य, अरे उभौ दम्पती अर्जनं कुरुतः श्वसुरौ... तर्हि किमर्थं न व्ययः कार्य एतयोरेतदर्थम्, उच्यताम्!'

इयमपि नवीनैव वार्ता मत्कृत आसीत्। एवं तर्हि... मत्कृते आवासव्यवस्था एतादृशी वैभवमयी या जाता, तस्या व्ययो देयः स्यात् शोधकर्त्र्या तत्पतिना वा! एतत्तु मत्कृते लज्जाकरम्।

– यद् भवतु तद् भवतु। वायवास्तु निर्वर्तनीय एव। - विनयशङ्करो वक्ति स्म।

'भइ-वाह इति वक्तव्यम्।' - तस्य गुरुतरविषादखिन्नं मनो मनाग् रञ्जयितु-महमवोचम् -'श्रुतं भवद्भिः? पण्डितविद्यानिवासमिश्र- महोदयाः सविनोदं 'भइ-वाह' इति पदं व्यवहरन्ति अस्य कृते!'- इत्युक्त्वा अहमहसम्।

अट्टहासस्य तु कथैव दूरमास्तां स्मितस्य रेखापि विनय- शङ्करस्याधरं चोष्ठं चान्तरा नोदियाय। किं तावत् करोमि, वायवावेला निकषायते, अयं तावत् विषण्णायते, मनो मे वायवार्थं निषण्णायते इति सर्वं विचिन्त्य हजारीप्रसादद्विवेदविषयकं वायवाप्रसङ्गं विनयशङ्करं श्रावयित्वा कालक्षेपं करोमीत्यहं मनसि कलयामि स्म।

स प्रसङ्गः केनचिन्मे प्राध्यापकमित्रेण परिहासगोष्ठ्यां श्रावितः, भूतार्थस्तत्र वर्तते वा न वेति न जाने। प्रसङ्गस्तु इत्थम् - एकदा आचार्यो हजारीप्रसादो द्विवेदी कदाचित् कञ्चित् विश्वविद्यालयं यातो वायवार्थम्। वायवा अवर्तत कस्याश्चन कन्यकायाः। शोधार्थिनी तु पूर्वमेव आचार्यवर्यस्य महिमानं पाण्डित्यं चाधिकृत्य कीर्तिकथां श्रावं श्रावम् आसीदातङ्कितेव, भयविगलितेव, लज्जया ग्लपितेव। अथोपक्रान्ते वायवानुष्ठाने आदा- वेवाचार्यो गम्भीरेण मर्मस्पृशा केनापि प्रश्नेनोट्टङ्कयामास ताम्। अनुसन्धात्री प्रथमं चकिता, अनन्तरं स्तब्धा, किमपि वक्तुकामेवासीत्, परन्तु कृतेऽपि प्रयत्ने तस्या मुखान्न एकोऽपि शब्दो निस्ससार, ततश्च सा सवाष्पफूत्कारं रोदितुमारेभे। एतदवलोक्य चकित इव क्लिष्ट इव कथञ्चित् तामाश्वासयन्निव आचार्य आह - 'भवतु भवतु वत्से, अलं रुदितेन। नाहमिदानीं तव शोधप्रबन्धमधिकृत्य कमपि प्रश्नं करिष्ये। एतदेव पृच्छामि- यदि चायपेयं मत्कृते साधनीयं स्यात् तर्हि कथं साधयिष्यतीति वद।' इत्थं प्रोत्साहिता सा शोधकर्त्री चायपेयनिर्माणविधिं विशदीकर्तुमुपाक्रमत - 'प्रथमं जलं क्वथनाय चुल्ल्या उपरि निधास्यामि, अनन्तरं चायपत्राणि तत्र निपात्य दुग्धं शर्करां च मिश्रयित्वा चालन्या पावयित्वा दास्यामि श्रीमद्भ्यः' इति। श्रुत्वैतदाचार्यः सविनोदं तामधिचिक्षेप

- 'अरे, अरे कियतीं शर्करां भवतां कृते निदधानीति न प्रक्ष्यसि किम्- एतत्तु प्रष्टव्यं भवति कतिचमसपरिमिता शर्करा?' इति। श्रुत्वैतद् झञ्झाहता बालकदलीव भयप्रकम्पिता, सर्वमाकुलं विपर्यस्तं च जातमिति विह्वलेव, अनुसन्धानस्य महानायासो धूलिसाज्जात इति ग्लपितेव, चायनिर्माणविधिज्ञापनेऽपि स्खलनं जातमिति स्त्रीत्वमेव मे प्रश्नचिह्नितमित्यपमानितेव शोधकर्त्री भूयो रुरोद। आचार्यः पुनरपि तां समाश्वास्य विरते तस्या रोदने प्राह '- भवतु, भवतु। इदानीमतिशयेन सरलं प्रश्नं करोमि। मदर्थं सूपो निर्मातव्यः, तं कथं साधयिष्यसीति वद।' अन्तिमोऽयमवसरः स्वयोग्यताप्रदर्शनस्येति सर्वथा सन्नद्धा अवहिता कन्या अवदत् - 'प्रथमं क्वथनाय चुल्ल्या उपरि जलं निधास्यामि, तदनु द्विदलं घृतं च तत्र निधास्यामि, अनन्तरं संस्कारः स्यात्, अथ यदा लवणस्तस्मिन् क्षेप्तव्यस्तदा श्रीमन्तं प्रक्ष्यामि- 'कति चमसपरिमितं लवणं गृह्णाति भवानिति!' श्रुत्वैतदुच्चैर्हसन्नाचार्योऽवादीत्– 'साधु, साधु! इदानीं पी-एच्.डी. पदव्यै सर्वथा अर्हासि सञ्जाता!'

विनयशङ्करस्तथा गाम्भीर्यसागरनिमग्न इव, विरक्त इव प्रतीयाय, यदेतादृशमति- क्षुद्रप्रहसनात्मकं वृत्तं तदानीं तस्य पुरो निवेदयितुं नोदसहत चेतः।

- मम तावत् सेवानिवृत्तिर्निकषा वर्तते- अन्तिममिदं वायवा- प्रकरणं वर्तते मन्निर्देशे– स वक्ति स्म - वायवा वा भइवाह इति वा यत्किमपि भवतोच्येत -

- 'वाह-वाह' इत्यपि व्यपदिशन्ति केचन शोधशूराः – मया सविनोदमुक्तम् - वस्तुतोऽस्मद् विश्वविद्यालये कयाचन शोधछात्र्या स्वकीये आवेदने इयमेव वर्तनी प्रायोजि। कुलपतये सा उपालम्भपत्रं विलिख्य दत्तवती यन्मत्कृते 'वाह-वाह'समायोजने विलम्बो विधीयत इति।

इदानीं काचन म्रियमाणेव स्मितरेखोदियाय विनयशङ्करस्याधरोष्ठयोरन्तराले। सद्यश्च सङ्कोचयन्नधरोष्ठमसौ कूणितवदनोऽवदत् - 'इमाश्छात्र्यः! इमाः कन्याः! किमिमा विदन्ति!' इति।

प्रातराश एवमेव विहित आवाभ्याम्। –'मध्याह्नभोजनं मद्गृहे कार्यम्'- विनय- शङ्करो वक्ति स्म। न जाने कस्मात् प्रथमबारं मया अनुत्साहोऽनुभूत-स्तदीयनिमन्त्रणस्वीकारे। अन्यथा कतिवारं न भुक्तं सानन्दं तदीये गृहे विहिताश्च वार्ताः भ्रातृजायया सह।

अस्मिन्नेव क्षणे राजेन्द्रः समाययौ। - अपि साधयामः? - प्रविष्टमात्र एवासौ पप्रच्छ।

- सर्वं तत्र व्यवस्थापितम्? पञ्जिकाः निस्सारिताः? शोधप्रकोष्ठस्य बाबूः वर्तते? यात्राव्ययप्रतिभुक्तिशाखायामुक्तम्? - प्रश्नासारैस्तुदन्निव विनयशङ्करस्तमतर्जयत् - 'मया प्रागेवोक्तमासीत्– स्मर्यते वा न वा? अयं महाविद्वान् सज्जनो यात्राकष्टमपारं साहं साहमिहायातः। अस्य सम्माने सत्कारे वा कापि त्रुटिर्मा भूत्। अवगच्छति भवान् न वा?'

-एवं 'सर'!'- इत्येव केवलं सविनयमवदत् राजेन्द्रः।

- 'न कापि चिन्ता विधेया' — अवसन्नमिव राजेन्द्रमवलोक्याहमवदम्।

स तथा साधुः प्रतीयाय यदसौ लगुडहस्तैः पञ्चभिः मल्लैः परिवार्य विनयशङ्करं साकूतं भाययन् कर्षाकर्षि कुर्वन् बलात् तस्य हस्ताक्षरं जग्राह इति न विश्वसिति स्म मनो मे।

इतस्तु विनयशङ्करः सर्वथा सन्नद्ध आसीत् प्रश्नाक्षेपशर- प्रहारजर्जरं तं विधातुम्। 'एतादृशस्य विदुषः पण्डितस्य सत्कारादतिरिक्तं किमस्माभिः कर्तुं शक्यते - तेन यत्कष्टं सोढं तस्य कि प्रतिदेयं स्यात्? अवगतं न वा? - स पुनरपि राजेन्द्रम् अनुदत्।

अथ मया सह कारस्य पृष्ठवर्तिनि आसन उपविष्टो विनय- शङ्करवर्यो मनाग् विशदचित्त इव जातः। राजेन्द्रेणानीतं ताम्बूलं सतमाखु तेन गृहीतमासीत्। ताम्बूलभृत- गल्लत्वात् तमाखुरसस्य बहिः स्रावो माभूदिति अविशदाक्षरम् ऊर्ध्वमुखं स वचनारचनावलीं वितनोति स्म - 'पश्यतु भवानिमं राजेन्द्रभ्रातृवर्यम्! स्वीयं तु शोध- कार्यं न पूरितं श्वशुरेण, परन्तु स्वधर्मपत्नी त्ववश्यं पी-एच्.डी- पदवीं लम्भिता। पतिः स्यात् तर्हि एतादृशः स्यात्!'

विश्वविद्यालयकार्यालयं वयं प्राप्ताः। समितिकक्ष उपविश्य मया यात्रादेयकं पूरितम्। विनयशङ्करः पुना राजेन्द्रं प्रतिभुक्त्यर्थं नुदति स्म। राजेन्द्रो यात्रादेयकमादाय कक्षात् विनिर्गतः। तदानीमेव शोधकर्त्री निःशब्दमिव प्रविश्य अभिवादनं विधाय मत्पुर उपविष्टा।

वायवापञ्जिका मत्पुरः स्थापिता आसीत्। तामुद्घाट्या- परपरीक्षकस्य प्रतिवेदन महमपठम्। शोधप्रबन्धस्तेनापि आद्यन्तम- पठित्वैव प्रतिवेदनं विरचितमिति सुकरमासीदनु- मातुम्।

- अपि प्रारभावहे? अहमनुज्ञार्थमपृच्छं विनयशङ्करम्।

- प्रारभ्यताम्, प्रारभ्यताम् – निरुह्यताम् – किमन्यत् क्रियेत? - इत्युपेक्षां माध्यस्थ्यं च प्रकटीकुर्वन्नसौ निरुत्सुकोऽवादीत्।

वायवाव्यापार कथञ्चिन्निरुह्य एव भवीति किमहं न जानामि?

इदानीं पुरोवर्तिनीं शोधकर्त्रीं प्रति व्यापारितं मया चक्षुः। आत्मानं विनयशङ्करेण वार्तालापे पञ्जिकादिविलोकने व्यापृतमिव प्रदर्शयन्नहमिदानीं यावत्तामुपेक्षमाण इवासम्। वायवापरीक्षार्थिनी त्वेवमेवोपेक्षणीयैव भवति, का कथा आदरस्य!

साऽपि अभिवाद्य मां निःस्पृहमिव जोषमुपविष्टा आसीत्। मुखं रक्ताभम्, वायवा- भयेन वा सहजसौन्दर्येण वेति न वेद्मि, ललाटे शोभते स्म तिलकबिन्दुः, सीमन्ते च सिन्दूरम्। सत्यमुक्तमासीद् विनय- शङ्करेण, इयं कुलवधूर्वर्तते, किमर्थं शोधपङ्के गौरिव सीदति?

- भवतु – हुङ्कारपुरस्सरं गलनलिकां परिष्कृत्य क्षणार्धं तां निभाल्याहमपृच्छम् - 'समकालिकबोधेन भवत्याः क आशय इति प्रतिपाद्यताम्।'

सा शनैर्वक्तुमुपाक्रमत। मदीयमौदासीन्यं शनैः शनैः कौतूहले परिणतम्। अनन्तरमहं तां निर्निमेषनयनाभ्यामवलोकयन् स्थितः। ततश्चाहमवाङ्मुख आसम्, साऽधिगतात्मविश्वासा समुन्नत- मुखी। समकालिकतामाश्रित्य साहित्ये परम्परामितिहासं चान्तरा विद्य- मानमन्तःसम्बन्धं सा विवेचयति स्म। इलियट्कवेः सटीकमुद्धरणं तया दत्तम्। अनन्तरं सूसनलैङ्गरमहोदयाया मतं स्फोरितवती।

अरे, इयं तावत् विषयमवगच्छति, नोपेक्षणीया नावमन्तव्या। समकालिकबोधमधिकृत्य मया विरचितं पुस्तकद्वयमपि तया सूक्ष्मेक्षिकया पठितचरमासीदिति विज्ञायाहं क्षणं स्तब्ध इव, रोमाञ्चकीलित इव, किमर्थं नाद्यन्तमस्याः शोधप्रबन्धमहं पठितवानिति जातानुताप इव अथ चानन्देन हर्षनिर्भर इवातिष्ठम्।

शनैर्वाङ् मे न्यवर्तत। तया सह विवादाय सन्नद्धोऽभवम्। प्रश्नानां शङ्कानां च जालं विस्तारितवान्। मध्ये मध्ये समक्षं निहितं तस्याः शोधप्रबन्धमपि उद्घाट्य यत्र तत्र दृष्टिपातमकरवम्। सा मत्कृतं प्रत्येकं व्यूहमुच्छिनत्ति स्म।

अस्मिन् हतभाग्ये जीवने विवशतया वायवासदृशानि कियन्ति नैमित्तिककर्माणि सम्पाद्यन्ते मया। येषां केषाञ्चन डॉक्टर-पदवी- प्राप्तुकामानां समुद्धारायाहं कतिवारं वायवापङ्के पतितः। किन्तु इदम्प्रथमतयाऽनुभूतवानस्मि 'वायवा'-रसम्।

विनयशङ्करवर्यः शून्ये निमग्नः शून्यं निध्यायन्निव आस। मया रीतिकालिककवीनाश्रित्य प्रश्न उपस्थापितः। अहमचिन्तयम्- अयं तस्य विषयः, सोऽपि किमपि वदिष्यति। परन्तु मन्ये स वायवा- व्यापारात् सर्वथा विरक्त एव स्थितः। शोधकर्त्री निर्मला घनानन्दस्य छन्दः साधु प्रस्तौति स्म।
- 'भवतु, भवतु'- इदानीं विनयशङ्करो मामाह- 'किमर्थं भवानेतावता गाम्भीर्येण निष्पादयति वायवाम्। इयं तावदौपचारिकतैव। समाप्यताम्।'

तस्याः शोधप्रबन्धस्य पृष्ठान् परावर्तयमानोऽहं द्वित्राः शङ्काः पुनरुपास्थापयम्। पुनरपि विनयशङ्करः कथयति स्म- भवतु, भवतु, प्रतिवेदनं लिख्यताम्। समाप्तिमेतु 'भइ-वाह'-प्रपञ्चोऽयम्।

सा विनयशङ्करमनवधाय मामेवोद्दिश्य यथाशक्ति प्रतिपादनं कुरुते स्म- क्वचित् वाक् स्खलति, पुनराश्वस्तेव परामृशति। मया कानिचिन्नवीनपुस्तकानि शोधप्रबन्धस्य सन्दर्भसूच्यामनुल्लिखितानि तस्यै सूचितानि। अनन्तरं पञ्जिकां निकषा सारयित्वा प्रतिवेदनं लिखितुमारब्धवान्।

- द्वित्राणि वाक्यान्येवालम्! किमिति विस्तरेण?' - दीर्घं प्रतिवेदनं

लेखितुं प्रवृत्तं मां दृष्ट्वा विनयशङ्कर आह।

मया शोधप्रबन्धो भूरिशः प्रतिवेदने प्रशंसितः प्रकाशनार्हश्च ख्यापितः। सर्वथा उपाधिप्रदानयोग्या शोधार्थिनीति लिखित्वा स्वहस्ताक्षराणि विधाय पञ्जिका विनयशङ्करस्य पुरः सारिता।

शोधप्रबन्धस्यैतावती प्रशंसा कदाचित् तस्मै नारोचत। कथञ्चिदेवासौ तदन्ते हस्ताक्षरं व्यधत्तेति प्रतिभाति स्म। अनन्तरमुत्तिष्ठन्नाह - 'कुलपतिना आलप्य आगमिष्यामि। भवानिह तिष्ठतु।'

गते तस्मिन् मिष्टान्नपूरितशरावहस्तेन भृत्येनानुगतो राजेन्द्रः पुनः प्रविवेश।

– 'अरे क्व गताः निर्देशकमहोदयाः?' - विनयशङ्कर- स्यासनं शून्यमवलोक्यासौ पृष्टवान्।

– कुलपतिना आलपितुं गताः। - शोधकर्त्री निर्मला प्राह।

- प्रतिवेदनपञ्जिकां तु नैव नीतवन्तस्ते? - स चिन्तातुरः पुनरपृच्छत्, मत्सम्मुखं पञ्जिकां दृष्ट्वा सोच्छ्वासमाह– 'दिष्ट्या पञ्जिका अत्रैव तिष्ठति।' पुनश्च पत्नीं निर्मलामाह - 'पञ्जिकां प्रत्यवधानं देयम्। पञ्जिका विलुप्ता भवन्ति। अहं श्रीवास्तव- मानयामि।'

गते तस्मिन् शोधकर्त्री निर्मला मिष्टान्नादिप्रपूरितं शरावमेकं मत्सम्मुखं स्थापयित्वा सविनयं जगाद - 'गृह्यतां सर!'

अहं बिसकूटखण्डमेकं कवलयन् यत्किमप्यालपितुं तामपृच्छम्- 'इदानीं किं क्रियते भवत्या?'

- इदानीं तु एकस्मिन् विद्यालये शिक्षिका अस्मि। वस्तुतो विश्वविद्यालये व्याख्यातुः पदाय आवेदनं दत्तमासीन्मया। तस्मादेव कारणात् आचार्य- विनयशङ्करमहोदया रुष्टाः सञ्जाताः।

- 'ते रुष्टाः? किमर्थम्?' सविस्मयं मया पृष्टम्।

तेषां कश्चन श्यालो वर्तते। तस्यैव नियुक्तिं तेऽभिलषन्ति स्म। मम तावत् सर्वत्र प्रथमश्रेण्यां सर्वप्रथमं स्थानं वर्तते, श्यालस्य तु द्वितीया तृतीया वा श्रेणी। साक्षात्कारे मय्युपस्थितायां तस्य नियुक्तिः कथं स्यात्। अतो

विनयशङ्करवर्यो मम श्वशुरमनुरुणद्धि स्म- भवान् निर्मलां कथयतु सा साक्षात्कारे उपस्थिता न स्यात्।

- अरे , अरे- मम मुखान्निःसृतम्।

- अहं तेषामनुरोधमुपेक्ष्य साक्षात्कारे गता। नियुक्तिस्तु कस्यापि न जाता। इमे महोदया ततः प्रभृति मह्यं भृशं कुपिताः। अहं शोधप्रबन्धस्य यं यमध्यायं लिखित्वा लिखित्वा एभ्यो ददामि, स सोऽध्याय एतेषां सकाशाद् विलुप्तो भवति। कदा दत्तः, दत्त एव न स्यादिति इतस्तत एते कुर्वन्ति। अहमपि एतेषां ईदृशीं प्रवृत्तिं पूर्वत एव विज्ञाय सावधाना। प्रत्येकमध्यायस्य प्रतिलिपिं निर्माय रक्षामि। एवमेव मम पञ्जीकरणतिथेश्चत्वारो वर्षाः समाप्तिं यान्ति स्म। अतीतेषु चतुर्षु वर्षेषु पञ्जीकरणं निरस्यते। मया एभिरपरीक्षिता एव सर्वे अध्यायाः टङ्कापिताः।

विनयशङ्करविषये सर्वमिदं वृत्तं मत्कृत आसीदकल्पनीयम्।।

तदानीमेव राजेन्द्रः श्रीवास्तवबाबुना सार्धं पुनः प्रविवेश। - भ्रातः श्रीवास्तव, इयं पञ्जिका रक्षणीया। आचार्यप्रवरा कुलपति- मालपितुं गताः। अन्तिमं क्षणं यावत् ते अस्मिन् प्रकरणे विघ्नं करिष्यन्त्येव। - स सानुरोधं बाबूमाह।

श्रीवास्तवः पञ्जिकामुद्घाट्य प्रतिवेदनस्यान्तिमं वाक्यं पठित्वा प्राह- ‘इदानीं ब्रह्माऽपि निर्मलादेव्याः पी-एच्.डी.पदवीप्राप्तिं निरोद्धुं न प्रभवेत्। - इत्युक्त्वा पञ्जिकामादायासौ निर्गतः।

अथ राजेन्द्रो मामपृच्छत् - भवतां यात्राव्ययप्रतिभुक्तिं कर्तुं कोऽपि बाबुरागतो वा न वा?

- नहि। न कोऽप्यागतः। - मयोक्तम्।

अहं मनाक् व्यग्रः सञ्जातः। विनयशङ्करवर्यः निरपेक्षो निराशो वा भूत्वा गतः। अनयोः निर्मलाराजेन्द्रयोः कार्यं सिद्धम्। इदानीं यात्राव्ययस्य प्रतिभुक्तिं प्राप्तुमहं न किमपि कर्तुं शक्नोमि। विश्वविद्यालयेषु यात्राव्ययप्रतिभुक्तौ यथा बाधाः भवन्ति अहं सम्यक् ता अनुभूतवानस्मि पूर्वम्।

परन्तु राजेन्द्रो विनिर्गत्य प्रतिभुक्तिशाखाया बाबुना सह पुनरागतः,

यात्राव्ययराशिश्च तेन मत्करेऽर्पितः।

अहं प्रसन्नः। यात्राफलमवाप्तम्। उभौ दम्पती आशीर्वचोभिर्वर्धयन्नहमुक्तवान्- 'भवतु डॉक्टरराजेन्द्र, डॉक्टरनिर्मला च! भूयो भूयो भवतोः कृते वर्धापनानि!'

अहं तु पी-एच्.डी.पदवीविहीनोऽस्मि श्रीमन्! इमामेव स्वशिष्यां भवन्तो वर्धयन्तु। - राजेन्द्रो विहसन्नाह।

– एते महाविद्यालये प्राध्यापकाः सन्ति सप्तवर्षेभ्यः। इदानीं यावत् स्वशोधप्रबन्धं पूरयितुमपि न प्राभवन्- सस्नेहं सोपालम्भं च निर्वर्णयन्ती स्वपतिं निर्मला अवादीत् - इतस्ततो भ्रमणात् राजनीतेर्वाऽवकाशो लभ्येत तदा तु शोधकार्यं पूर्येत। अतीतेषु चतुर्षु वर्षेषु पञ्जीकरणानन्तरं पुनः पञ्जीकरणं कारितम्।

'देवि, भौतिकशास्त्रे शोधकार्यसम्पादनं न तथा सरलं यथा भवतीनां विषये। अपरं च यदा भवत्याः शोधप्रबन्धमग्रे सारयितुं विनयशङ्करवर्या हस्ताक्षरं न कुर्वन्ति स्म तदा बलिष्ठैर्याष्टिकैः सह गत्वा तस्य हस्ताक्षरमादाय भवत्याः शोधप्रबन्धस्य उद्धारः केन कृतः?'- राजेन्द्रस्तीव्रस्वरेणोवाच।

निर्मला जहास। - 'सर, यद्येतेषां विषयो हिन्दीसाहित्यम्, आङ्गलसाहित्यं संस्कृतसाहित्यं वाऽभविष्यत् तर्हि समग्रं शोधप्रबन्ध- मेतेषां लिखित्वा अहमदास्यम्। परन्तु भौतिकशास्त्रं तु नाहं पठितवती।' सा मामाह।

तदानीमेव कश्चन भृत्यः समेत्य राजेन्द्रं मां च निर्वर्ण्य प्राह - आचार्या विनयशङ्करवर्या अस्वस्था जाता इति ते गृहं गताः। मध्याह्नभोजनस्य यन्निमन्त्रणं तैरतिथिमहोदयेभ्यो दत्तं तत्कृतेऽपि ते क्षमां याचन्ते।

- भवतु, होटलं गत्वा भोजनं करिष्यामि। - मयोक्तम्।

- न, न! - निर्मला साग्रहमाह - श्रीमन्तो भोजनाय अस्मद्गृहं समायान्तु। रूक्षं वा शुष्कं वा यत्किमपि अहं साधयामि, तद् गृह्णन्तु।

- एवं भवतु तर्हि। - इति कथयित्वाहं ताभ्यां सह विश्वविद्यालयकार्यालयाद् विनिर्गतः।

—000—

परावर्तनम्

दिल्लीतः श्रीपतिपुरगामि यानं स्वसमयेन रात्रौ सार्धाष्टवादने प्रस्थितम्। डॉक्टरकृष्णनाथः दत्तमहोदयेन सह सुखमासीनोऽभूत् वातानुकूलशयनयाने। दत्तमहोदयः श्रीरामसंस्कृतपाठशालायाः पञ्जिकां पठन् कथयति स्म- 'गतवर्षस्यानुदानं तु समयेन प्रेषितम्, परन्तु इदानीं यावदङ्केक्षितं आयव्ययविवरणम् उपयोगिताप्रमाणपत्रं च संस्थाया अप्राप्तं वर्तते....'

-'वस्तुतः श्रीरामकृष्णमठे पूर्वं मठाधीशाः अस्माकं परमगुरवः सीताचरणशर्माण आसन्। ते तावद् दिवङ्गताः। गताब्दे कार्यालया- धीक्षको महेशमहोदयोऽपि निधनमुपगतः। अतः सम्भाव्यते संस्थाया कार्ये किमपि शैथिल्यमागतम्'-कृष्णनाथः प्राह।

- श्रीमतां तु सम्बन्धोऽभूद् अनया संस्थया-

- एवमेव, दत्तमहोदय! तत्रैवाधीयानोऽहं साहित्ये न्याये चाचार्यपरीक्षे उदतरम्, तथैव एम.ए. इत्युपाधिरपि तत्रैव वसता मया प्रापि- अस्याः संस्थाया एव कारणात् यत्किमप्यस्मि तदस्मि......'

- 'श्रीपतिपुरतः श्रीरामविद्यालयस्य यत्किमपि कार्यं भवति, वयं तु तत्र न कुर्मो विलम्बम्'- दत्तमहोदयः तं प्रसादयन्निवाह।

दत्तमहोदयः संस्थाने अनुविभागीयोऽधिकारी वर्तते। कृष्णनाथः सम्प्रति संस्थानस्य उपनिदेशकपदे प्रतिष्ठितः। दत्तमहोदयस्य पदोन्नतिः तस्यैव संस्तुत्या सम्भाव्यते, अत एव दत्तमहोदयः तं प्रसादयितुं न त्यजति कमप्यवसरम्।

- भवतां तु गमनं भवति प्रायः प्रतिवर्षं स्वकीयायामस्यां संस्थायामिति मन्ये- दत्तमहोदयस्तं पुनः प्रसादयन्निवाह।

- अरे का वार्ता प्रत्येकं वर्षस्य, यतः प्रभृति देहलीमागतः अतीतेषु विंशतौ वर्षेसु.,ततः सकृदपि श्रीपतिपुरं गन्तुं न प्राभवम्- इयमपि यात्रा संस्थानस्य निदेशकमहोदया- नामनुरोधस्य कारणाद् भवति। तेषामाग्रह आसीत् यत् श्रीपतिपुरस्य संस्कृतपाठशालायाः कृते नैका बहुव्ययसाध्या योजना

अस्माभिः स्वीकृताः, अतो मया स्वयमेव निरीक्षणसमितेरध्यक्षत्वेन गत्वा तत्र द्रष्टव्यं का तत्र प्रगतिः....

- 'एवं किम्?'- दत्तमहोदयो किमपि रहस्यं प्रकटीभवतीति अनुभवन् विस्फारितनेत्राभ्यां डॉ. कृष्णनाथं निर्वर्णयन्नवादीत्।

- एवमेव। विंशतिवर्षानन्तरं मम प्रथमेयं यात्रा श्रीपतिपुरं प्रति- इति कथयतः कृष्णनाथस्य स्मृतिपटले श्रीपतिपुरम्, तस्मिन् श्रीराममठः, मठपरिसरे च श्रीरामसंस्कृतपाठ- शालायाः चित्राणि उन्मीलितानि।

परमगुरवः सीतानाथचरणा इदानीं तत्र न सन्ति। तेषां निधनस्य वार्ता तेन मासत्रयानन्तरं लब्धा। यस्यां पाठशालायां विंशतिवर्षाणि विनीतानि तया सम्बन्धसूत्रं तथा त्रुटितम्, न तत्रत्यास्तम् इदानीं स्मरन्ति केऽपि.....; महेशमिश्रो यावज्जीवति स्म, तावत् स सम्पर्कं साधयामास कृष्णनाथेन। इदानीं सोऽपि नास्ति। ये गुरवस्तदानीमासन् न्यायाचार्याः लक्ष्मीधरपण्डिताः साहित्य-व्याकरणाचार्याः कल्याणशर्माणस्ते तु देहलीं समायाते तस्मिन् द्वित्रेषु वर्षेष्वेव सेवानिवृत्ताः। श्रीरामसंस्कृतपाठशालायां ये अध्यापका इदानीं सन्ति ते सर्वथा तस्य अपरिचिताः। विहाय श्रीपतिपुरं समायाते कृष्णनाथे देहलीं कविसुतः कलानिधिः प्रायः दशवर्षाणि पत्रद्वारेण तेन सह सम्पर्कमरक्षत्, इदानीं तस्यापि पत्राणि न समायान्ति। इदानीं श्रीराममठे मुरारीलालो वर्तते मठाधीशः, प्रधानाचार्यश्च श्रीरामसंस्कृत- पाठशालायाः। मुरारीलालाय वैमनस्यस्य लवमात्रमपि न शिष्टं तदीये मनसि सम्प्रति। तेन यत् कृतं तत् कृतम्। तत्फलमपि तेनावापि। वित्त गताया अनियमितताया: कारणात् भूयो भूयोऽभियोगतां प्राप्तवति श्रीराममठे तन्नियन्त्रणं जनपदाधीशेनायत्तीकृतम्, संस्कृतपाठशालायां तु सर्वं वेतनवितरणादिकं चैकपत्रेणैव स्यादिति व्यवस्था राज्यशासनादेशेन प्रागेव प्रचालिताऽभूत्।

..... इदानीं का स्पृहा तादृशाय मठाधीशपदाय, श्रीराम- मठस्यैव कियती मात्रा तस्य समक्षमिदानीम्, यत्र वत्सर एकस्मिन् पञ्चविंशतिसहस्रं रूप्यकाणामपि आयो न भवति! स स्वयमेव यस्मिन् संस्थाने मठाधीशेषु अन्यतमः, तत्र

एकस्य वर्षस्य आयव्ययः स्यात् प्रायः पञ्चाशत्कोटिरूप्यकाणाम्।

– 'तथापि..... यतः प्रभृति भवन्तः संस्थाने समागताः, श्रीपतिपुरस्थितायाः अस्याः संस्थायास्तु कायाकल्प एव सञ्जातः'- दत्तमहोदयः कथयन्नास्त।

असत्यं तु न कथयति सः, कामं चाटुभिस्तं रमयितुं कथयेत्। संस्थाने नवीनां नियुक्तिं प्राप्य तेन सर्वप्रथमं श्रीपतिपुरस्थितायाः श्रीरामसंस्कृतपाठशालायाः कृते अनुदानव्यवस्था नियमितं कारिता। महेशमहोदयेन पत्राचारं विधाय तेन न्यायाचार्यलक्ष्मीधरपण्डितवर्याणां सङ्केतः प्राप्तः; .....द्वयोर्वर्षयोरतीतयोः देहल्यां तेषामभिनन्दनमायोजितम्, संस्थानादे वृत्तिरपि तेषां कृते निर्धारिता। साहित्यव्याकरणाचार्याणां कल्याणशर्मणामवश्यं न लब्धः कश्चन सङ्केतः।

संस्थानमिदं भारतवर्षस्य सर्वाभ्यः संस्कृतशिक्षणसम्बद्धाभ्यः संस्थाभ्योऽनुदानं वितरति। पारम्परिकसंस्कृतपाठशालानां आधुनिकीकरणाय सन्त्यत्र योजनाः। तासु पाठशालासु आधुनिकविषया अपि पाठ्येरन्, सङ्गणकयन्त्रद्वारेण पारम्परिकशिक्षायाः पुरातन- शास्त्राणां च समुद्धारो भवेदिति कृत्वा प्रचलन्ति कोटिरूप्यकाणां व्ययेन प्रकल्पाः। यस्यां पाठशालायाम् आबाल्यात् आकैशोर्यात् आयौवनाच्च विंशतिवर्षाणि अधीतम्, या अनाथस्य तस्य कृते अशरणशरणदात्री अभूत्, तस्यां कृते यदि संस्थानस्य कार्यालय- गतौपचारिकतानां पूर्तिपुरस्सरं किमपि इदानीं कर्तुं शक्यते, तर्हि यथाशक्ति करणीयमिति दृढा मतिरासीत् तस्य, कामम् इदानीं तस्यां पाठशालायां भवतु प्रधानाचार्यः मुरारीलालः, तस्य प्रतिद्वन्द्वी.....

विंशतिवर्षेभ्यः पूर्वं देहलीं समागतः कृष्णनाथः। प्रथमं जानकीरमण- संस्कृत- महाविद्यालये व्याख्यातृपदे तस्य नियुक्तिरभवत्। अतीतेषु पञ्चसु अब्देषु स अस्मिन् संस्थाने उपनिदेशकपदे नियुक्तिं प्राप्य कार्यं निर्वहति। नवीनं प्रशासनिकं पदम्...., तेन सार्धं जीवनदिगपि मनाक् परिवर्तिता। परिधानं परिवर्तितम्। इदानीं क्वचि- दयं पैण्टशर्टसूटादिमयीं पाश्चात्त्यभूषामपि धारयति। जानकीरमण- संस्कृतमहाविद्यालये महत्त्वाकाङ्क्षाः शिथिली- भूताः, समय गतिः शिलीभूता; संस्थाने समेत्य समयः सत्त्वरं धावति, तेन सह

सोऽपि चङ्क्रम्यते, जङ्गम्यते.....

..... वाहनं सत्वरं धावति। एकैकशः स्थानकानि आयान्ति यान्ति च। कृष्णनाथस्य मानसे श्रीरामसंस्कृतपाठशालायाः स्मृतिचित्राणि तथैव आयान्ति यान्ति च।

भोजनं तु पत्न्या साधु साधयित्वा यात्रापरिच्छदे स्थापितम्। दत्तमहोदया अपि ननुनचं कुर्वाणं तं कानिचित् मिष्टान्नानि व्यञ्जनानि च साग्रहं भोजितवन्तः। भोजनानन्तरं कञ्चित्कालं तैः सह वार्ता कृता। अथ दत्तमहोदय आह- 'इदानीं तावच्छयनं कुर्वः–'कृष्णनाथः दक्षिणहस्तस्य तर्जनीं अधिदक्षिणकर्णं द्विस्त्रिर्भ्रमयित्वा प्राह- 'लघुर्भूत्वा आगच्छामि।'

वातानुकूलयानस्य प्रसाधनगृहम्। सर्वं स्वच्छम्। सद्योविहितसम्मार्जनात् डेटोलसुगन्धस्तत्र प्रसरति। तत्र स्थित्वा 'लघूभवन्तं' कृष्णनाथं सहसा कोऽपि सतर्जनमाह्वयत्- 'अरे तिष्ठन्मूत्रयितः!' स्मितं समुदियाय कृष्णनाथस्याधरे। 'तिष्ठन्मूत्रयितृ' इति पदं साहित्यव्याकरणाचार्यैः कल्याणशर्मभिः स्वगालिषु असकृत् प्रयुज्यते स्म। कथं केन सूत्रेण अस्य निरुक्तिः साध्येत इति विषयमधिकृत्य अन्तेवासिषु असकृत् चर्चा समजायत तदानीम्।

साहित्यव्याकरणाचार्याः कल्याणशर्माणो महापण्डिताः। अप्रतिमा तेषामध्यापनशैली। अष्टाध्यायी सिद्धान्तकौमुदी तथैव ध्वन्यालोकः काव्यप्रकाशश्चेति चत्वारो ग्रन्थास्तु आद्यन्तं तेषां कण्ठस्थिताः। विना ग्रन्थम् एतांस्ते पाठयन्ति स्म। प्रश्नैरपि मध्ये मध्ये छात्रानुट्टङ्क- यन्ति स्म। 'अरे नराधम, त्वया उरणरपर इति सूत्रस्य अर्थः ज्ञायते वा न वा रे नरपिशाच!' इति तु तेषां सहजा कथनशैली। इयं शैली प्रायः उग्रादुग्रतरेषु रूपेषु प्रकटीभवति स्म। प्रश्नस्यादौ प्रश्नमध्ये प्रश्नान्ते च भवन्ति स्म तेषां स्वोपज्ञा गालयः, प्रश्नस्य समाधाने व्यादाय वदनं जोषं स्थिते छात्रे तु धारासारैरवर्षंस्ते छन्दोमय्या वाण्या स्वोपज्ञाः गालीः। गालीभिः कदाचित् शार्दूलविक्रीडितम् कुर्वन्ति स्म, कदाचिदिन्द्रवज्रया प्रहरन्ति स्म। इदानीं स्मारं स्मारं तासां गालीनां प्रहारा कियन्तो मधुराः प्रतिभान्ति!

... गालीनां धाराप्रवाहे इयमप्येका तेषां सर्वथा 'मौलिकी' गालिरासीत्, अत्यन्तं कोपावेशे ते छात्रं सम्बोध्य कथयन्ति स्म- 'अरे तिष्ठन्मूत्रयितः!' गाल्या अस्याः प्रयोगः कल्याणमिश्रपादैः कोपस्य चरमप्रस्फोटदशायां सर्वासु इतरासु गालिषु विफलत्वं यातासु

अजायमानायां प्रवर्धमानकोपस्य शान्तौ अक्रियत।

स्थित्वा यः कोऽपि मूत्रयते, न ततः कश्चन जघन्यतरः इति कल्याणमिश्राणां बलवती धारणैवासीत् अस्या गाल्या आविष्कारस्य मूलम्।

कृष्णनाथस्य मानसे देहलीतः श्रीपतिपुरं प्रति परावर्तनयात्रायाः स्मृतिः समुदियाय। सोऽस्मयत। विंशतिवर्षपुरातन्यः घटना पुनरपि समक्षमाविर्भवन्ति। स्मृतयोऽधिमानस- माहिण्डन्ते।

प्रसाधनगृहात् परावृत्य स्वशायिकां समागतोऽपश्यत्- दत्तमहोदयाः निद्राधीनाः नासारवं विमुञ्चन्ति स्म। स प्रच्छदं विस्तीर्य अशेत। परन्तु नयनयोर्निद्रा नास्ति। स परिवर्तते मुहुर्मुहुः। तथैव परिवर्तन्ते मनसि श्रीपतिपुरस्थश्रीराममठस्य तत्रत्यायाः श्रीरामसंस्कृत- पाठशालायाश्च स्मृतयः। चित्तं वर्षाणां दशकद्वयमुल्लङ्घ्य पुनरपि श्रीपतिपुरं तत्रत्यं श्रीराममठं च प्राप।

श्रीपतिपुरे श्रीराममठः धर्मपरायणेन रामभक्तेन श्रेष्ठिना दीनानाथेन ऊनविंशशतस्योत्तरार्धे लक्षमितं धनराशिं दत्वा स्थापितः। तत्रैव संस्कृतपाठशाला प्रचलत्विति श्रेष्ठी दीनानाथः स्वगुरुणा अमलानन्दस्वामिना प्रेरितस्तथा व्यवस्थापयामास। आङ्ग्लशासने मैकालेशिक्षापद्धतेर्वज्रप्रहारं सहमाना कथञ्चिदियं पाठशाला प्रचचाल। दारिद्र्यस्य निरक्षरतायाश्च विकल्पमन्विष्यन्तः समाजग्मुरिहाह- महमिकया ग्रामेभ्यश्छात्राः। स्वतन्त्रे भारते समधिकतरं दुर्दशां गताः संस्कृतपाठशालाः। परमियं पाठशाला अमलानन्दस्वामिनः पट्ट- शिष्यानां परमगुरूणां सीताचरणानां पौरुषेण न अयथा जाता। परमगुरवः सीताचरणाः प्रायः षष्टिवर्षाणि श्रीराममठस्य मठाधीशत्वं पाठशालायाश्च प्रधानाचार्यत्वमुभयमपि सम्यङ् निरवहन्। श्रीपतिपुरे विद्यालयेषु तेषु तेषु

पाठशालासु वा तासु तास्वधीयानानाम् इतः प्रवेशस्तत्र परीक्षाऽन्यतश्छात्रवृत्तिरिति कथञ्चित् कालं क्षपयतां ब्राह्मणबालकानां कृते निःशुल्कावासभोजनादिदानात् सर्वथा अशरणशरण आसीत् सीताचरणः।

अनाथ एवासीत् कृष्णनाथः। स पञ्चवर्षीयोऽभूत्, यदा अशरणशरणाः परमगुरवः सीताचरणास्तं स्वमठे आनीतवन्तः। श्रेष्ठिनो दीनानाथस्यैव भवने कर्मकर आसीत् तदीयः पिता। माता तु कृष्णनाथं प्रसूय दिवं गता। कृष्णनाथोऽयं परमगुरभिर्दीनानाथस्यैव भवनस्य प्राङ्गणे जानुभ्यां रिङ्गन् स्तनन्धयो दृष्टः । वयसश्चतुर्थेऽब्दे ते तमिह स्वमठे आनिन्युः। दरिद्रः पिताऽपि तेभ्यः कृष्णनाथं समर्प्य कृतकृत्यो जातः।

शनैः शनैः कैशौर्यसोपानावलिमारोहन् कृष्णनाथः सीताचरणैः परमगुरुभिः सितासिताचरणेषु प्रशिक्षितः, मठसञ्चालनकलासु दीक्षितः। परमगुरवः सप्ततिवर्षीयाः, ते कृष्णनाथमेव मठाधीशपदे नियोजयिष्यन्तीति मठस्थाः सर्वे अमन्यन्त। केवलः प्रत्यवायभूत आसीत् तत्प्रतिद्वन्द्वी मुरारीलालः। सोऽपि नानाविधैरुपायैः परमगुरूणां प्रीतिं स्नेहं च प्राप्तुमचेष्टत। कृष्णनाथस्यागमनात् प्राक् स इह आनीतः, कृष्णनाथः सरयूपारीणः, स तु कान्यकुब्ज इति उच्चतरे ब्राह्मणकुले स जातः, अतः स एव मठाधीशपदाय योग्यतर इति स विश्वसिति।

एवं व्यतीतानि तस्मिन् मठे विंशतिप्रायाणि वर्षाणि....

....स दिवसः स्मृतिपथम् उपैति।

नातिदूरोदितो नवनलिनदलसम्पुटभेत्ता भगवान् गभस्तिमाली। महत्तरिकया विहितेन रथ्यासम्मार्जनेन समुत्थिता धूलयो उड्डीयोड्डीय लिम्पन्ति तदीयान् करान्। ताभ्य एव धूलिभ्यः पङ्कादिव पङ्कजं प्रकटीभवन्तं कृष्णं कृष्णनाथं मठवासिनश्छात्रा ददृशुः। समनन्तरं च अरे आगत आगतः कृष्णः, आगतः कालियः आगतः कल्लूरिति शतप्राय- च्छात्राणां तेषां तुमुलकोलाहलपरुषः सम्पूरितभुवनविवरो विदारितकर्णकुहरो ध्वनिर- श्रूयत। केचन मुखलग्नाः सखायस्तस्य कृष्णनाथस्य –'अरे देहि पोट्टलिकाम्, समर्पय परिच्छदं मह्यम्, अहं नयाम्येतदित्यहमहमिकया तं नयनाभ्यां पिबन्तस्तदीयाभ्यां स्कन्धाभ्यां

स्कन्धान् स्वकीयान् घट्टयन्तः सम्मर्देन तं मर्दयन्त इव तद्वचनशुश्रूषया कौतुकेन विदीर्णा इव 'कथय कीदृशी यात्राऽभूत्, कथमागतो देहलीतः, किं तत्र जातमिति सर्वमितिवृत्तं पृच्छन्तः परिवार्य तं मठमानयामासुः।

तदानीं कृष्णनाथस्य सरला प्रकृतिराबाल्यात् तथैवाभूत्। देहलीमागत्य सर्वं परिवर्तितम्, कृष्णनाथोऽपि परिवर्तितः। मिश्रोपाह्वः स मिश्रकमिव मिश्रयति स्म आत्मानं मित्रमण्डल्याम्, मोदयति स्म मोदकवत् सदैव मनांसि सुहृदां गुरूणां च, साधयति स्म कार्याणि सर्वविधानि निजजनानाम्, सद्यः सुहृद्यते स्म, आयोजनेषु निखिलं व्यवस्थापयति स्म, उत्सवेषु हासयति स्म, गोष्ठीषु गुह्यं विशदीकरोति स्मेत्यासीन्मठवासिनां समेषां प्रियः। तत्सेवादिसन्तर्पिताः परमगुरवः सीताचरणा अपि तं सर्वदा स्निग्धेनैव चक्षुषाऽपश्यन्।

अथ तस्मिन् प्रभाते श्रुत्वैव छात्राणां कोलाहलं कठोराचरणाः सीताचरणाश्चरणावग्रे सारयन्तः समादाय लगुडं - 'अरे कथमिमाश्चीत्कृतयः, किमिति मत्ता उन्मत्ता, भ्रान्ता वा यूयमिति पृच्छन्तः मठस्य द्वितीयभूमिकाया आधारतलशालायाम् अवतीर्णाः, यत्रेमे छात्राः कुर्वन्ति स्म कोलाहलम्। दृष्ट्वा यूथपरिवारितं यूथनाथमिव कृष्णनाथं कुर्वन्निमं दृष्टिसनाथं ते निजगदुः - 'अरे त्वं कदा समागतः?' तदानीमेव कृष्णनाथेनान्वभावि- काऽपि रूक्षता वर्तते परमगुरूणां स्वरे। 'कीदृशोऽभवत् साक्षात्कारो देहल्याम्?' ते पप्रच्छुः।

कृष्णनाथः सादरं सङ्क्षेपेण स्वेतिवृत्तं विज्ञापयामास। मध्य एव विनिवार्य ते आहुः- अस्तु किमपि भुङ्क्ष्व पिब... ।' अनन्तरं मठस्य सूदं रघुनाथं त आह्वयन्त- अरे रघो, आनय कृष्णनाथ- मिश्रस्य कृते चायपेयम्।'

कृष्णनाथेनानुभूतं चायस्य माधुर्ये किमपि कषायं वर्तत इति।

कृष्णनाथः चिरान्मठे निवसन् विद्यापीठेऽधीयान आचार्य- परीक्षामुदतरत्। सहैव चोत्तीर्णो विश्वविद्यालस्य एम.ए.-परीक्षामपि। अयं परमगुरूणां सीताचरणानां तेषु तेषु सितासितेषु आचरणेषु सदाक्षिण्यं दक्षिणहस्त इव दक्षतया समाचचार साहाय्यम्, सत्यनारायणकथा वा स्यात् श्राद्धकर्म वा

तर्पणं वा वास्तुप्रवेशो वा हवनं वा समृद्धगृहस्थैराकारितः मठस्यायवृद्धौ सदाऽवदानं विदधति स्मेति परमगुरव एनं स्निग्धयैव दृशाऽपश्यन्। सा दृष्टिरिदानीं परिवर्तिता प्रतीयते। परन्तु तस्मिन् समये तु नासीदवकाशः कस्यचिदपि विचारस्य। कृष्णनाथः सर्वं विस्मृत्य इष्टमित्रेषु गोष्ठ्यां तल्लीनोऽभूत्।

तद्दिने मठस्य इतिहासे कश्चन स्वर्णमय एव अध्याय उद्घाटितः। यतो हि श्रीराम- मठस्य न कोऽपि छात्र तावता कालेन द्वाभ्यामाचार्यपरीक्षाभ्यां सह एम.ए. परीक्षामपि समुद- तरत्, तत्रापि तिस्रोऽपि परीक्षाः प्रथमश्रेण्याम्, अथ च देहलीयात्रायास्तु कथैव दूरे तावदास्ताम्, न केनापि अत्रत्येन देहल्या विद्यालये महाविद्यालये वा सेवार्थमावेदनं कृतम्, न वा प्राप्तं साक्षात्कारपत्रम्। अत एव कृष्णनाथस्तेषां समेषां मित्राणां नेत्रेषु तारकायते स्म।

अथ शनैः शनैः सम्पादितदैनिककृत्येषु छात्रेषु भुक्तवत्सु च गगनमध्यमञ्चति भास्करे श्रीराममठस्य द्वितीयभूमिकायाः प्रार्थनाशालायां सम्मिलितेषु कृष्णनाथस्यैक- कोपीनमित्रेषु ससङ्कोचं सोत्सुकं च सङ्गतेषु कृष्णनाथादेव यदा तदाऽधीयानेषु कनिष्ठ- च्छात्रेषु मित्रमण्डल्या मुहुर्मुहुर्नोदितः कृष्णनाथः स्वदेहलीयात्राया वृत्तं व्यवृणोत्।

कथा यथा यथामति श्राविता च तेन सा स्मर्यते तथैव चाद्य दुनोति चित्तमस्य च। कथासुगुम्फने त्वसौ सदा पटुर्मतः परं प्रवीणतैव सा तदाऽस्य कष्टकारणं त्वभूत्।

उक्तमासीत् कृष्णनाथेन–'सुहृदः, तस्मिन् दिने भवद्भिर्मित्रगणैः मया स्थैषणं प्राप्य द्वितीयश्रेण्यां ससुखमहं समुपवेशितः। तेन नाभूत् काऽपि बाधा यात्रायाम्। दिवसं रात्रिं च रेलयान एवात्यवाहयम्। मार्गे भर्जितांश्चणकान् मठाद् गृहीतं च 'प्रसादं' विहाय न किमप्यभक्षयम्, अपिबं च भूयो भूयोऽवतीर्य तेषु तेषु स्थानकेषु नलकेभ्यः प्रचुरं वारि। प्रदेशं चातिक्रम्य निकषा मथुरां देहलीं प्राप्तः। किं कथयामि ऐश्वर्यसदनदेहलीं देहलीमधिकृत्य? स्थानकमवतीर्यैव यत्र क्वाधुना यामीति कान्दिशीकताम्, जनसम्मर्देन मर्दित इति पारवश्यम्, चोरतस्करग्रन्थिच्छेदकैः परिवृत इति वञ्चनीयतामात्मनोऽवागच्छम्।

शनैश्चात्मनैवात्मानमवलम्ब्य कदाचित् पद्भ्यां कदाचिन्नगरबसयानैः दीर्घमध्वानमतिक्रम्य त्रिभिश्चतुर्भिर्होराभि- रप्राप्नुवं श्रीकृष्णमन्दिरम्। न्यायाचार्यैः गुरुवर्यैः लक्ष्मीधरपण्डितैः देहलीवासिनः स्वबालसख्युः कस्यचित् चिरञ्जीवशर्मणः सङ्केतेन सार्धं पत्रमेकं तस्य कृते मह्यं प्रदत्तमासीत्। चिरञ्जीवशर्मा कृष्णमन्दिरे निवसति, तत्रैव संस्कृतपाठशालां चालयति स एव देहलीप्रवासा- वलम्बनभूतः स्यात्। परं भूयो भूयोऽन्विष्यमाणोऽपि न मया लब्धः। चिरञ्जीवेति ममोच्चारणमेव न कोऽप्यवगच्छतीति परस्तादज्ञासिषम्। 'अरे चिरोञ्जीभाई पृच्छति चिरोञ्जीभाईमिति अन्ततः प्रधानपूजकः सहासमवादीत्।

आह चासौ- 'वत्स , चिरौञ्जीभाई कुतोऽवकाशं लभेत त्वद्विधानां कृते? तथापि तदीयबाल्यसखस्य लक्ष्मीपण्डितस्य पत्रमादाय समागतोऽसीति तिष्ठ यत्र कुत्रापि। चिरोञ्जीभाई सङ्गणके कस्यापि नेतुर्मन्त्रिणो जन्मलग्नकं निस्सारयितुं स्वकीये अन्ताराष्ट्रिय ज्योतिषकार्यालये तिष्ठति।' श्रुत्वैतद् मम मस्तिकं बभ्राम। कीदृशः कालः समागतः? अस्माभिरपि ज्योतिर्विद्याऽधीता। परन्तु अस्ति किञ्चित् यन्त्रं यत् स्वयमेव निर्माति लिखति प्रददाति च जन्मलग्नकमिति न कदापि कल्पना कृता। अहं भीत इव, ज्वरग्रस्त इव अवसन्न इव यथा कथञ्चिद् रात्रिं तत्रात्यवाहयम्।

'अन्येद्युश्च कल्यमुत्थाय सम्पादितदैनिन्दिनकृत्यः श्रीराममन्दिरेऽर्पिता- न्नैवेद्यादेव प्राप्तेन करतलगतामलकप्रमाणेन प्रसादेन कल्यवर्तं निर्वर्त्य पीत्वा चोदरपूरं जलं ततोऽहं प्राचलम्। चिरञ्जीवशर्मणो नावापि कापि वार्ता। दैवाच्च सांसदस्य रतिरामस्य सङ्केतो मम सकाशमासीत्, यस्य भवने प्रतिपञ्चाब्दं निर्वाचन- पूर्वमस्माभिः यज्ञादिकं सम्पाद्यते, तत्प्रभावेण निर्वाचनमहासमरे जयति रतिरामः । तत्सङ्केतमवलम्ब्य प्रातरेवासौ मयान्विष्टोऽशोकविहारस्थे स्वभवने चोपलब्धोऽपि। विविधविध-संयाव-मोदक- दाडिमादि- युक्तेन प्रातराशेन मां सत्कृत्य सर्वं वृत्तजातमपृच्छत् नेतृमहोदयः। जानकीरमणसंस्कृत- महाविद्यालये साक्षात्कारार्थमागतोऽस्मीति विज्ञाय

सोऽवदत्– 'अलं चिन्तया, तस्य महाविद्यालयस्य प्रबन्धसमितेरध्यक्षो वर्तते मम मित्रम्। अहं वच्मि तम्। सेत्स्यति कार्य'मिति।

'अथासौ दूरभाष्येण प्रबन्धसमित्यध्यक्षस्य संख्यां मेलयितुमादिदेश स्वसचिवम्। परन्तु भूयो भूयो मेल्यमानाऽपि संख्यापिशाची न मिमेल सा मम श्वश्रूः। तदनु रतिरामो मामाह- पण्डितजिः, गच्छतु भवान् स्वैरं साक्षात्काराय। अहं वक्ष्यामि अध्यक्षम्।' इति। अहं च भूयो भूयो धन्यवादान् वितीर्य तस्मै निःसृत्य तद्भवनात् संस्कृतमहाविद्यालयं समागतः। समजनि मम साक्षात्कारः। न सर्वथा शोभनो न वाऽशोभनः। साक्षात्कारकर्तार आसन् महाविद्यालयप्राचार्याः गोविन्दशास्त्रिणः एको बाह्यविशेषज्ञः द्राक्करो नारायणप्रभाकरः प्रबन्धसमित्यध्यक्षश्च। प्राचार्या गोविन्दशास्त्रिणो मां न्यायदर्शनमनुसृत्य जातिस्वरूपनिरूपणा- यानुयुयुजुः। अहं च मुक्तावली-गादाधरी-जागदीश्याद्युद्धरणसहितं यथामति विवेचितवान् जातिस्वरूपम्। अथ बाह्यविशेषज्ञो नारायण प्रभाकरो मां पृच्छति- कानि कानि ग्रन्थानि अधीतानि?' श्रुत्वा च सस्मितवदनान् निरीक्ष्य गोविन्दशास्त्रिणोऽहमपि प्रच्छाद्य स्वस्मितम् अविस्मितमवदम्- श्रीमन्, ग्रन्थास्तु बहवोऽधीताः, ग्रन्थानि नाधीतानीति। के के ग्रन्था अधीता इति सोऽपि अवगत्य स्वस्खलितं स्खलिताक्षरं पुनः पपृच्छ। मया केचन साहित्यशास्त्रीयाः केचन व्याकरणशास्त्रीयाः केचन न्यायशास्त्रीयाश्च ग्रन्था उदाहृताः। ध्वन्यालोकोऽपि पठित इति श्रुत्वाऽसौ पृच्छति- कतिविधा ध्वनिरिति। तच्छ्रुत्वा पुनरपि गोविन्दशास्त्रिणो वदनं निरीक्ष्याहं सप्रश्रयमसूचयम्- श्रीमन्, ध्वनिशब्दोऽयं पुल्लिङ्गे भवति। ध्वनेर्भेदास्तु द्वितीयोद्योते इत्थं निगदिता आनन्दवर्धनेनेत्युक्त्वा यावदहमविवक्षितवाच्यादीनि नामानि उदाहरामि, तावद् गोविन्दशास्त्रिण आहुः- 'आस्तां तावत्। शोभनं शोभनमिति।

महाविद्यालयप्रबन्धसमितेरध्यक्षस्तु किंवास्तव्योऽहं, यदि ब्राह्मणस्तर्हि कतमो ब्राह्मणः, देहल्यां सेवां किमर्थं कर्तुमिच्छामीत्येतादृशैरेव प्रश्नैर्मन उट्टङ्कयामास मे। समाप्ते साक्षात्कारे कशाघातपीडित इव विष्टिबद्धः पामर इव प्रधर्षिता नारीवाहं कक्षात् तस्माद् विनिर्गतः। निर्गमनकाले सर्वेभ्यः साक्षात्कार- कर्तृभ्यो

'नमोऽस्तु पूज्येभ्यः' इति निगदताऽर्पितो मया प्रणामाञ्जलिः। तथापि किं दूरभाष्येण न सूचितवान् सांसदो रतिरामः प्रबन्धसमिते- रध्यक्षमिति शङ्कितः, व्यर्थ एव बभूव मे देहलीयात्रोद्यमः, अपि पुनरन्वेषयामि चिरञ्जीव- शर्माणं चिरौञ्जीभाई वा, पुनर्गत्वा याचे रतिराममुताहो स्थानकमेव गत्वा परावर्तनाय गृह्णामि यानमिति विकल्पसमाकुलोऽहमभवम्। अन्ततश्च 'दृष्टा देहली, यद्यत्रत्यमन्नजलं विधात्रा भालपट्टे लिखितं स्यात् तर्हि पुनरागमिष्याम्येव, सम्प्रति तु इतो गमनमेव वरमिति निश्चिकाय चेतः। समागतश्चाहं नवदेहलीस्थानकम्। क्रीतं यात्रापत्रकम्। स्थानके महान् जनसम्मर्दः। समग्रस्य भारतवर्षस्य जना एकत्रीभूता देहलीमेवाक्रामन्त इति प्रत्यभात्। पदात् पदान्तरमपि दीयेत तर्हि येन वा केन वा यया वा कया वा घट्यते देहः। एकेन पदा अग्रे व्रजामि, पदद्वयं जनसङ्घातेन पृष्ठतो नीये। दशमे यानचत्वरे समायाति श्रीपतिपुरगामि यानमित्युद्घोषणया विज्ञायाहं त्वरया दशमयानचत्वरं प्रति प्राचलम्। मार्गे क्वचन कलकलं जनानाम्, सीत्कृतीर्बालकानाम्, चीत्कृतीश्चिरण्टीनाम्, आह्वानानि भारवाहकानां महा- सङ्ग्रामसमये दुन्दुभिघोषान् शङ्ख- ध्वनीरिव च गर्जनं वाष्पयन्त्रेञ्जनानां श्रावं श्रावं स्फुटितकर्णपट इव सम्प्राप्य दशमयानचत्वरं तत्क्षणमेव च समागतं श्रीपतिपुरगामि यानमपश्यम्। समागतमात्रे याने बभूवुः धक्कितं, घट्टितं, ठणत्कारा रणत्काराश्च। अथ 'त्वरस्व, त्वरस्व, गृहाणेमां पोट्टलिकां अये किमिति चरणे मम स्वचरणं स्थापयसि, अग्रे सराग्रे सरे- त्यादिभिश्चीत्कारैः समं महता जनसमूहेन परिवृतः पिष्ट इव घृष्ट इव उच्छ्वासनिःश्वासयोरपि कष्टमनुभवन् यथा कथञ्चिदहं यानस्य कस्याञ्चिद् वर्गिकायां बलात्कारेण स्वदेहं सपरिच्छदं प्रावेशयम् शतप्रायैर्नारीपुरुषकायैः सार्धम्। उपवेशनाय क्वावकाशः स्यात्, यथा कथञ्चित् तिष्ठन्नेव तत्राहं चिरमासम्। प्रमाणाधिकैः श्वासैर्भस्त्रेव मे फुप्फुसद्वयं चिरं सञ्चचाल। स्वयमपि श्रमसलिलस्नपितगात्रः संसक्तदेहानां स्त्रीपुरुषाणां स्वेदगन्धं जिघ्रामि, स्फुटति मम नासापुटद्वयम्। तेषां निःश्वासैर्घट्टन्ते स्म मदीया निःश्वासाः। वर्गिकायाम् - 'अपसर, अपसर मनाक्, देहि मह्यमप्युपवेष्टुम्, अरे महिलेयं

महिलेयं, उत्तिष्ठ, उपविशत्वियं, भ्रातः अपसारय स्वीयं सूतकेशम्' इत्यादयः शब्दा अनिशमश्रूयन्त। सहसा च येन केनापि हेतुना कश्चन प्रौढे वयसि वर्तमानो यूना केनापि हस्ताहस्ति मुष्टामुष्टि कर्तुमपाक्रमत, अपरे च माध्यस्थ्यं कुर्वाणा 'अयं तावत् मुग्धः, भवांस्तु प्रज्ञावानि'ति तं बोधयामासुः। 'अरे प्रज्ञाचक्षुरयं प्रज्ञावान् यन्ममाङ्गुष्ठमास्कन्दन् चरणं न्यदधादि'त्युक्तवति तस्मिन् यूनि स प्रौढः पुनरपि सझम्पं सुग्रीवमिव तं ग्रीवया जग्राह ग्राहसदृशः। केचन तस्मिन् जनौघेऽपि कलहमेतादृशमनवेक्ष्य बभूवुः गञ्जीफाखेलने तल्लीनाः। अपरे च वितण्डाभिः कथाभिर्वा विनोदयामासुर्मनांसि परस्परम्।

'शनैश्च द्रुततरवेगेन धावति याने तन्द्रापरवशप्राये तस्मिन् स्त्रीपुरुषसमाजे कथञ्चित् क्लेशेन सर्पन् अवकाशं च कृच्छ्रलब्ध- मुपयुञ्जानः शनैरहं वातायनसमीपं समेतः। अरे वातायनादागतं समीरमपि अयमवरुणद्धि माणवक इति सासूयं मां पश्यन्नाह स एव युवको यः प्रौढेन तेन प्राक् कलहायितः। - अरे तु क्व यातु स वराकः- अपरः कश्चन मम पक्षमादाय त निरभर्त्सयत्।

'वातायनसमीपमेव स्थितस्य मे कति होरा व्यतीताः। तत्रैव तिष्ठन् जागरितोऽपि वर्गिकायां विशद्भिः समीरैः संवाहितो मुहूर्तमिव तन्द्रामन्वभवम्। एवमेव समाजगाम सन्ध्या। मया तु आप्रातरन्नकणमपि न मुखे निपातितम्, प्रचुरं जलमेव निपीतमासीत् अशनायां शमयितुमवस्थानकनलकात्। हन्त, रभसा निपीतस्यागस्त्येन सागरस्येव तस्य जलराशे- रुदरदर्यां का परिणतिः स्यादिति न मया चिन्तितं तदानीम्। भ्रातरः! 'अतिरभसकृतानां कर्मणामाविपत्तेर्भवति हृदयदाही शल्यतुल्यो विपाक' इति महाकविवचः सर्वदा स्मरणीय- मस्माभिः। एतद्वचो यद् विस्मृतं तस्य दारुणो विपाकविस्फूर्ज- थुरप्रमेयो यथा मयान्वभावि तस्यां कष्टप्रदायां यात्रायां तदिदानीं श्रूयताम्। मया निपीतास्ते जलाञ्जलयोऽवतीर्यावतीर्य यन्त्रनलिकाभ्य उदरस्याधोभागे भरन्ति स्म। क्रमेण च पादकन्दुक इव फुल्लितो मे मूत्रा- शयः। बलवती लघुशङ्का बाधते, तस्या वेगं मनागपि धारयितुं न शक्नोमि। कथञ्चिन्महति जनसम्मर्दे तस्मिन् जनान् सम्प्रार्थ्य सम्प्रार्थ्य मूत्रालयं यावत् प्राप्तः किं पश्यामि

यत् द्वयोरपि मूत्रालययोर्वर्गिकायां स्थानमलभमानाः सम्भृताः सन्ति विंशतिप्राया जनाः परिच्छदवद्राशीभूताः। निराशः पराहतः पदातिरिव कथञ्चित् स्वस्थानमहमागतः। किन्तु स्फुटतीव मूत्राशये स्थातुं तस्मिन् स्थाने न शक्नोमि।

'एकस्तु फरीदाबादीयो वणिक् पार्श्व उपविष्टः पीडया विकृतं मुखं मे विलोकयन्नपृच्छत्- 'कथय बाबु, अपि न सुस्थोऽसि?' अहं च रुदतेव स्वरेणावोचम्- 'पितृव्य वर्याः, किं कथयामि, बलवती मुमूत्रिषा मां बाधते। मूत्रालयश्च जनैरवरुद्धः!' तच्छ्रुत्वाऽसौ वणिक् विहसन्नाह- 'अरे कथमियतैव सीदसि? ननु किशोरोऽसि। वयं ते पितृतुल्याः। इयं देवी ते ज्येष्ठा भगिनी। अथ च वर्गियायां प्रायः अन्धकारः। कः सङ्कोचः? वातायनसमीपं स्थितोऽसि। निस्सारय वातायनाद् बहिर्यन्त्रं स्वकीयम्। यथेच्छं प्रवाहय मूत्रधाराः यासु निमज्जेद् धरित्री। भगवती धरित्री, भगवतो मूत्रधाराः। किमत्रास्माकम्?' इत्युक्त्वाऽसावट्टहासमकरोत्, प्रहसिताः केचन संवादमिमं शृण्वन्तो जनाः। पार्श्वस्थ आसन उपविष्टा महिला क्षीणमस्मयत। अहं तु पीडया हसितुं नापारयम्। तस्य वणिजः पार्श्व उपविष्टो वृद्धो मां नुनोद- 'अरे, मल्ल, किमिति स्त्रीव लज्जया जडीकृतस्तिष्ठसि? सत्यमाह भ्रातृवर्यः। विसृज मूत्रमस्मात् वातायनात्।'

'एवमुभाभ्यां प्रोत्साहितोऽहं कथञ्चित् वातायनसन्निकृष्टो- ऽभवम्, अवदंश्च पृष्ठतोऽवलोक्य सहयात्रिकान् – 'बन्धवः, क्षणं क्षम्यता- मयं जनः। भगिनि, मनाक् मुखं परावर्ततां भवती, यावदहं लघुर्भवेयम्।' स वणिगाह- 'अरे यदि अस्मानवलोकयिष्यसि, तर्हि नावतरिष्यति मूत्रम्। सम्मुखमवलोकय सम्मुखम्। वर्गिकायां नास्ति कोऽपीति जानीहि। सेत्स्यति कार्यम्।' तस्या महिलायाः पतिरपि सविनोदमाह-'अरे मूत्रयते बालः। किं कुर्मः? अपि शीत्कृतिं कुर्मः?' श्रुत्वा च तेन सह द्वित्रा मनश्चला युवानो सूँ-सूँ इति ध्वनिं कर्तुमारेभिरे। तत्क्षणं च निस्ससार मम मूत्रम्। चिरमहं मूत्रं विसृजंस्तत्र स्थितः। तद् दृष्ट्वाऽसौ वणिगाह- 'अरे किं निखिलां धरामेव वाहयिष्यसि? बाबु, यावत्यां धरण्यां लोह- पट्टिकाः सन्ति यासाम् उपरि

रेलयानमिदं याति, तावती धरित्री तु रक्षणीया!' श्रुत्वा पुनः केचन प्रहसिताः। वृद्धश्चाह- सत्यमेव बलवता मूत्रवेगेन बाधित आसीत् तपस्वीति।

'निवृत्तलघुशङ्कश्चाहं समरविजयी सेनानीरिव सहसा परितः स्थितानां सहयातॄणां स्नेहभाजनं सञ्जातः। स च वणिक् आह माम्- 'एहि एहि, उपविश।' इति किञ्चिदपसृत्य तिलमात्रं स्थानं मह्यमासनाय ददौ। अहं तदेवाहोभाग्यमिति मन्वानः कथञ्चित् नितम्बार्धं तस्मिन् निवेश्य उपाविशम्।

'रजनी जाता। तमिस्रायाा महानद्यां तरति स्म यानम्। मम वर्गिकायां स्थिता आसीना वा जना यथा तथा किमपि भक्षयित्वा तन्द्राधीनाः सञ्जाताः। कश्चन कस्यचित् स्कन्धे मुहुर्मुहुर्दोलायमानं स्वशिरो लगयति,. अपरश्च परस्य वक्षसि स्थापयति स्वचरणम्। अहमपि तिलमात्रे स्थाने कथञ्चित् सक्तनितम्ब एकेन पादेन अधः स्थापितं स्वझोलकं संस्पृश्य संस्पृश्य रक्षन्नपरेण च पतनादात्मानं धारयन् नयनयुगलं निमील्य हरिनाम जपन् - इयमेव निद्रा, इयमेव विश्रान्तिः, इदमेव मे सन्ध्यार्चनमिति विभावयन्, धन्योऽहं यद् दृष्टा देहली, सम्प्राप्तं परावर्तनाय यानम्, यानेऽपि प्रवेशो लब्धो वर्गिकायाम्, वर्गिकायामपि अवस्थानाय प्राप्तं स्थानम्, ततोऽपि मूत्रविसर्जनाय समधिगतं वातायनम्, अन्तातश्च लब्धम् आसनमपि नितम्बमेकं धर्तुमिति चिन्तयन्नात्मनैवात्मानमाश्वासयन्नासम्। प्राप्तप्राये निशीथे क्रमशस्तं वणिजं तं च वृद्धमपि तस्मादेव वातायनान्मूत्रविसर्जनं कुर्वन्तमहमर्ध- निमीलिताभ्यां चक्षुर्भ्यामपश्यम्। एवमेव प्रभाता रजनी। उषसि च श्रीपतिपुरं प्राप यानम्। यानाच्चावतीर्याहमागतो मठम्, मिलितश्च भवद्भिःसर्वैः। इयं मम देहलीयात्रायाः कथेत्युक्त्वा विरराम कृष्णनाथः।

श्रुत्वा च यात्रावृत्तमिदं सर्वे कृष्णनाथस्य सखायः- 'अहो धैर्यम्, अहो सहिष्णुता, अहो जितेन्द्रियत्वम्, अहोभाग्यं यत् प्रियमित्रमस्माकं अक्षत एव देहलीतः परावृत्य समुपेतः इति तं प्रशशंसुः। परन्त्वेतेषु सर्वत्र दोषदर्शी धर्मशास्त्राचार्य–ज्योतिषाचार्यपरीक्षोत्तीर्णो परपीडन- कुशलः सर्वैः परित्यक्तः मुरारीलालः कूणितनासो विवलिताधरो- ऽब्रवीत्- 'आस्तां तावत्। अनेन

वातायनाद् यन्मूत्रितं तत्तु न श्लिष्यति चेतसि।'

कृष्णनाथस्य प्रीतिपात्रेष्वन्यतमः प्यारेलालस्तत्क्षणं कटाक्षीकृतवान्- 'अरे अस्य यन्मूत्रितं, तव चेतसि तत् कथं श्लिष्येत? तत् तु वातायनान्निपत्य भूम्यां श्लिष्टम्।' सर्वे जहसुः। मुरारीलालोऽपि परिहासमिममसहमानः सासूयमुवाच- 'प्यारेलाल, तूष्णीं भव त्वम्।

अरे युष्माभिः किं धर्मशास्त्राणि नाधीतानि? मयाऽधीतानि धर्मशास्त्राणि। धर्मशास्त्राणि तु कृष्णनाथस्य मूत्रविसर्जनं नानुमन्यन्ते...-'अरे तानि अस्य मूत्रविसर्जनं नानुमन्यन्ते तर्हि इदानीं किं क्रियेत, अनेन तु तदानीं तत्र मूत्रितमेव'— इत्याक्षिपन्तं प्यारेलालं विनिवार्य मुरारीलालादयस्तत्क्षणं तत्र शास्त्रार्थं कर्तुमारेभिरे। केचन कृष्णनाथेन यत्कृतं तस्य औचित्यं प्रतिपादयामासुरपरे चानौचित्यम्। कृष्णनाथस्तु तर्कवितर्कप्रपञ्चेनोद्विग्नः प्रजागरवशात् घूर्णमानमस्तिष्कः स्वकक्षमुपेत्य सुष्वाप।

अथ अस्याः शास्त्रार्थचर्चाया वार्ता कर्णाकर्णि प्राप मठाधीशान् परमगुरून् सीताचरणान्। द्वित्राः पैशुन्यपरायणाः कर्णेजपाश्छात्रा कृष्णनाथे सीताचरणस्यानुकम्पामसह- माना लवणमरीचिमिश्रं वर्णयामासुः कृष्णनाथकृतं यानवातायनान्मूत्रविसर्जनपौरुषम्। श्रुत्वा क्रोधेन दन्दह्यमानः सीताचरण आहूतवान् कृष्णनाथम्। कृष्णनाथोऽपि सलज्जं स्वीचकार यानवातायनादात्मनो मूत्रितम्। सीताचरणास्तु एतादृशस्य जघन्यकार्यस्य स्वीकरणकाले तदीये वदने क्षीणां स्मितरेखां दृष्ट्वा सन्धुक्षितमन्यवो दन्दह्यमाना इवाहुः-'अरे, एतादृशं घोरमनाचारं कृत्वा हससि? मूर्ख, मूत्रेण तेन साकमेव मर्यादाऽपि त्वया सर्वा प्रवाहिता स्वीया। अतो निस्सर इतोऽस्मान्मठात्!'

सीताचरणानामेतादृशमकल्पनीयं कोपविजृम्भणं विलोक्य कृष्णनाथः प्ररुदन् प्रपात इव पपात तदीयपादयोः, अपरेऽपि केचन कृष्णनाथसखायो व्यतिकरमिमवलोकयन्तो- ऽनुनयन्ति स्म सीताचरणम्- 'परमगुरो! क्व गमिष्यति अनाथोऽयं बालः। भवद्भिराशैशवात् पुत्र इव पालितः। प्रायश्चित्तमयं करिष्यति स्वकीय- स्यापकृत्यस्य। क्षम्यतामयम्।'

कृष्णनाथं प्रति स्वकीयेनैतादृशेन कोपाटोपेन स्वयमेव सम्भ्रान्ताः परमगुरवः सीताचरणा अनुनयमिमं सानुग्रहं स्वीकुर्वन्तः अकथयन् - 'भवतु, प्रायश्चित्तमस्य कृते निर्धारणीयम्।' इति।

यथा यथा कृष्णनाथ इदानीं समग्रं प्रसङ्गं मनसि विश्लेषयति, तथा तथा प्रतीयते यत् परमगुरूणां न क्रोधस्तस्य कथितमनाचरणमधिकृत्य आसीत्। देहलीयात्राकथाया एतादृशं सार्वजनिकप्रकाशनं परमगुरुभ्यो नारोचत इति प्रतीयते, यदि कृष्णनाथः स्वयानवातायन- मूत्रितस्य वृत्तं रहसि तेभ्यो न्यवेदयिष्यत् तर्हि ते सुगमं किमपि प्रतीकारं तदीयस्य अनाचारस्य प्रस्ताव्य प्रकरणमिदं समाप्स्यन्त। अन्यच्च- यथा प्यारेलालेन पश्चात् सूचितं देहलीं गतवति कृष्णनाथे मुरारीलालेनातितरां पैशुन्यमाचरितम्, भृशं च कर्णेजपत्वं विहितं परमगुरून् तं प्रति विप्रतीपान् विधातुम्। अपरं च- अयं यदि देहल्यां सेवां प्राप्स्यति, तर्हि इतो गमिष्यति, तेन तु भग्न एव स्यान्मे दक्षिणो बाहुरिति दुःखम्, कथं मामनिवेद्य न्यायाचार्यस्य पण्डितलक्ष्मीधरस्य पत्रमनेन गृहीतम् इत्युपेक्षया क्रोधः, तत्पत्रप्रभावेण मत्साहाय्यं विनैव प्राप्स्यति किमयं देहल्यां भृतिमिति शङ्का– इत्थं नाना भावाश्चित्ते परम- गुरूणां तरङ्गिताः स्युः, ते च कोपाटोपमेतादृशं सहसा उत्पादयामासुरिति स इदानीं कलयति।

तदानीं परमगुरवः स्वप्रियशिष्यस्य प्रायश्चित्तपङ्के पतितस्य दुर्दशां दर्शं दर्शं स्वयमपि मनसि सन्तपन्ति स्म , परन्तु धनुषो विनिर्गतः इषुर्न परावर्तितुं शक्यते, न वा मुखान्निर्गतं वचनमिति एवं स्थिते न ते किमपि कर्तुं पारयन्ति स्म इत्यपि कृष्णनाथः कलयतीदानीम्।

अथ धर्मशास्त्रमधीयानानां मठच्छात्राणां सभा समजायत। परमगुरवस्तु धर्मशास्त्रमधीयानाश्छात्राः श्रीमतः शलभशास्त्रिणः परामर्शेन यं निर्णयं कुर्वन्ति, तं मानयिष्ये इति उक्त्वा नास्यां सभायामागताः। आश्चर्यस्य विषयस्त्वयमासीत् यत् ये गुरवः कल्याणमिश्रा तिष्ठन्मूत्रयितृत्वं सर्वथा जघन्यं कृत्यममन्यन्त, ते अस्मिन् विवादे सर्वथा तटस्थाः। शास्त्रार्थसभायां ते नागताः, नापि वा प्रायश्चित्तनिर्णयार्थं जायमानायां सङ्गतौ सङ्गताः। क्षेत्रपतिना परस्तात्

सादरं पृष्टा सस्मितमवादिषुः- 'अरे अनेन नरपिशाचेन कृष्णनाथेन यत् कृतं तत्र तिष्ठन्मूत्रयितृत्वलक्षणं क्व सङ्गच्छते। यानावस्थितेन तेन तत् कार्यं कृतम्। किं नाम यानम्? यातीति यानम्। यानत्वेन गतिमत्त्वेन वा अवच्छिन्नं यानम्। अत एव स्थितिलक्षणं तत्र नास्ति। गच्छन्न मूत्रयेत्, तिष्ठन्न मूत्रयेदितिवादिभिर्मन्वादिभिः यानत्वविशिष्टगतित्वावच्छिन्नमूत्रविसर्जनाय न तावत् प्रायश्चित्तव्यवस्था कृता, अत एव निरर्थकोऽयं युष्माकं सर्वः प्रायश्चित्तविचारः।'

अथ धर्मशास्त्रेषु आत्मनः सर्वदा सर्वतन्त्रस्वतन्त्रत्वप्रख्या- पनपरः सततं विततनेत्रो निरन्तरघूर्णमानमस्तकाञ्चितशिखः शलभ इव दहने आत्मानं क्षिपन्निव प्राह शलभशास्त्री – मूत्रं तु वातायनात् प्रवाहितम्, कतमे स्थाने इयं घटना घटितेति न कृष्णनाथः स्मरति। यदि तत्स्थानं कस्याश्चन देवतायास्तर्हि समधिकतरं पापम्, अतो यावन्न निश्चीयते कुत्रानेन प्रवाहिता स्वकीया धारा तावन्नास्यापराधस्य विचारः अत्र कर्तुं न शक्यते इति प्राह।

आत्मानं मनोरवतारं मन्यमानो मुरारीलालस्त्वाह - 'गुरुवर्याः, भगवता मनुना किमुक्तमस्मिन् विषय इत्यवधेयम्। तथा चाह मनुस्मृतिः- चतुर्थाध्यायस्य पञ्चचत्वारिंशत्तमे श्लोके-

नान्नमद्यादेकवासा, न नग्नः स्नानमाचरेत्।
न मूत्रं पथि कुर्वीत, न भस्मनि न गोव्रजे।।

इति। अतोऽनेन पथि विहितं मूत्रविसर्जनं धर्मशास्त्रविरुद्धम्। तच्छ्रुत्वा क्षेत्रपति- रमाकान्तौ कृष्णनाथस्य सखायौ तत्क्षणमूचतुः- नानेन पथि विहितं तत्, अनेन तु याने विहितम्। अपरे जगदुः- - न याने, अपितु यानवातायनात् पथि विहितम्।

मुरारीलालः पुनराह- गुरवः, सावशेषं मे वचः। तत्रैव कथयत्यग्रे भगवान् मनुः सप्तचत्वारिंशत्तमे श्लोके-

न ससत्त्वेषु गर्तेषु, न गच्छन्नापि च स्थितः।
न नदीतीरमासाद्य न च पर्वतमस्तके।।

अनेन गच्छतापि मूत्रितं. स्थितिमतापि मूत्रितम्, अतो सविशेषो दोषः।

क्षेत्रपतिरमाकान्तौ पुनरूचतुः- सर्वे स्थितिमन्त एव मूत्रयन्ते. यदि स्थितिरेव न स्यात्, तर्हि मूत्रमपि न स्यात्। स्थितिश्च गतिश्च निरन्तरं भवति। पृथिवी स्थिता, तस्यां वयं स्थिताः। पृथ्वी च गतिमती, तस्यां घूर्णमानायां वयमपि भ्रमामः अतः गतिश्च स्थितिश्च सर्वदा संसारे युगपद् भवत एव।

अथ का नाम स्थितिः, का नाम गतिरिति महान् विवादोऽजायत। नास्मिन् काले मनुप्रभृतयः प्रमाणमिति शनैर्वदति पृष्ठतः कस्मिंश्चित् मुरारीलालः- - नाहं भगवतो मनोर्निन्दां सहिष्य इति कथयन् कर्कोटक इव नागः फूत्कर्तुमारेभे। प्यारेलाल उवाच- 'न वेगान् धारयेद् धीमानित्यपि तत्रैवोक्तं धर्मशास्त्रे। अत एव कृष्णनाथेन यत् कृतं तत् तु धर्मशास्त्रदृशा उचितमेवेति नायं प्रायश्चित्तमर्हति।'

मुरारीलाल आह- 'कुत्रत्यमिदं वचः न वेगान् धारयेद् धीमानिति? नेदं मनुस्मृतौ प्राप्यते। यत् किमप्युच्यते तत् सप्रमाणं वचनीयम्।'

क्षेत्रपतिः- आपद्धर्म इति मत्वा कृष्णनाथस्तथा चकार। अत एव क्षन्तव्यः।'

अन्ततः शलभशास्त्री - आपद्धर्मतया यत्किमपि क्रियते तत्रापि प्रायश्चित्तव्यवस्था भवतीति प्रायश्चित्तमवश्यं करणीयमनेनेति व्यवस्थां ददौ। धर्मशास्त्रमधीयानाश्छात्रा देवशर्म- मन्युदेवादयस्तत्क्षणं प्रायश्चित्तान्वेषणतत्परा बभूवुः। येनेन्द्रियेन मूत्रविसर्जनं कृतं तदेवास्य कर्त्यतां सर्वस्यानर्थस्य मूलमिति कश्चन पृष्ठस्थितश्छात्रो मन्दस्वरेणाह।

अन्ततश्च प्रथमं कृष्णनाथेन शिरो मुण्डनीयम्, अथ प्रतिदिनं कल्यमुत्थाय चषक- परिमितं गोमूत्रं पातव्यं मासद्वयावधि, प्रायश्चित्तावधौ कृष्णनाथः श्रीराममन्दिरे पूजां विधातुं विग्रहानुपेत्य नैवेद्यं प्रसादं दक्षिणाराशिं च स्प्रष्टुं नाधिकृतः स्यात्, भोजनशालायामपि प्रवेशा- धिकारेणासौ वञ्चितः स्यात्, सर्वेषु भुक्तवत्सु आचार्येषु छात्रेषु च स स्वीयां स्थालीमादाय भोजनशालाद्वारे उपस्थास्यति, सूदो रघुनाथः तस्य स्थाल्यां तत्रैव भोजनं क्षेप्स्यति इत्यपि प्रस्तावितम्। प्राय- श्चित्तं निर्धार्य शलभशास्त्री सभां व्यसृजत्।

परमगुरुभिः मठस्य कार्यालयाधीक्षको महेशमहोदयो निर्दिष्टः - आहूयतां नापितः, मुण्ड्यतामस्य शिरः, श्वः प्रभृति प्रातः पिबत्वयं चषकपरिमितं गोमूत्रम्, नो चेन्निष्कास्यतां मठादिति।

कृष्णनाथस्तु अकिञ्चित्करतया किमर्थं मया मित्रमण्डल्यां मूत्रोत्सर्गो वर्णित इति विषीदन् जोषं तस्थौ।

मठवासिषु छात्रेषु शनैः स्यन्दमाना प्रायश्चित्तवार्ता प्रससार। केचन कृष्णनाथमुप- हसन्ति, अपरे सान्त्वयन्त्येनम्। क्षेत्रपति- प्यारेमोहनादयस्तु प्रायश्चित्तप्रतिविधानं चिन्तयन्ति।

मठवासिषु साहित्याचार्यच्छात्रः कविसुतोपाह्वः कलानिधिस्तु कविम्मन्योऽनिशं काव्यरचनाप्रसक्तः कृष्णनाथयात्रावृत्तमधिकृत्य कवितामेकां सद्यो जुगुम्फ। अन्येद्युरेव अपराह्णगोष्ठ्यां 'कृष्णनाथीया लघुशङ्के'ति शीर्षकं दधाना सा कविता तेन पठिता। तदानीं सा कविता अतितरां लोकप्रिया जाता मठवासिषु छात्रेषु। इदानीं तां स्मृत्वा न तथा जुगुप्सा जागर्ति कृष्णनाथस्य मनसि, यथा तदानीम्। अद्यापि एकं छन्दः अतिदीर्घायास्तस्याः कविताया स स्मरति स्मयते च स्मृत्वा -

स्मेराननास्तं तरुणा अपश्यन्
नारीजनो नम्रमुखं लुलोके।
क्रोधेन वृद्धाः कुतुकात् तरुण्य-
स्तं मूत्रमाणं ददृशुर्जनास्ते।।

कृष्णनाथायासूयमानैः शठैर्मठच्छात्रैर्नोदितो कविसुतः कलानिधिर्मुहुर्मुहुस्तां कविता- मुच्चैस्तं श्रावयित्वा श्रावयित्वा पठति स्म।

कृष्णनाथस्तु अन्तर्दन्दह्यमानोऽपि 'यदि इदानीं धैर्येण सर्वमिदमुपहासम् अनादरं च न सहे, तर्हि मठान्निष्कासितो रजकश्वा इव इतो भ्रष्टस्ततो नष्टः स्यामिति विचार्य तूष्णीं तस्थौ तदानीम्।

समारब्धः प्रायश्चित्तविधिः प्रायश्चित्तव्यथादायकः। मुण्डितं कृष्णनाथशिरः। नियोजितो महेशः परमगुरुवर्येण सीताचरणेन प्रातर्गोमूत्रमसौ पिबति चषकपरिमितं

वा न वेत्य- वलोकयितुम्। गोमूत्रपानकषायितजिह्वः मथ्यमानोदरः छर्दिग्रस्त इवासौ सीदति स्म, अन्तेवासिनां व्यङ्ग्योक्तिभिः खिद्यते स्म, विस्मृत्य कथालापान् नर्मवचनानि विषीदति स्म। क्षेत्रपति-प्यारेलालादयस्तदीयाः सखायः दुःखमस्य जानन्तोऽपि न किमपि साहाय्यं कर्तुमपारयन्। तैः प्रार्थिता अपि परमगुरवः सीताचरणाः प्रायश्चित्तविधाने किमपि शैथिल्यं न्यौन्यं वा दातुं नानुमेनिरे। द्वित्रैरेव दिनैः कृष्णनाथो व्याधिग्रस्त इव, प्रेतवशङ्गत इव, सर्वथा तिरस्कृत इव च प्रतिभाति स्म। 'मित्र, अलं विषादेन। छोटिकां दायं दायमपयास्यत इमौ द्वौ मासौ प्रायश्चित्तावधेः इति सहानुभूतिसहितं वदतां सखीनां समक्षमसौ तूष्णीमेव तस्थौ।

एवमेव व्यतीताः पञ्चदश दिवसाः। कृष्णनाथः प्रतिदिनं कल्यमुत्थाय आनीय गोशालायाश्चषकपरिमितं गोमूत्रं कनिष्ठस्य मठाचार्यस्य महेशमहोदयस्य समक्षं तत् पिबति। द्वित्राणि दिनानि तु पिशुना द्विजिह्वा रहस्यघ्राणपरायणा द्वित्रा मठच्छात्राः कथमयं पिबति गोमूत्रम्, वमति वा तद्, कथं विकारयति वदनं मूत्रपानसमय इति सर्वमवलोकयितुं प्रातस्तदानीमुपस्थिताः, कृष्णनाथस्तु सर्वथाऽनवेक्ष्य तान्, यथा न पीयते गोमूत्रम्, पीयते मधुरकषायं चायपेयमिति प्रदर्शयन् स्वैरं गोमूत्रं पपौ। 'कथय, कथय, कथं स्वदते गोमूत्र- मिति- सोपहासं तं पृच्छन्त इमे छात्रा मठवासिभिर्वरिष्ठैश्छात्रैर्भर्त्सिताः तत्यजुः कृष्ण-नाथोपहासव्यवसायम्।

तथाऽप्यन्तरान्तरैव विचलितो विषण्णः कशाभिर्भृशं ताडितो वल्गाया धारितो वाजीव आलानबद्धोऽस्नातः करीवोन्मनाः कृष्णनाथो मनस्येवमकरोत्- 'सर्वथा धिक्कृत इव बहिष्कृत इव तिरस्कृत इवाहं तिष्ठामि मठे सम्प्रति। आत्मनैवात्मनाऽहं निर्वासितः सञ्जात- स्तस्मिन् क्षणे यस्मिन् क्षणे निवेदितो मया स्वकीयं देहलीयात्रावृत्तान्तः स्वान्तेवासिभ्य' इति।

कृष्णनाथस्य चित्तमासीत् सविशेषं विदीर्णं परमगुरूणां सीताचरणानामा-चरणेन। विंशतिवर्षाणि तेषां मनोवाक्कायकर्मभिः सेवा कृता। तस्या एतादृशो विपाकः कथं समजनि? सीताचरणानां सितासितेष्वाचरणेषु सर्वेषु कृष्णनाथोऽभूत्

परमसहयोगी। कीदृशास्ते धर्मशास्त्रानुयायिन इति स सर्वथा जानाति। त एवेदानीं कथमेतादृशाः सञ्जाताः? मठ- वासिभ्य श्छात्रेभ्यश्छात्रवृत्तिरायाति, तस्य वितरणमविधाय कथं मिथ्याप्राप्तिपत्राणि निर्मातव्यानि, मन्दिरे यावान् राशिः आयाति पूजायां समर्पितो दक्षिणासु वा तस्य कथं विनियोगः कार्य इति सर्वं गुह्यं कृष्णनाथस्य विदितम्। चतुःपञ्चदिनानि स देहलीं गतः, एतावता कथं विपर्यासः सञ्जातः?

मुरारीलालः स्वयं दुग्धं पायितो भुजङ्गः इदानीं दशति। यदि कृष्णनाथस्तस्य साहाय्यं नाकरिष्यत्, तर्हि शास्त्रिपरीक्षामपि समुत्तर्तुमसौ नापारयिष्यत्। सम्प्रति तु तेनैव मुरारीलालेन सर्वं साम्राज्यं तस्य स्वायत्तीकृतमासीत्। कृष्णनाथस्य कृते जगत् जीर्णारण्यं जातम्।

इत्थं व्यलीतः सार्धैकमासः। देहल्याः परावृत्य सप्ताहमेकं सप्ताहद्वयं वा कदाचि- दायास्यति जानकीरमणसंस्कृतमहाविद्यालयान्मे नियुक्तिवार्तेत्याशान्वित आसीदसौ। शनैः शनैर्गच्छत्सु दिवेसेषु नितरां भग्ना साऽप्याशा।

एवं चावसितेऽस्य चिरपरिचिते वाक्पाटवे, अस्तङ्गतासु तासु तासु कथासु, विगलितेषु नर्मालापेषु, अनुत्थानोपहतासु हास्यगोष्ठीसु, प्रेयांसोऽप्यस्य सखायो न तथा नेदीयांस इदानीमभूवन्, क्वचिद- स्मान्मुखानि स्वानि सङ्गोप्य ते परिहरन्त्येनम्, न सम्मुखमापतन्ति, नोल्लसन्ति पूर्ववदेनं दृष्ट्वा। कृष्णनाथस्त्वचिन्तयत्- लक्षलक्षशः कोटिशो वा पुरुषा इदानीं तिष्ठन्तो मूत्रयन्ति, न तेषामेषा दशा श्रूयते। मम तावदियं स्थितिर्जाता। अत्र मे जिह्वालौल्यमेव कारणम्। यदि नाश्रावयिष्यमहं सुहृदः स्वयानमूत्रीयम् तर्हि नाभविष्यतद् दण्डविधानस्य प्रायश्चित्तस्यापि वा कथा। अथवा-

वदति रहीमस्तूष्णीं स्थेयं दृष्ट्वा विपर्ययं काले।
आगतमात्रे दिवसे शुभे तु सर्वं शुभं भविता।।

इति सदुक्तमङ्गीकृत्य मया भोक्तव्योऽयं दशापरिणाम इति।

अथैकदा मध्याह्ने सर्वेषु भुक्तवत्सु च्छात्रेषु आदाय स्थालीं भोजनशालाया द्वारे स्थितवति कृष्णनाथे 'पत्रं वर्तते कृष्णनाथस्य' इति पत्रहरस्य

तारचीत्कारमसावशृणोत्। तत्क्षणं चाशङ्कया कौतुकेन चातिमात्रं धडधडायमानहृदयो मठस्य मुख्यद्वारमधावत्- अपश्यच्च द्विचक्रिकया प्रतिष्ठमानं पत्रहरं द्वारे च प्रक्षिप्तं पत्रम्। कस्य पत्रं स्यात्, केन प्रहितं स्यात्? न तस्य कोऽपि स्वजनः, विंशतिवर्षेभ्य स इहैव मठे वसति, न कदापि केनापि तदीयं वार्तं प्रापि, नापि वा तेनाप्यवापि कस्यचिदपि स्वीयस्य स्वजनस्य सङ्केतः।

मठ एव तदीयः संसारोऽभूत्।

पत्रमुद्घाट्य तत्क्षणमसौ वाचितवान् लेखम्। पाठं पाठमेव चकित इव चमत्कृत इव धराया उत्थाप्य नभसि अवस्थापित इव सञ्जातः। पत्रमासीत् देहल्याः जानकीरमण- संस्कृतमहाविद्यालय-प्राचार्यस्य। 'इदमत्र सूच्यते यत् भवान् अस्मिन् महाविद्यालये ......मूलवेतनेन...... महार्घभर्तृकादिसहितेन व्याख्यातृपदे नियोज्यते। सप्ताहावधौ कार्यभारो ग्राह्य इति कृष्णनाथनामोल्लेखपुरस्सरमासीत् सन्देशः।

कृष्णनाथस्य हृदयं नभश्चुम्बदिवोच्छछाल। देहल्यां नियुक्तेस्तु सम्भावनैव सर्वथा तेनेदानीं हृदयात् निस्सारिता आसीत्। क्षणमसौ स्तब्ध इव, शून्ये किमपि निध्यायन्निव चित्रलिखित इव तस्थौ।

– अरे किमिति विस्फारितनेत्रो मां निध्यायसि? - तस्य कृते भोजनमादाय द्वारि उपस्थितः सूदो रघुनाथस्तं स्वस्थालीमग्रे न सारयन्तं दृष्ट्वा समतर्जयत्- 'त्वरस्व। भोजनशालां पिदधामि। समयः जातः।'

- 'रघुकाका! मम नियुक्तिपत्रं समागतम्!'– - स सचीत्कारमाह।

रघुनाथो न किमपि अवबुध्य सत्यमयं विक्षिप्त इति मत्वा तं पश्यति स्म। - 'अरे गृहाण भोजनम्- अन्यथा ददामि तालकं भोजनशाला द्वारि' - इति आक्रोशन्तं तं तत्रैव विहाय, किं करोमि, क्व यामीत्यजानन्निव हस्ताग्रस्थितां स्थालीं तत्रैव निक्षिप्य कृष्णनाथः ततः प्रचलितः। ददर्श च सम्मुखमायान्तं प्यारेलालम्। - 'भोजनं किमर्थं त्यजसि? दश दिनानि अपि नावशिष्टः प्रायश्चित्तावधिरिति निगदन्तं तं सरभसमाश्लिष्य कृष्णनाथ आह- 'देहलीतो मम नियुक्तिपत्रं समागतम्।' -

–'किं कथयसि?'- अनभ्रवृष्ट्या स्नपित इव प्यारेलालः प्राह।

अथ कृष्णनाथेन क्षिप्तां तदीयां स्थालीमादाय, यतः कुतश्चनान्विष्य सूदं रघुनाथं तेनोद्घाट्य भोजनशालां स्थालीं कृष्णनाथस्य स्वयं सज्जयित्वा समाजगाम प्यारेलालः साग्रहं सानुरोधं च 'अरे बुभुक्षैव नास्ती'ति निगदन्तं कृष्णनाथं भोजयितुं प्रावर्तत। दृश्यमिदं प्रैक्षत प्रथमाकक्षायाश्छात्रः कश्चन। त्वरितमेव शान्ते सरसि प्रस्तरक्षेपात् स्यन्दमाना वीचिरेखेव ससार मठे कृष्णनाथस्य व्याख्यातृपदे नियुक्तेर्वार्ता।

अन्येद्युरेव प्रस्थातव्यमनेनेति विज्ञाय व्यग्रा बभूवु- र्मठस्यान्तेवासिनः। कविसुतः कलानिधिः विस्मृत्य कृष्णनाथस्य लघुशङ्काविषयकं स्वोपज्ञं काव्यं कृष्णनाथस्य सौप्रस्थानिकं पद्यबद्धं विधातुं व्यवस्थापयति स्म स्वमनः। अपरे च केचनान्विष्यान्विष्य मठेऽस्य तेषु तेषु कक्षेषु निहितानि विविधवस्तूनि आनीय तानि तत्पुरतः स्थापयन्ति स्म- 'बन्धो कृष्णनाथ, गृहाणेमां कङ्कतिकां गतमासे मया त्वत्तो गृहीताम्, अयं ते पादयामः, सखे तदिदमिदं फेनकं मया गृहीतं गतसप्ताहे त्वत्तः, इदं तेऽङ्गप्रौञ्छनम्, अपीयं लेखनी त्वदीया वाऽन्यस्य वा, ज्येष्ठा भ्रातरः, इयं लघुसिद्धान्तकौमुदी प्रथमायां मां पाठयता भवता प्रदत्ता, अनुमन्यते चेत् श्रीमतां स्मृतिस्वरूपमेनामहं धारयामि- इति ब्रुवाणा सहाध्यायिनः कनिष्ठाश्च छात्रास्तं परिवार्य तस्थुः।

ये केचन द्वित्राः अन्तेवासिनस्तस्मै असूयन्ति स्म मुरारीलाला- दयस्ते सपरिष्वङ्गं प्ररुदन्तस्तं भणन्ति स्म- 'बन्धो, यत् किमपि कथितं, यथा तथा वा कृतमस्माकं तद् विस्मर्तव्यम्-'कर्णाकर्णिकया कृष्णनाथनियुक्तिवार्ता परमगुरून् प्राप्तवती । ते तु तत्क्षणं स्वयमेव कृष्णनाथमवेक्षितुं समागताः उत्कण्ठासाधारणं परितोषं प्रकटीचक्रुः। 'परमगुरवः, अस्य प्रायश्चित्तविषये का भवित्री व्यवस्था, देहल्यां क्व स्थास्यत्ययं क्व लप्स्यते प्रतिदिनं गोमूत्रं प्रातः' इति प्रश्नमुपस्थापयामास कश्चन मुरारीलालस्य सहवर्ती।

प्यारेलालस्तु 'परमगुरवः, कृष्णनाथ इदानीं महाविद्यालये व्याख्याता सञ्जातः, अतः प्रायश्चित्तविधानमस्य कृते शिथिलीकरणीयमित्यन्वरुणत्।

क्षेत्रपतिराह- 'मन्ये गोमूत्राभावे दर्वीपरिमितस्य गङ्गाजलस्य प्रतिदिनं सेवनेन पूर्येत प्रायश्चित्तम्।' सीताचरणस्तु सविस्मितमवादीत्- 'भवतु, तद्विषयेऽपि चिन्तयिष्यामः। इदानीं तु कृष्णनाथोऽयं सुखेन यात्वित्येतादृशी व्यवस्था करणीया।'

-'येनायमिदानीं यानवातायनान्न मूत्रयेत' - इति छात्रेषु कश्चन मन्दस्वरेण प्राह। यैः श्रुतं ते विहसिताः।

स्मरति अन्तिमां तां रात्रिं स्वमठावासस्य कृष्णनाथः। आनिशीथं कृष्णनाथं परिवार्य मठच्छात्राः नाना कथाः कथयन्तः, विविधविधहासपरिहासैर्नर्मगर्भैर्वचोवितानैर्मनोऽस्य रञ्जयन्तस्तस्थुः। निदाघतप्तभूखण्ड इव तेषां सान्निध्यसुखवर्षाभिर्हर्षितमासीत्तदानीं कृष्णनाथस्य मनः। स च विचारयामास- 'अहो अमी सखायः कियन्मयि स्निह्यन्ति, चिन्तयन्ति च मदर्थम्, एतान् उज्झित्वा कथमहं वत्स्यामि देहल्यां यत्र न मे कोऽपि स्वजन इति।

अत्रान्तरे कविसुतः कलानिधिः कृष्णनाथस्य सौप्रस्थानिकम् इति स्वोपज्ञस्य काव्यस्य प्रथमं पद्यं प्रस्तावयामास-

दिल्लीं प्रयाते त्वयि कृष्णनाथे
सर्वे सखायः स्युरिमे त्वनाथाः।
गोपा यथा कृष्णमिव स्मरन्तः
सन्तस्त्वदीया इह ते वसन्तः।।

आयाससाध्यां प्रतिभादारिद्र्यदैन्याददतिस्वल्पसुभाषितां वर्णच्छटाच्छुरितामिव रूपरहितां चिरण्टीं तां कवितामपि श्रुत्वा सर्वे साधु, साधु, के भावाः, को रसः, का पदशय्या, कीदृशं यमकम्, का उपमा, का कल्पना, कश्च मित्रस्नेह इति विजृम्भमाणाभिरतिशयोक्तिभिः प्रशशंसुर्जहसुश्च। इत्थं कृष्णनाथसङ्गनीतानां दिवसानां विविधघटनानां स्मरणेन आगत्य देहलीं वयमपि मिलिष्यामस्त्वामित्याश्वासनेन, अस्मत्कृतेऽन्वेष्टव्या तत्र सेवा कापीत्यनुरोधेन, स्मरणीया वयं तत्र गत्वा, प्रेषणीयं पत्रं प्रतिसप्ताहमित्यादिप्रार्थनाभिस्तेषां सा रात्रिरेव व्यरंसीत्। न तस्यां रात्रौ मठे कोऽपि च्छात्रः सुष्वाप। सम्प्राप्तायां

पूर्वसन्ध्यायां ते तस्मिन्नेव कक्षे बलवत्या निद्रया वशीकृताः क्वचिदेकोऽपरस्य वक्षसि शिरो निधायापरत्र परोऽन्यस्यांसौ गृहीत्वा, कश्चन कस्यचन जानौ निधाय कर्णपटीमिति शेरते स्म। तेषां मध्ये एव कृष्णनाथोऽपि प्राप्तप्राये प्रभाते निद्राधीनतां गतः सहसा विचित्रं स्वप्नं ददर्श- 'देहल्यां जानकीरमणसंस्कृतमहाविद्यालयेऽसौ वर्तते। तत्र प्राचार्यः सर्वान् प्राध्यापकानाहूय पृच्छति- अद्य के के प्रातर्गोमूत्रं न पीतवन्तः? ये पीतवन्तस्ते मम दक्षिणत एकस्यां पङ्क्तौ तिष्ठन्तु। ये न पीतवन्तस्ते वामतस्तिष्ठन्तु। शतं प्राध्यापकेषु ऊनपञ्चाशदेकस्यां पङ्क्तौ स्थिता ऊनपञ्चाशच्चान्यस्याम्। अवशिष्टः कृष्णनाथस्तत्पृष्ठे लग्नोऽज्ञातनामधेयः कश्चनान्यः प्राध्यापकः। प्राचार्यः कृष्णनाथं तं च पृच्छति- 'अरे गोमूत्रं पीतं न वा त्वया च त्वया च?' कृष्णनाथः सहसा किमपि वक्तुं न प्रभवति। मन्ये न पीतं त्वया गोमूत्रं, त्वरितं गच्छ, गोमूत्रं चषकपरिमितं पिब, अन्यथा निष्कासयिष्यामः सेवात' इति। आदेशमिमं शृण्वन्नेव सहसा जजागार कृष्णनाथः। जाग्रतश्चाशेषस्वप्नवृत्तान्तं विस्मृत्य चषकपरिमितं गोमूत्रं पिबेत्येतावन्मात्रमेव वाक्यं स सस्मार। तत्क्षणं च 'अरे अद्य भास्वान् उदियाय, गावो यदि विमुक्तास्तर्हि कथं प्राप्स्यामि गोमूत्र'मिति चिन्ताचर्चितचित्तश्चषकमादाय गोशालामधावत्। गोदोहमनु चारार्थं विमुच्यमानासु गोषु एकां मूत्रमाणामवलोक्य चषकं तत्पृष्ठतो लगयित्वा सद्यो गोमूत्रं सङ्गृह्य सम्प्राप्तोऽसौ महेशमहोदयस्य कक्षम्। महेशस्तु तं तथा प्राप्तं दृष्ट्वा 'अरे प्रोपेश्वरवर्या आगम्यताम्' इत्यवादीत्। 'अरे कथमद्य परिवर्तित इवास्य स्वरः, कथं प्रोपेश्वरपदमधिरोपितोऽस्म्यनेनेति' प्रश्नं समुदितमपि स्वान्तःकुक्षौ परतो निक्षिप्य कृष्णनाथस्तमाह- महोदयाः, गोमूत्रपानार्थमागतोऽस्मीति।'

महेश आह- 'अरे अद्यापि गोमूत्रपानम्! कृष्णनाथस्तु सर्वथा अभ्यस्त इव मुद्रितनासिकः गलनलादधोऽवतार्य चषकमितं गोमूत्रं 'नमो नम' इति भणित्वा ततः प्रचलितः। प्रचलंश्चासौ सस्मार- 'अद्य मया गन्तव्यमितः। महोदयाय प्रणामो न कृतः।'

परन्तु अवकाश एव तदा नाभूत्। नववादने वाहनमासीत्। प्रस्थानात्

प्राक् साहित्य- व्याकरणाचार्यान् कल्याणशर्मणः, न्यायाचार्यान् लक्ष्मीधरपण्डितांश्च प्रणम्य तयोराशिषं गृहीत्वा सोऽभिवादयितुं जगाम परमगुरुन्। परमगुरवोऽपि देवताप्रसादभण्डारगृहात् प्रचुरं नैवेद्यं समादाय तस्य पाथेयार्थं पोट्टलिकां बद्ध्वा सानुग्रहम् आशीर्भिः सार्धं तस्मै ददुः। अस्यैव भण्डारगृहस्य मिष्टान्नेषु कियती स्पृहा कदाचिदभवत्। परन्तु तस्मिन् समये तु गोमूत्र- पानाज्जिह्वा कषायिता न किमपि काङ्क्षति स्म, अनिद्रया च घूर्णते स्म शिरः।

अथ स्थानकं प्रचलिते तस्मिन् समं प्रचलिताः अभूवन् सर्वेऽपि मठच्छात्राः। आगतमात्र एव याने तेषु त्रिचतुर्भिः पूर्वमेव वर्गिकामारुह्य स्थानमेकं कृष्णनाथस्य कृते स्वायत्तीकृतं सुखमसौ तत्र समुपवेशितः। कनिष्ठैः प्रणम्यमानः समवयस्कैः अभिनन्द्यमानः कृष्णनाथस्तदानीं त्रुटितसूत्रं पतङ्गमिव उत्खातप्रतिरोप्यमाणः सहकारपादप इव स्वात्मानममन्यत।

अथ दत्तसङ्केते प्रतिष्ठमाने याने रक्षकेण विहितायां शीत्कृत्यां कृष्णनाथस्यासनासन्नं वातायनं परिवार्य स्थितेषु च्छात्रेषु 'अरे परमगुरवः, परमगुरव' इति उत्थितोऽभूद् रवः। तत्क्षणं च समागतेभ्यः परमगुरुभ्यः तैर्वातायनपुरोऽवकाशो विनिर्मितोऽभूत्। परमगुरवस्तु यानादवतरीतुमुपक्रममाणं विनिवार्य कृष्णनाथं वातायनादेव अन्तर्नीत्वा स्वहस्तं तस्य मस्तके सारयित्वा करतलं सगद्गदमूचुः- 'बचवाः, चिरञ्जीव, जयस्व देहलीं स्वविद्याबुद्धिबलेनेति। अथ च विनिस्सार्य काचकुतुपमेकं स्वकञ्चुकात् समर्पयन्तस्त आहुः– 'बचवाः, तत्र क्व प्राप्येत गोमूत्रम्? अस्मिन् कुतुपे मया स्वल्पं तत् स्थापितम्। कामं बिन्दुद्वयमेव प्रतिदिनं सेवस्व, परं प्रायश्चित्तावधौ गोमूत्रसेवनं न परिहर्तव्यमिति।

कृष्णनाथस्तु गोमूत्रकुतुपं करतले धारयन् सादरमञ्जलिमबध्नात्। अस्मिन्नेव क्षणे प्रस्थितं यानम्।

इति एतत्सर्वम् अतीतं वृत्तान्तं स्मारं स्मारं स्मयमानोऽसुप्यत याने डा. कृष्णनाथः।

यानम् अन्येद्युः प्रातः श्रीपतिपुरं प्राप। डा. कृष्णनाथमिश्रः सहयोगिना

दत्तमहोदयेन सह अवतीर्णः। तत्क्षणमेव त्रयः किशोराः धावं धावं तयोः सकाशमागताः। तेषु अग्रगामी स्वपार्श्ववर्तिनमाह- कथितं त्वासीन्मया... ते वातानुकूलयानादेवावतरिष्यन्तीति!

कृष्णनाथस्तु मूर्ध्नि शिखा, ललाटे चन्दनतिलकम्, अंसे पीतदुकूलम्, कटौ च श्वेतपरिधानम् इति तेषां वेषं दृष्ट्वैव ज्ञातवान् यदिमे संस्कृतपाठशालायाश्छात्राः स्युः। सोऽपृच्छत्- श्रीरामचन्द्रमठात् आगता भवन्तः?

एवम्, श्रीमन्निति उक्त्वा सर्वे ते तं प्राणमन्। सप्रणाममसौ पृष्टवान्- श्रीमन्तः भवन्तः देहलीतः समायाताः संस्कृतविद्यालयस्य-

इति अर्धोक्त एव दत्तमहाशयः भाययन्निव तर्जयन्निव तमाह- एवम्, एवम्, परिच्छदं नय, यानं- वानं किमपि वर्तते वा न वा?

अस्ति महोदयाः, सर्वमस्ति- तत्क्षणं ससंरम्भं सर्वे ते सम्भूय अवदन्।

कृष्णनाथः अस्मयत।

श्रेष्ठिनो दीनानाथस्य भवने निवासव्यवस्था कृता आसीत्, मठस्यैव कस्मिंश्चित् कक्षे निवासं करिष्याव इति उक्त्वा कृष्णनाथेन सा निषिद्धा। दत्तमहोदया अनेन प्रस्तावेन न तथा प्रसन्नास्तथापि मठे आगत्य देवालये श्रीरामविग्रहं दर्शं दर्शं प्रसन्ना अभवन्।

स्वयं मुरारीलालः रामदर्शनार्थमनयत् तौ।

दत्तमहोदयः श्रीरामस्यैतादृशो भक्त इति कृष्णनाथो नाजानात्। रामस्य विग्रहं दर्शं दर्शमयं भक्तिभावः सविशेषमुन्मिषति तस्य। पूजकात् चरणामृतं गृह्णन् स प्रभूतं धनराशिं दक्षिणात्वेन स्थाल्यां समार्पयत्, आह च कृष्णनाथम्- महोदयाः, भवतामनुकम्पयाद्य प्रभुर्दृष्टः, महानानन्दो लब्धः।

आनन्दोऽयं भगवतो रामस्य दर्शनेन जातः किंवा पदोन्नतिदात्रा कृष्णनाथेन सनाथीभूय बभूव? कृष्णनाथस्यापि मनसि आसीत् कौतूहलम्- कीदृशं भविता सम्प्रति प्रभूणां दर्शनं मन्दिर इति। पुनरपि पुरातनी भक्तिभावना तत्र गत्वा तस्य चित्ते जागरिता। यदा पञ्चवर्षीयं तं परमगुरव इह आनीयोपानयन्त,

ततश्च सोऽस्मिन्मन्दिरे विधिवदर्चनां कर्तुमपि नियोजितः। मूर्ध्नि दीर्घा शिखा, ललाटे चन्दनतिलकम्, अंसे पीतदुकूलम्, कटौ च श्वेत- परिधानम्। अनेन वेषेण यदा स आरात्रिकं चकार मन्दिरे तदा भगवान् रामः सस्मितं स्वीकरोति स्म तदीयमारात्रिकम्। स मठस्य अन्तेवासिनो यदा वर्णयति आरात्रिककाले भगवतो रामस्य वदने विकसितं स्मितं, तदा केचन तं पाषण्डमाहुः, केचन सम्भाव्यत एतदिति न्यगादिषुः। मन्दिराभ्यन्तरे स भक्तैः 'छोटे पुजारी जी' इत्यभिधीयते स्म। मन्दिराद् विनिर्गत्य स पाठशालापरिसरे कृष्णनाथायते, कल्लू यति वा। यं विग्रहमिदानीमसौ पश्यति सम्मुखे, न स तदानीमभूत् तस्य कृते पाषाणः। स पाषाणविग्रहान् सजीवान् प्रभून् कल्पयित्वा तैरालपति स्म चिरम्। स तेषां पुरो हसति, रोदिति, तानुपालभते स्म वा। अतीतः स चत्वारिंश- द्वर्षपूर्ववर्ती कालः। नेयं रामस्य मूर्तिः, मम बन्धुरयमिति तदानीं तस्य भावोऽभवत्। बन्धो राम इत्येव तां मूर्तिमसौ समबोधयत्, अयं च बन्धू रामः सधैर्यं तस्य लपितं शृणोति स्म तदानीम्। असमञ्जसे सङ्कटे च स एव जायते स्म त्राता उद्धारक- स्तस्य। यथा यथा शैशवमत्येति स्म, तथा तथा दुर्लालितस्य बालकस्येव बन्धुं रामं प्रति तस्य लपितानि क्षीयन्ते स्म। तथापि बन्धुरयं मे, अयं मे त्राता ममाशरणस्य कृते शरणदातेति विश्वासस्तदानीम- क्षतोऽतिष्ठत्। परमयं विश्वासोऽपि भग्नस्तदा यदाऽस्मिन्नेव मठे प्रायश्चित्तभाग- भवदसौ। प्रायश्चित्तविधाने नेदानीं पूजयितुं प्रभवामि प्रभुं रामम्, मन्दिरे प्रवेष्टुमपि न पारयामीति समधिकतरमदूयत कृष्णनाथस्य मनः। येन प्रभुणा शबर्या अहल्यायाश्च उद्धारो विहितस्स न माम् अन्त्यजमिव, पराहतमिव ध्वस्तमिव प्रेक्षितुं शक्नोति, इदानीमपि समेत्य मामुद्धरिष्यति अस्मात् सङ्कटगर्तात् यदिदं निखातं मत्कृते मुरारीलालेनेति प्रथमं तु तदीया दृढा मतिरभूत्। असह्ययन्त्रणयाऽऽक्रान्तोऽसौ एकदा अर्धरात्रे अस्यैव मन्दिरस्य सोपाने सशिरोघातं समाह्वयद् बन्धुं रामम्। प्रातर्यावत् अयं मम बन्धुरयं मां त्रास्यतीति विश्वासस्तस्य भग्नः। अथ - नायं रामः, अयं तु मुरारीलाल- शलभशास्त्रिप्रभृतीनां दुरभिसन्धेर्निमित्तभूतः पाषाण इति मयैव स्वीयोऽभिशाप

इदानीं सर्वथा एकाकिना सह्य इति स व्यचारयत्।

पूजकेन करतले दत्तं चरणामृतमादायासौ झटिति तेभ्यो विग्रहेभ्यो मुखं परावर्तयामास। परावर्तनकाले सकृत् दृष्टिर्निपतिता विग्रहेषु। सीता-राम-लक्ष्मणानां त एव विग्रहाः परं तेषां शृङ्गारः परिधानानि च सम्प्रति समधिकतरं भव्यानि।

– श्रीमद्भिः श्रेष्ठिदीनानाथस्य भवने आवासव्यवस्था कथं निषिद्धा? यद्यपि अत्यन्तं क्षुद्रप्रायं नगरमिदं श्रीपतिपुरम्, न सन्त्यत्र भव्याः पान्थशालास्तथापि भवन्तस्तु अत्र बहूनि वर्षाणि उषितपूर्वाः, श्रेष्ठिनो दीनानाथस्य भवनं तु भवन्तो जानन्त्येव... मुरारीलालस्तं सादरं ससम्भ्रमं सम्बोधयति स्म।

कथं न जानीयात् श्रेष्ठिनो दीनानाथस्य भवनं सः? यत्र कार्यं कुर्वती माता दिवं गता, यत्र पित्रा असह्यानि दुःखानि सोढानि, यतः चतुर्वर्षीय एव स परमगुरवे समर्पितः...

– सर्वमुपपन्नमत्रापि.. न बाधा कापि'– कृष्णनाथोऽवदत्।

– 'यस्यां संस्थायां निरीक्षणाय समागतास्तत्र यादृशमतिथिगृहं यादृशी तत्र व्यवस्था सा एव विदुरगृहे श्रीकृष्ण इव महोदयैः स्वीकृता– एतेषामुदारतैव'-- दत्तमहोदयः कथयन्नास्त–

– 'सत्यम्, सत्यम्'– मुरारीलालो ब्रूते स्म।

अथ विद्यालयस्य निरीक्षणं विहितम्। सङ्गणकयन्त्राय कक्षं क्व निर्माप्येत इति विषयमधिकृत्य प्राचार्येण साकं मुरारीलालेनान्यैश्च साकं सविस्तरं चर्चा विहिता। पाठशालायाः कायाकल्पः सञ्जात इति प्रतिभाति। विंशतिवर्षेसु श्रीपतिपुरमेव परिवर्तितम्। पाठशालां मन्दिरं चान्तरा आसीत् प्राङ्गणम्, तत्रासीद् गोशाला। गावोऽस्मिन्नेव प्राङ्गणे व्यचरन्। प्रथमामध्यमयोश्छात्राः पर्यायेण गोसेवां चक्रुः। 'समीपवर्तिनि ग्रामे मठस्य आयत्तं वर्तते क्षेत्रमेकम्, तत्रैव गोशाला स्थानान्तरिता। गोशालाया अपि भवति स्वल्प आयः, ततोऽप्यधिकतर आयो जायते मठस्य पुरो यानि आपणाः विनिर्मिताः तेभ्यो

भवती'ति मुरारीलालो विज्ञापयपति स्म।

...पुरा यत्र गोव्रजोऽभूत्, तत्राधुना शारीरिकशिक्षाविभागस्य लघु भवनमभवत्। पुरतो भवनं लसति क्रीडाङ्गणम्।

पुरा इदमेव प्राङ्गणं गोमयखण्डैः प्रावृतं भवति स्म। इदानीं तत्र केचन छात्राः पादकन्दुकं क्रीडन्ति। पाठशालाया आधुनिकीकरणार्थं यदनुदानं वितीर्णं, तस्मिन्नासीदयमप्यनुबन्धः– यत् छात्रेषु क्रीडापाटवं शरीरदृशा दक्षतां चापादयितुं पाठशालायां शारीरिक- शिक्षा विभागः, क्रीडाङ्गणमेकमवश्यं स्यात्।

गतवर्षस्य यदनुदानं पाठशालाया आधुनिकीकरणाय यन्त्रादिक्रयाय प्रेषितं तस्य उपयोगे कथं त्रुटयः सञ्जाता इति दत्तमहोदयो निर्दिशति स्म। कृष्णनाथेनापि मुरारीलाले पश्यति सम्यक् शासितः श्रीराममठस्य कार्यालयाधीक्षकः। एवमेव मध्याह्नवेला समागता। प्रातराशस्तु साग्रहं परिवेषितः भोजितश्च। तदुपरि मुहुर्मुहुश्चायपेयं शीतलपेयानि वा। कृष्णनाथस्य उदराभ्यन्तरे मूत्राशयः स्फुटमान इव आसीत्।

– कुत्र वर्तते? '– प्रधानाचार्यस्य कक्षाद् बहिरेत्य स पृच्छति स्म छात्रमेकम्।

– किम् श्रीमन्?

– तत् स्थानम्... इति कथयन् कृष्णनाथः दक्षिणहस्तस्य तर्जनीं दक्षिणकर्णमभितो द्विश्चारयन्निङ्गितं चकार।

- अत्रैव तावदस्ति अस्ति तावत्– महोदय आगम्यताम् .. इतः इतः ... इति कथयन् स छात्रः क्रीडाङ्गणस्य पश्चाद् भागे विनिर्मितं शारीरिक-शिक्षाविभागस्य भवनं प्रति तं निनाय। भवनस्यास्य सद्य एव निरीक्षणं कृतम्, परन्तु अस्यैव एकस्मिन् कोणे वर्तते प्रसाधनगृहमिति तदानीं न दृष्टम्।

प्रसाधनगृहे अन्तः प्रविश्य कृष्णनाथेनावलोकितम्- तिष्ठन्मूत्रयितॄन् 'लघू'कर्तुं विनिर्मितान्यासन् पाश्चात्त्यशैलीमनुसृतानि स्वच्छानि शौचस्थानानि ।

उदियाय काचन स्मितरेखा कृष्णनाथस्याधरोष्ठयोः।

—0000—

करुणा

च्याङ्माइनगरात् समागतं रेलयानं बैङ्काकनगरस्य अवस्थानके तस्थौ। अवस्थानकमिदम् ओलम्फोङ् (अलम् ब्रह्म) इति संज्ञप्तं बैङ्काकनगरस्य केन्द्रस्थलम्। यानस्य प्रथमश्रेणीपिटकात् कश्चन प्रौढोऽपि युवेव प्रतीयमानः कपाटवक्षाः परिणद्धकन्धरः नातिह्रस्वो नातिदीर्घो दरस्मितस्मेराननोऽपि गभीराकृतिश्चतुरोऽपि शिशुरिव मुग्धमसृणदर्शनः सुदर्शनः पुरुषोऽवततार। अयं कित्तिफोमनामा व्यवसायी, च्याङ्माईनगरात् समागतः।

च्याङ्माइनगरं थाईदेशस्य नगरेषु बैङ्काकनगरमनु विशालतमं परमरमणीयं नगरम्। कित्तिफोमोऽयं तत्र वस्त्राणां व्यवसायं कुरुते, तत्रत्येषु प्रथितेषूद्योगपतिषु परिगण्यते। सफलता सम्प्रत्यस्य चुम्बति चरणौ। परन्तु नास्य जीवनयात्रा ऋजुना पथा सञ्चचार। न केवलं विघ्नैरपितु दुःखैर्मुहुर्मुहुः प्रतिहन्यमानः विचलन् वेल्लन् प्ररुदन् खिद्यन् स्विद्यन् वाऽयम् अस्यां यात्रायां कथञ्चिद् अग्रे ससार।

कित्तिफोम इति नाम थाईभाषामनुसरति, यद्यपि मूलतो नास्ति कित्तिफोमस्थाईदेशजः। कित्तिफोम इति शब्दस्य संस्कृतरूपं भवति कीर्तिब्रह्म इति। विलक्षणोऽयं थाईदेशः प्रायशः षष्टिवर्षेभ्यः प्राक् सियाम- (श्याम)-देश इति नाम्ना कामप्यभिख्यां गतः। एकतस्त्वत्र भगवतो बुद्धस्य करुणाधारा सर्वत्र प्रवहन्त्यनुभूयते। करुणा-शब्दस्यापि 'कृपया' इत्यर्थे व्यवहारो भवति थाईभाषायाम्। अपरतोऽत्रत्या जनाः स्वैः स्वैर्नामभिः रामं वा हनुमन्तं वा समृद्धिं वा सम्पत्तिं वा कृष्णं वा बलभद्रं वा ब्रह्म वा ब्रह्माणं वा तैस्तैस्तद्भवैः शब्दैर्वहन्ति, तथैव अत्रत्यानि भवनानि राजमार्गाश्च नामभी रामायणस्य महाभारतस्य च पात्राणि प्रतिनिधीकुर्वन्ति। ब्रह्मशब्दस्य बरोम इति वा फोम इति वा रूपं सर्वं किलैतद् ब्रह्म इति श्रुतिवचः स्मारयदिह अवस्थानकनामसु आपणनामसु रथ्यानामसु विजृम्भते। अत्रत्याश्चक्रिवंशीयाः शासकाः राम

इत्युपाधिं धारयन्ति। रामप्रथमात् रामाष्टमं यावत् महान्तो राजान इमं देशं शासति स्म। सम्प्रति राजा रामनवमो फूमिफोलः अदुल्यथेजः (भूमिबलः अतुल्यतेजाः) इह शास्ति। यथा राजानस्तथैव राजमार्गाः रामसंज्ञां वहन्ति। रामप्रथमात् रामनवमं यावत् सन्ति बैङ्काकनगरे मुख्याः राजमार्गाः।

अधिस्कन्धं परिच्छदं लम्बयित्वा अवस्थानकस्य स्फटिकधवले कुट्टिमे प्रचचाल कित्तिफोमः। अवस्थानके अदृश्यत विविधवस्तु- विक्रयकेन्द्रमेकम्। तत्र एकस्मिन् कोणे कानिचित् पुस्तकानि, वार्तापत्राणि च स्थापितानि। कयाऽपि प्रेरणया कित्तिपोमो विक्रयकेन्द्रमुपसृत्य अद्यतनं वार्तापत्रमेकमक्रीणात्। मुखपृष्ठ एव स्थूलाक्षरैर्मुद्रिते वृत्ते निपपात तस्य दृष्टिः –वाटप्रतूनाम्-विहारस्य प्रधानभिक्षुः सिरिकितः स्वर्णमूर्तीनां तस्करकार्ये संलग्नो निगृहीत इति।

कित्तिफोमः क्षणं स्तब्ध आस। च्याङ्माईनगरात् प्रायशः प्रतिमासं सकृद्वा द्विस्त्रिर्वा बैङ्काके आगमनं तस्य भवति। वाटप्रतूनाम-मन्दिरस्य विहारेऽसौ शैशवे न्यवसत्। मन्दिरेण नास्ति इदानीं सम्पर्कः। मन्दिरस्य विशालं प्राङ्गणम्। तत्र तस्याध्ययनम्, भिक्षुभिर्दत्तेन अन्नेन जीवननिर्वाहः। भिक्षवः प्रतिदिनं प्रचुरां भिक्षां लभन्ते, लभन्ते च नाना वस्तूनि श्रद्धालुभिरुपहाररूपेण दत्तानि। तानि सर्वाणि वस्तूनि तैर्नापेक्ष्यन्ते, तानि प्रायस्ते करुणया सामनेरेभ्यो ददति। एवमेव भिक्षान्नमपि ते बहुशो ददत्येव सामनेरेभ्यः। तेन भिक्षान्नेन तस्य शरीरपरमाणवो निर्मिताः। भगवतो बुद्धस्य कारुण्यधारा देहस्य प्रतिस्नायु प्रवहति तस्य। परन्तु सिरिकितस्य निर्घृणमाचरणम् विच्छिद्य तां कमपि विषप्रवाहं तत्र समचारयत्। । – 'अनेन सामनेरेण इयं स्वर्णप्रतिमा भगवतश्चोरिता। पश्यत अस्य वटोर्वञ्चकत्वम्। अरे दुष्ट, अरे पाटच्चर! किं कृतं त्वया? त्वया अस्य मन्दिरस्य नाम कलङ्कितम्- इतीमे सिरिकितस्याङ्गारसदृक्षाः शब्दाः कित्तिफोमस्य कर्णयोः पुनरपि तप्तायःशलाका इव प्रविविशुः। तिरश्चीनम् अलातशल्यम् अन्तःप्रत्युप्तमिव सहसा केनचित् पुनरुद्घाटितम्। विविधैर्भावैः शबलितं ताभिस्ताभिः स्मृतिभिस्तरङ्गि- तमभूत्तस्य चित्तम्। स्वप्नं पश्यन्निव प्रेताविष्ट इव कित्तिफोमोऽ- वस्थानकात् बहिराययौ।

अवस्थानकाद् बहिः प्रसृतो रामचतुर्थो नाम राजमार्गः, विविधैः हट्टैः आपणैः सङ्कीर्णः, वाहनसङ्घट्ट- सङ्कुलः। निकषैतद् दक्षिणपूर्वस्यां दिशि विलसति 'वाट ओलम्फोङ्' इत्याख्यं सुमनोहरं बुद्धमन्दिरम्, पश्चिमोत्तरकोणे चास्य चाकचिक्येन सिङ्घापुरं (सिंहपुरम्) हाङ्काङ्नगरं वानुकुर्वाणः चीनापणः योवराट् (युवराज) नामा। युवराजेन संसक्तो वर्तते फहुराट् (प्रभुराज) इति प्रसिद्धिं गतो भारतीयानामापणः।

व्यवसायेन वणिक् कित्तिफोमो वस्त्रैर्व्यवहरति, फहुराटे च वर्तते वस्त्राणां सुविशाल आपणः, तत्रैवाद्य विशिष्य कार्यं कित्तिफोमस्य वर्तते। तथाप्यसौ आनिशं यात्रां विधाय सद्य एव यानादवतीर्णः, पान्थशालां गत्वा विश्रमितुमिच्छति।

अन्यच्च- वार्तापत्रे दृष्टं शीर्षकं तस्य मनः अमथ्नात्। पान्थशालां प्राप्य स्नात्वा भुक्त्वा विश्रान्तोऽपराह्णे फहुराटं गत्वा वाणिज्यकार्यं साधयिष्य इति तेन चिन्तितमासीत्। टैक्सीयानं गृहीत्वा पान्थशालां प्राप्स्ये इति मनसि कुर्वन्नप्युन्मना असौ राजपथे पद्भ्यामेव असरत्। द्वित्राः टैक्सीचालकाः तं परिच्छदसहितं राजमार्गे सरन्तमवलोक्य स्वस्वयानम् अमन्थरयन्, तथापि यानावरोधाय तस्य करतलं न प्रससार। द्वादशभिर्होराभिः उपविष्ट- स्यास्य निबद्धाविव चरणौ अनेन सञ्चरणेन सुखमेवान्वभूताम्।

अवस्थानकाद् बहिरागत्य रामचतुर्थमार्गे चलति स्म सः। मार्गे विकीर्णः कवोष्ण आतपः। स्वकरैर्ललाटमस्य स्पृशति स्म भास्करः। परिचितो वर्तते कित्तिफोमस्य रामचतुर्थमार्गः। समीपमेवास्मिन् मार्गे परमविशालं मनोहरं लुम्पिनी इत्याख्याम् भगवतो बुद्धस्य नेपालदेशस्थितां समनामधेयायां जन्मस्थलीं स्मारयद् विलसति किञ्चिदुपवनम्। अस्मिन् उपवने विद्यन्ते विविधा अभ्रंल्लिहा वृक्षाः। सरति शीतलः समीरः। समीरोऽयं स्पृष्ट्वा स्पृष्ट्वा कित्तिफोमस्य यात्राक्लान्तं गात्रं तत्र संवाहनमिव व्यदधात्। कित्तिफोम उपवनं प्रविश्य एकस्मिन् शिलापट्टे उपविष्टः।

कित्तिफोमो वर्तते सर्वथा एकाकी। विवाहितोऽप्यविवाहितः। नैकाभिर्योषिद्भिः कृतसंसर्गोऽपि चिरकुमार इव। सकुटुम्बोऽप्यकुटुम्ब इव।

पत्नी आसीत्, परिवार आसीत्। तत्सर्वं दैवेनापहस्तिततम्। पत्नी आसीत् साक्षाद् विपदा। तस्याः स्मृतिरपि मर्म कृन्तति। एका तनया आसीत् तस्य- - सिरी। सिरीं स्मारं स्मारं भवति वेदनाविगलितं हृदयम्। विपदा तु क्वापि स्यात्, सिरी कीदृशी स्यात्? विपदया सा रक्षिता वा, तस्याः अन्यथा कृतं किमपि वा विपदया?

सिरी गता। कित्तिफोमस्य जीवनात् समग्रा श्रीरेव गता।

किमर्थमसौ लुम्पिन्यामेवमुपविष्टः? स्मृतम्, अरे अस्य खलु वार्तापत्रस्य कृते। क्वचित् स्वैरमुपविश्य प्रथमं वृत्तमिदं पठामीति विचिन्त्य इह स समागतः। वार्तापत्रस्य मुखपृष्ठे काचन वार्ता स्थूलाक्षरैः प्रकाशिता। वार्ताहराः वार्तापत्रसम्पादका वार्तापत्रस्य सहस्र संख्याकाः पाठका न जानीयुर्यदस्यां वार्तायां गुम्फिता अस्ति कीत्तिफोमस्यापि जीवनगाथा।

'विहारस्य प्रधानभिक्षुः सिरिकितः तस्करकार्ये संलग्नो निगृहीतः। असौ भिक्षुः प्रायशस्त्रिंशद्वर्षैः प्राचीनानां बहुमूल्यानां मूर्तीनाम् अवैधविक्रयं कुर्वाण आसीत्। फलभाननाम व्यवसायी वर्तते अस्मिन् कर्मणि तस्य सहायकः। सोऽपि लोप्त्रेण गृहीतः कुम्भीलकः. . 'वार्तया सह वर्तते भदन्तस्य सिरिकितस्य रमणीयं चित्रम्, अन्यत्र च फलभान- स्यापि चित्रम्।

वार्तां पाठं पाठं कित्तिफोमस्य नयनयोरग्रे पूर्वप्रसङ्गाः नानट्यमाना अनृत्यन्।

इदमेव लुम्पिन्युपवनं विद्यते, यत्रासौ सिरिकितं प्रथमं ददर्श। समक्षं यान्युत्तुङ्गानि गगनचुम्बीनि भवनानि इदानीं दृश्यन्ते तानि तदानीं नासन्। अस्मिन् लुम्पिन्युपवने अनुविद्धाः सन्तिः तस्य स्मृतीनां केचन निधयः। दिवङ्गतायां मातरि तोङ्ल्यां अनन्याफथेसं (अरण्यप्रदेशं) विहाय किशोरोऽयं कथञ्चित् बैङ्काकनगरं प्राप, तदानी प्रथममस्मिन्नेवोपवने समागतः। कति वर्षा व्यतीताः। तदानीमसौ दशवर्षकल्पः स्यात्। इदानीमस्य वयः पूरयति पञ्चचत्वारिंशदब्दान्। त्रिंशदब्देभ्यः प्राक् ततोऽपि पूर्वतरं वा घटिताः मर्मदारणाः प्रसङ्गाः कीत्तिफोमस्य नेत्रयोरग्रे आविर्भूताः। तन्द्रामसौ अवाप।

कित्तिफोमो वस्तुतो नास्ति मूलतस्थाईदेशनिवासी। पितरावस्य काम्बोजदेशवास्तव्यौ अभूताम्। थाईदेशस्य दक्षिणतो वर्तते अरण्यप्रदेशो नाम स्फीतो महान् जनपदः, यश्चात्रत्यैस्थाईभाषायाम् अनन्याफथेस इत्यभिधीयते। अरण्यप्रदेशेन संसक्ता वर्तन्ते कम्बोडियादेशस्य पुरातनकाले काम्बोज इति संज्ञप्तस्य सीमानः। सीमानं लङ्घयित्वा प्रथमं प्राप्यते पोईपेटनगरम्, यत्र विलसन्ति विश्वविश्रुतानि अङ्कोरवाट (नगरवाट)-मन्दिराणि। अस्मिन्नेव पोईपेटनगरे कित्तिफोमो जनिमलभत। पितुर्नाम आसीत् लियोङ्ग- यङ्-बोई इति। पिता मातरं अतितरां स्नेहेन तोङ्ली इत्याह्वयति स्म। कित्तिफोमो न जानाति तोङ्ली इति वर्तते मातुः वास्तविकं नाम, पित्रा दत्तं वा अस्याः कृते प्रेमसंज्ञानम्। कम्बोडियादेशस्य जनपदे वर्तते परमविशालसरोवराणां सम्राज्ञीव विस्तारेण सागरमुपहसन्तीव तोङ्ली सेप् इत्याख्या सरसी। सरसीयं वरीवृत्यते कम्बोडियादेशस्य जीवनदायिनी। अस्याः मधुरे जले प्रवर्धन्ते कोटिशो मत्स्याः नानाजातीयाः। सहस्रशो जना मत्स्यव्यवसाये संलग्नाः। अस्याः सरस्याः तटे एव कम्फोङ् फ्लूक इत्यस्मिन् ग्रामे कित्तिफोमस्य माता जनिमलभत। जालोपजीवी तस्याः पिता क्वचित् मेलके ददर्श सरलहृदयं युवानं लियोङ्गम्। स्वदुहित्रा चास्य परिणयमङ्गलं प्रस्तावयामास।

विवाहानन्तरं सुखमयमासीज्जीवनं तोङ्ली-लियोङ्गयोः। परन्तु काम्बोजदेशस्ये- तिहासे भीषणतमः सङ्कटकालः तदानीमेव प्रारब्धः। उदारं जनप्रियं शासकं राजकुमार- नारदेमसिंहानूकं (नरदेवं सिंहानुगं) विस्थाप्य प्रारब्धा काम्बोजदेशे पालपोट इत्याख्यस्य निरङ्कुशा सत्ता। प्रारब्धं दमनचक्रम्। नरसंहारस्य परम्परा कंस-जरासन्ध-हिटलर- मुसोलिनी-ईदीअमीनादीनां जघन्यां पद्धतिमनुसरन्ती अजृम्भत। स्वस्तिककाष्ठे इव यीशु- र्मानवता सङ्कटे अलम्बत। निर्वासितोऽभूद् राजकुमारो नारदेमसिंहानूकः। सर्वत्र भयमादधानः पिशिताशनानां छाया इव आतङ्कः प्रासरत्। सहस्रशो जनाः प्रतिदिवसं हन्यन्ते स्म। कीत्तिफोमस्य पिता लियोङ्गो राजकुमारसिंहानूकस्य परमभक्तः सरलहृदयः कृषीवलो निरपराधोऽपि पोलपाटसैनिकैर्निगृहीतः निर्दयं च हतः।

माता तोङ्ली पोईपेटपत्तनात् पलायिता कथञ्चिदात्मानं स्वशिशुं च सङ्गोप्य थाईदेशसीम्नि प्रविश्य अरण्यप्रदेशं समेत्य आत्मानं स्तनन्धयं च स्वदारकं ररक्ष।

तान् दिवसान् स्मारं स्मारं कित्तिफोमस्य मनसि वेदना स्त्यायते। माता कस्यचन गृहस्थस्य गेहे कर्मकरी बभूव। गृहिणी अनिशं मर्मदारणैर्वचनैस्तुदति। थाईदेशस्य नागरिकता नास्ति। अतः प्रतिक्षणं प्रतिश्वासं संशयो गिलति मानसं क्वचिद् राजपुरुषाः आगत्य निगृह्णीयुः कारागारे निक्षिपेयुः काम्बोजदेशं वा प्रेषयेयुरिति। वेदनैव दिनचर्या बभूव। मुखं सङ्गोप्य रोदनमेव जीवनं जातम्।

एवं च कष्टततिं सहमाना कथञ्चिच्छिशुं पोषयन्ती स्नेहमयी जननी श्रमातिरेकात् भोजनाभावाच्च नितरां कृशा रुग्णा च ममार। अथ अरण्यप्रदेशः कित्तिफोमस्य कृते सर्वथाऽरण्यायितः।

अस्मिन्नेव लुम्पिनीति नाम्नि उद्याने भिक्षुः फ्रा महा सिरिकितः प्रथमं मिलितः। बुभुक्षया मूर्च्छितं तमादाय स स्वविहारम् अनयत् विहारे नवीनोऽध्याय आरभत तदीयजीवनस्य। सिरिकितोऽस्य विहारस्य प्रधानो भिक्षुः। विहारे सञ्चलति रोङ् रियन् थम्म इति नाम्ना धर्मविद्यालयः। सिरिकितः परमकृपालुः कित्तिफोमं तत्र प्रवेशयामास। कित्तिफोमः सामनेरत्वेन दीक्षामपि प्राप। तत्रैव थाईभाषाया अक्षराभ्यासः पालिभाषाया अपि किमपि अध्ययनं तस्य जातम्। महतीमनुकम्पां प्रदर्शयति सिरिकितः तं प्रति। रात्रौ तमाह्वयति चरणसंवाहनाय। क्वचिच्च तं प्रेषयति श्रेष्ठिनः चाम्लोङ्गस्य गृहे भगवतो बुद्धस्य मूर्तीनां प्रेषणाय।

कित्तिफोमः कथं जानीयात् यास्ता मूर्तयः सन्ति स्वर्णनिर्मिता वा पित्तलनिर्मिता वा, अथवा ताश्चोरिता सन्ति विहारात्।

विहारे अवर्तन्त प्रशस्ताः कुट्टिमाः स्फटिकधवलाः। प्रातर्जुगुञ्जुः पालित्रिपिटिकमन्त्राः। भिक्षवः सामनेरान् पाठयन्ति। तेन तु वर्णमाला अत्रैवाधिगता। धम्मपदस्य गाथा अत्र तेन रटिताः। तत् सर्वम् एकदा विघटितम्।

आश्विनमासे शुक्लपक्षे अष्टम्यां भगवतो बुद्धस्य नवीनमूर्ति- निर्माणोत्सवो भवति। महिला आगत्य अहमहमिकया स्वर्णाभूषणानि समर्पयन्ति। मूर्तिनिर्माता आयाति। श्रद्धालुभिः समर्पितानि स्वर्णाभूषणानि सञ्चिकायां निधाय भ्राष्ट्रे सञ्चिकां निक्षिपति। यथा मनो विगलितं बुद्धाय भवति अर्पितं तथैव विगलितानि स्वर्णाभूषणानि बुद्धविग्रहं निर्मान्ति। एवमेव प्रतिवर्षं सङ्गृहीता भवन्ति मन्दिरे भगवतो बुद्स्य स्वर्णमय्यः प्रतिमाः।

कित्तिफोमो प्रधानभिक्षुकस्य फ्रा-महा-सिरिकितस्य अनुकम्पया स्नपितः, बुद्धं प्रति प्रणतः जीवनं महावरदानममन्यत। अथैकदा इदमेव वरदानमभिशापे परिणतम्। सिरिकितेन दत्तां भगवतो बुद्धस्य मूर्तिं फलभानस्य गृहं नयन् कित्तिफोमो राजपुरुषैर्गृहीतः। नासौ व्यजानात् किमिदं रहस्यम्।

अयं भवतां देवस्थानस्य सामनेरः?- राजपुरुषास्तं विहारे नीत्वा सिरिकितं पपृच्छुः। सिरिकित आह ओमिति। किमियं प्रतिमा भगवता अस्मै दत्ता? -

– न, न नेयं प्रतिमा मयाऽस्मै दत्ता।

– अयं स्वर्णमयीं प्रतिमां नयन् अस्माभिर्निगृहीतः। कथयति यदियं प्रतिमा भगवता प्रेषिता। इयं प्रतिमा भवतो देवस्थानस्य वर्तते?

– 'अथ किम्?'- प्रतिमावलोकनम् अभिनयन् सिरिकितोऽभाषत - 'परिचिनो- म्येनाम्। इयं प्रतिमा तु विगते प्रतिमानिर्माणमहोत्वे निर्मापिता। अस्माकं मन्दिरस्य मुद्रा अत्र वर्तते अङ्किता। अद्य प्रातरेव मया दृष्टं मन्दिरे इयं प्रतिमा नास्ति। तर्हि अनेन सामनेरेण इयं चोरिता। अहो, अहो। पश्यत अस्य वटोर्वञ्चकत्वम्। अरे दुष्ट, अरे पाटच्चर! किं कृतं त्वया? त्वया अस्य मन्दिरस्य नाम कलङ्कितम्!'

कित्तिपोमो मुहुर्मुहुः स्वनिरपराधत्वं घोषयति, भगवतैव इयं प्रतिमा दत्ता फलभानाय दातुम् इति स्मारयति भदन्तं सिरिकितम्। न कोऽपि तद्वचः श्रद्दधाति। - अरे चोर, त्वमस्य देवस्थानस्य कृते कलङ्कभूतः।– सिरिकितः साटोपम् अङ्गारप्रखराभ्यां नयनाभ्यां निर्दहन्निव तं कथयति स्म। - श्रीमन्तः, नीयतामयं वटुः। अवतारयत अस्य देहात् सामनेरवस्त्राणि। – अथ स

राजपुरुषानाह।

अभियोगः प्रचचाल। नाहं चोरो, न मया सा प्रतिमा स्वयं गृहीता, श्रीमता सिरिकितेन दत्तां प्रतिमां फलभानमहोदयाय दातुं नयामि स्म, इति कित्तिफोमो असकृज्जगाद। फलभानोऽपि न्यायालये आहूतः। स आह- नाहं जानामि सामनेरमेनम्, न चायं कदापि मया दृष्टपूर्वो, न चानेन आसीत् प्राङ् मे व्यवहारः कश्चन, अयं सर्वथा मिथ्यावादी। अहमस्मि नगरस्य प्रतिष्ठित उद्योगपतिः। सर्वदा सत्येन व्यवहरामि। मन्दिराच्चोरितां प्रतिमां कथमहं गृह्णीयाम्, तत्रापि भगवतो बुद्धस्य पावनीं प्रतिमाम्?

न्यायाधीशेनोद्घोषितम्- 'सामनेरोऽयमपराध्यति। अल्पवयस्कश्चायम्। अत एकस्मै वर्षाय सश्रमकारागृहवासेनायं दण्ड्यते' इति।

कारागारे निक्षिप्तः कित्तिफोमः। कारागाराधिकारी उराइसीनामा आसीत् कश्चन दयालुः पुरुषः। एकदा तेन पृष्टः कित्तिफोमः वाष्पगद्गदः प्ररुदन् तस्मै सिरिकितविहितं सर्वं निर्घृणमाचरणं न्यवेदयत्। स आह- पश्य कित्तिफोम, अहं तु जानामि सत्यं वदसि त्वम्। परं तव कथने कः प्रत्येतु इदानीम्। सिरिकितः वर्तते अत्यन्तं प्रतिष्ठितः प्रधानभिक्षुकः। फलभानस्तु बलवानेव। तस्यापि कापि प्रतिष्ठा वर्तते। समर्थाय न कश्चन दोषो दीयते, दुर्बलं च दलयति सत्ता। यावदनयोर्निगृहार्थं न प्राप्यते प्रमाणं किमपि, तावत् किं कर्तुं शक्येत। यदि निरपराधेन त्वया दण्डः प्राप्तस्तर्हि न तत्प्रतीकारः कश्चन विधातुमधुना शक्यः। परन्तु कारागारात् मुक्तस्य ते साहाय्यमहं करिष्यामि।

स्ववचनं पालितम् उराइसीमहोदयेन। कारागारान्मुक्तं तमसौ स्वमित्रस्य वस्त्र- व्यवसायिनः सथितछायपुन्यस्य गृहं निनाय। प्राह च तम्- सथित, मत्प्रत्ययात् एनं कस्मिन्नपि कार्ये नियोजय। सोऽपि आह- भवान् मे बालसखः, न अपात्रमत्र आनेष्यति, नापराद्धस्य साहाय्ये नियोजयिष्यति मामिति जानामि। तत्तिष्ठतु बालकोऽयमस्माकं गृहे। यद् वा तद् वा करोतु। यथा द्वयोः कृत ओदनं पच्यते, तथा त्रयाणां कृते पक्ष्यते, का क्षतिः?

केषुचिद्दिवसेष्वेव कित्तिफोमः स्वेनार्जवेन कर्मठतया च सथितस्य हृदि

पदं न्यदधात्। सथितस्तस्मिन् सर्वथा व्यश्वसत्।

तस्मिन् गृहे विपदाप्यासीत्। विपदा !- इदमेव नाम आसीत् सथितमहोदयस्य दुहितुः। विपदा विधुरस्य सथितस्य एकैव सन्ततिः।

थाईभाषायां विपदेति शब्दः सम्पद्वाचकः। परन्तु विपदेव साक्षात् विपदा कित्तिफोमस्य जीवनयात्रायां सङ्गता।

विपदा तदानीमासीत् द्वादशवर्षीया अत्यन्तं चपला। रन्धनकर्म सैव करोति। नाना चेष्टाभिः सा तं खेदयति। कदाचित् तस्य ओदने अत्यधिकं लवणं निपातयति, कदाचित् स्वैरमुपविष्टे तस्मिन् त्रिकुट्या तं दशति। सथितवर्यः क्वचित् कदाचित् कित्तिफोमस्य कार्येण सन्तुष्टस्तस्मै बाथपञ्चकं बाथदशकं वा ददाति। विपदा प्रायस्तं राशिं कित्तिफोमस्य ग्रन्थेश्चोरयति। कित्तिफोमो जानाति तस्या धाष्टर्यं, परन्तु न किमपि कथयति। तस्य आजर्वेन समधिकतरं वर्धतेऽस्या धाष्टर्यम्।

सथितमहोदयस्य व्यवसाये साहाय्यं कुर्वतोऽस्य विगताः पञ्च वत्सराः। अष्टादशवर्षकल्पस्य तस्य देहं तूलिकामादाय विविधवर्णविच्छित्तिविन्यास-विशेषरम्यं विधीयमानं चित्रमिव यौवनेनोन्मीलितम्। विपदाया अपि वपुषि तदानीमेव विहितं नवयौवनेन पदम्। कित्तिफोमो नाजानात् किमर्थमिदानीं सा तं मदालसैर्लोचनैर्निध्यायति। साकूतं तं कटाक्षच्छटाभिश्छुरयति। किन्तु दृष्टिपथे यदा यदा सा आयाति, तदा तदीये मनसि कुतकुतमिव भवति, श्वासाः अश्वा इव द्रुतं धावन्ति।

कित्तिफोम आसीत् सर्वथा शिशुरिव मुग्धः। विपदैव कामतन्त्रपाठमेनम-पाठयत्। प्रथमं तु स एकदा रात्रौ शय्यायामागतायास्तस्याः सरभसं कचग्रहणेन, चुम्बनेन स्ववक्षसि तदधश्च तस्या हस्तसञ्चारेण सर्वथा हतप्रभः विस्मयस्तिमितः किङ्कर्तव्यविमूढोऽभूत्। – किमिदं जायते, किमिदं भवति मदीये देहे इति विचिकित्समानः आत्मनैव आत्मनो जुगुप्समानोऽसौ पश्चाद्रोदितुमारब्ध। रुदन्तं तं दृष्ट्वा विपदा खिलखिलम् अहसत्। आह च - अरे त्वं तु सर्वथा बालोऽसि कित्तिफोम! अहं तु एतावता पञ्चभिर्युवभिः संसर्गं विहितवती।

इदमेव जीवनम्। स्त्रिया वर्तते इदं धनम्, यस्मै स्पृहमाना पुरुषाः कुक्कुरा इव तस्याः चरणौ लिहन्ति। इदं धनं मया स्वत एव तुभ्यमर्पितम्, यतस्त्वयि कश्चनानुरागो मदीये मनसि समुत्पन्नः। त्वं च रोदिषि मूर्ख!

मारो नाम महाशत्रुर्मनुष्यस्य इति मन्दिरे त्रिपिटकेषु अधीतम्। तथापि पापपङ्के कथमहमधिकतरं विपदया सह निमज्जामि? वात्येव तृणमसौ विपदाया वासनया इतस्ततः क्षिप्तः कुतश्चित् कुत्रापि निपातितः।

तदानीमेव सथितो अतितरां रुग्णः। व्यवसायस्य सर्वमपि दायित्वं कित्तिफोमस्यांसयोरापतितम्। कर्कटको नाम महाव्याधिः सथितं ग्रसते स्म। क्षामक्षामं कपोलम्, कृशतराणि गात्राणि। शनैः शनैः शीर्यते स्म तदीयं शरीरम्।

अथ एकदा उर्वारुकमिव जीवनबन्धनान्मृत्युः सथितं मुमोच। मरणात् प्राक् बौद्धभिक्षून् आकार्य तेषां सन्निधौ विवाहस्य विधानं पूरयित्वा विपदाया हस्तं कित्तिफोमस्य पाणौ दत्वा व्यवसायस्य दायं च दायभारञ्च तस्मै दत्त्वासौ दिवं प्रयातः।

विवाहस्य पितुर्निधनस्य चानन्तरं कतिचन्मासान् विपदा प्रायः मुद्रितमुखी गम्भीराकृतिरदृश्यत। सथितस्य व्यवसायक्षेत्रमासीदत्यन्तं सीमितम्। वस्त्रापणे सञ्चय- विक्रेतृभ्यः वस्त्राणि क्रीत्वा स समीपवर्तिग्रामेषु गत्वा वस्त्राणि व्यक्रीणात्। स्वल्प एव आयो भवति स्म। तत्रापि यः कश्चन धनराशिः व्यवसायात् पूर्वमर्जितः स सर्वमपि सथितस्यैव चिकित्सायां व्ययीभूतः।

अभावग्रस्तं जीवनम्। सङ्कटापन्नानि तानि दिनानि। प्रतिदिनं तृषाभिभूतेन तेन कूपखननम्। य कश्चन आयो भवति स सर्वं विपदाया हस्ते समर्पयति, सम्बोधयति च ताम्- पश्य, अहं सर्वथा यते यद् व्यवसायस्य वृद्धिः स्यादायश्च द्विगुणितो जायेत। परन्तु मूलनिधिरेव नास्ति, कथं लाभः स्यात्। अतः कतिचिद् दिनानि यावान् प्रच्छदस्तावन्तौ पादौ प्रसारणीयौ। तथापि मितव्ययो नाम नासीद् विपदाया प्रकृतौ। स्वप्रकृतिमनुसरन्ती सा बहु धनम् आभरणेषु प्रसाधनसामग्र्यां च व्ययीकरोति स्म। आयव्ययविषये तयोरनुदिनं कलहो

भवति स्म।

एवमेव प्रायशो वर्षावधिः कालोऽतीतः। विपदा आपन्नसत्त्वाऽभवत्। साभियोगं सासूयं सा तमेकदा अङ्गारप्रखराभ्यां नयनाभ्यां निर्दहन्तीवाह- 'इदं त्वया दत्तं मह्यं परिणयस्य फलम्। महान् प्रसादः। विगते मासे त्वया किमर्थं निरोधकं न प्रयुक्तम्?' कित्ति- फोमस्तामुपादिशत्- पश्य, तवानुरोधं रक्षन्नेव निरोधकम् उपयुनज्मि। मम तु इच्छा वर्तते आवयोः कापि सन्ततिः स्यात्। तथापि न मया जानता तथा कृतम्। यज्जातम्, तज्जातम्। अहं तु मन्ये सन्ततेरागमनेन मङ्गलं स्यात्।'

विपदा कथञ्चिदनिच्छया तस्य वचोऽगृह्णात्, कन्यामेकां चाजनयत्। कन्याया नाम विहितं सिरीरिति। सिरीः साक्षात् श्रीरिव कित्तिफोमस्य जीवने समायाता। सायंकाले गृहमेत्य स तां लालयति, तस्यां स्निह्यति, साऽपि मृदुलमृदुलाभ्यामतिसुकुमाराभ्यां कराभ्यां तं स्पृशति, तं दृष्ट्वा हसति। परन्तु विपदा तस्य सौख्यमसहमानेव तदानीं सामर्षं सासूयं साभियोगं गृहस्य दुर्दशायाः स्मारयति, तं पौरुषहीनं वदति।

अथ सा स्ववास्तविकरूपं प्रकटीचकार। साभियोगं दोषारोपणपुरस्सरमसौ कित्तिफोमं व्याहर्तुमारेभे- त्वया मत्पितुर्धनं सर्वमपहृतम्, त्वमतीव लम्पटः।

कित्तिफोमोऽपि रुषा दन्दह्यमानः तां चपेटाभिरताडयत्। प्रावृषि कूलङ्कषेव सिन्धुरुभयकूले पातयन्ती कुलम्, प्रसन्नमम्भ इव व्यपदेशमाविलयन्ती सा दुरितमयं कपट- मयमाचरणं कर्तुमारभत। अधोगमनमेव जलस्य प्रकृतिः। स्वां प्रकृतिं प्रपेदे विपदा। बालिका सिरीर्बभूव सार्धैकवर्षदेशीया। बालिकाया लालने पालने च आ दिवसं व्यग्रा सा व्यवसाये तस्या साहाय्यं न तथा कर्तुं शक्नोति। किन्तु यदा बालिका रात्रौ स्वपिति तदा सा बहिर्याति। विवाहात् प्रागेव आसन्नस्या अवैधसम्बन्धा बहुभिर्युवभिः। विवाहमनु कित्तिफोमेन क्वचित् साम्ना सन्तर्जिता सन्तर्पिता वा, क्वचिद् दण्डेन भीषिता क्वचिद् दानेन तोषिता भृशं शासिता सा कथञ्चिद् विनयं रक्षति स्म एतावता कालेन। इदानीं सा सीम्नः लङ्घयति।

रात्रौ यदा यदा श्रान्तः क्लान्तः खिन्नमनाः कित्तिफोमो व्यवसायात् गृहं प्रतिनिवर्तते, विपदा गृहे न भवति। क्वचिदर्धरात्रानन्तरं क्वचिच्च च प्रभाते यदा सा प्रत्यागच्छति, मदिरादुर्गन्धि भवति तस्या आननं तदानीम्। पृष्टा सा कथयति- अतिरिक्तस्य आयस्य कृते यामि। न त्वं मम सर्वान् कामान् पूरयितुं क्षमः।

– परन्तु एतत्तु अनुचितं वर्तते विपदे! यदि मम आयः स्वल्पस्तर्हि स्वल्पेन सन्तोषः कार्यः।

– अलं तव एभिरुपदेशैः। अहं यथा अन्याः स्त्रियः कुर्वन्ति तथैव करोमि। इयमेव अस्माकं परम्परा। न वयं नार्यः पुरुषसंसर्गेण

दूषिताः। यावन्तः पुरुषा नः कामयन्ते यावद्भ्यश्च जनेभ्यो वयं सुखं दद्मस्तावत्येव नः समृद्धिः जीवनस्य च लाभः।

खमेररूजसैनिका इव निर्दयं निघ्नन्ति स्म कित्तिफोमस्य मानसं विपदायाः कटुवचनानि। पोलपाटसदृशस्तस्या दुर्व्यवहारः। जीवनं रौरवायितम्। अन्तरा तं च विपदां च समुत्थिता मतभेदानां दृष्टिभेदानामन्तरायाः। दाम्पत्यं सञ्जातं सङ्ग्रामभूमिः। उभावपि शूरौ। उभौ वाक्शरैरन्योन्यं प्राहरताम्। कित्तिफोमो विपदाया साटोपं सोत्प्रासमभिहितानां कटुतराणां व्यङ्ग्यवचनानां प्रतीकारेऽक्षमो भवति। सहसा कश्चन राक्षसस्तस्य करतलं गृह्णाति, प्रहारयति च तेन विपदायाः कपोलं चपेटाभिः। इत्थं क्वचिन्मुष्टीमुष्टि नखानखि समजायतानयोः समरः। उभयोः हृदये शल्यविद्धे। उभयोः जीवनपद्धती वैमनस्यहुतवहेन दग्धे।

कित्तिफोमश्चिन्तयति स्म- किमिदमेव आसीत् जीवनं मत्काङ्क्षितम्। एतस्मात्तु जीवनान्मरणं श्रेयः। परन्तु सिर्याः आननं दर्शं दर्शं पुनरपि जिजीविषा जागर्ति।

विपदाया अन्तिमोऽयमेवासीत् प्रतिशोधो यत् सा सिरीमाच्छिनत् तस्य जीवनात्। एकदा विपदा चाम्लोङ्-नाम्ना यूना सह सिरीमादाय पलायिता। निःश्रीकं जातं जीवनं कित्तिफोमस्य। तदानीमेव बैङ्काकनगरमप्यसौ त्यक्तवान्।

बैङ्काकनगरं थाईभाषायां क्रुङ्थेप इति कथ्यते। क्रुङ्थेप इति शब्दे

थेपशब्दो देववाचकः, क्रुङ् इति पदं च नगरवाचकम्। एवं च क्रुङ्थेप इति शब्दस्यार्थो भवति देवनगरमिति। यदा किशोरः कित्तिफोमः सर्वप्रथमं क्रुङ्थेपं समाययौ, तदा सत्यमेव नगरमिदं देवनगरं प्रत्यभात्। इदानीं तु प्रतीयते स्म- सर्वे देवाः इतो विनिर्गताः।

च्याङ्माईनगरे भवति फाल्गुनपूर्णिमानन्तरं सोङ्क्रान्- नामा (सङ्क्रान्तिः) महोत्सवः। अतीतेषु पञ्चसु वर्षेषु तस्य महोत्सवस्य मेलके कित्तिफोमेन वस्त्राणां स्वकीयं विक्रयकेन्द्रं स्थापितमासीत्। तस्मिन् वर्षे बहवो वैदेशिकाः च्याङ्माइनगरमागताः सोङ्क्रान्महोत्स- वावलोकनाय, तेऽपि सोत्साहं कित्तिफोमस्य वस्त्रविक्रयकेन्द्राद् वस्त्राणि अक्रीणन्। आयस्तु प्रचुरः सञ्जातः। किन्तु सकलस्य तस्य बैङ्कौकनगरमेत्य विपदायाः आकाङ्क्षाणां पूर्तौ व्ययः समजनि।

केनचिन्मृन्मयपात्राणां विक्रेत्रा प्रचक इत्याख्येन तदानीमसावुक्त आसीत्- इहैवागत्य वस्त्राणां व्यवसायं विस्तारय स्वीयम्। अहं साहाय्यं करिष्यामि। मृत्पात्राणां विक्रये अत्र न तथा लाभः। अहमपि वस्त्रव्यवसायमेव कर्तुमीहे। आवां मिलित्वा व्यवसायं करिष्यावः। इह वर्तते वस्त्रविक्रयार्थं भृशमवकाशः। तदानीं तस्य वचः कित्तिफोमस्य मनसि न श्लिष्टम्। इदानीं विपदया वञ्चितः स प्रचकम् अस्मरत्। - 'अपि अहं च्याङ्माइ- नगरमायामि अत्रत्यं सर्वं स्वकीयम् उद्योगं संहृत्य?' इति च सन्देशं तस्मै तन्त्र्या व्यसृजत्। प्रचकोऽपि तत्कालम् उत्तरम् प्रैषयत् - 'एवं कुरु' इति।

क्रुङ्थेपात् देवनगरात् वा देवाः अपगताः। कित्तिफोमोऽपि देवनगरीं बैङ्काकपुरीं परित्यज्य च्याङ्माइनगरं समागत्य वस्त्रव्यवसाये आत्मानं सर्वथा समार्पयत्। द्रव्याभावात् तं विपदा अत्यजत्। इदानीं द्रव्यार्जनमेव जातं जीवनलक्ष्यम्। वाणिज्यं ववृधे। पञ्चभिरेव वर्षैः प्रचकेन तेन च मिलित्वा एका वस्त्रविक्रयपरिषत् (थाईभाषायां व्यवह्रियते लिमिटेड कम्पनी इत्यस्याः कृते परीसद इति उच्चार्यमाणः परिषच्छब्दः।) स्थापिता। परिषदो वस्त्रविक्रयकेन्द्राणि तेषु तेषु हट्टेषु सञ्चलन्ति। वाणिज्यं परिषदो

विस्तीर्णमिदानीम्। परिषदः कार्यालयस्य पृष्ठत एव उभाभ्यां मिलित्वा निवासाय लघुभवनमेकं क्रीतम्। आधुनिकं भवनम्। उभयोः सर्वं कार्यं युगपद् भवति। सह उत्थानम्, सह प्रातराशः, सह कार्यालय- गमनम्, सह भोजनम्, सह रात्रौ कार्यालात् गृहमागमनम्। केवलमेकस्मिन् कार्ये कित्तिफोमः पृथक् भवति प्रचकात्। यदा कदा प्रचकः संवाहनकेन्द्रे दूरभाष्येण संवादं विधाय कामपि संवाहनकर्त्रीमाह्वयति देहसुखलाभाय। कित्तिफोममपि प्रेरयति तथा कर्तुम्। कित्तिफोमस्तस्य आग्रहं निवारयति।

यदि मनो न मज्जति प्रेम्णि, तर्हि केवलं देहस्य देहे निमज्जनेन किम्? मनस्तु सकृन्निममज्ज यदा किशोरी विपदाऽऽलिङ्गनबद्धा। विपदैव तं विहाय गता, तस्य मनस्तु विपदां विहातुं विस्मर्तुं वा इदानीमपि न प्रभवति।

विंशतिर्वर्षाणि व्यतीयुः। इदानीं कित्तिफोमः प्रथित उद्योगपतिः। च्याङ्माइनगरे विशालं प्रशस्तं भवनं निर्मापितम्। भवनमेव वर्तते महनीयम्, गृहं विच्छिन्नम्। जीवनं श्मशानसमम्। काष्ठप्रायं शरीरम्। शुष्कं मनः। जीवनात् श्रीर्विगता।

तेनानुरुद्धः प्रचकोऽपि अस्मिन्नेव उदारे भवने तेन सह निवसति। च्याङ्माइनगरे तस्य पुरातनं जीर्णं लघुगृहं स्वकीयं वर्तते। तत्र यदा कदाचित् गच्छति।

सनिःश्वासं कित्तिफोम उत्थितः, उपवनाच्च च बहिरागतः। हस्ते वर्तते वार्तापत्रम्। अस्य वार्तापत्रस्य किं करोमि। गत्वा पृच्छामि भदन्तं सिरिकितम्- 'इदानीं कश्चोरः, भवान् वा अहं वा? मन्दिरस्य कृते कः कलङ्कभूतः? भवान् वा अहं वा?' इति।

क्व यामि? इति आत्मानमात्मना असौ असकृत् पृच्छति। कुत्र यामि- इदानीं पान्थशाला गन्तव्यैव। बुभुक्षा चक्षुषी खटखटायते। प्रातराशो न विहितः। दैनन्दिनं कृत्यं नाकारि।

प्रतिमासमेकबारं द्विवारं वाऽसौ बैङ्काकनगरमायाति। प्रायशः कार्यं भवति फहुराट्क्षेत्रे। तत्र विद्यते विशालो वस्त्रापणः। तत्रैव सन्ति भारतीयानां

व्यवसायिनां हट्टाः, प्राप्तुं च शक्यन्ते भारतीयानि कार्पासवस्त्राणि। अतोऽसौ फहुराट् समीपमेव कस्याञ्चित् पान्थशालायां ग्राण्डचाइना इत्याख्यायामन्यस्यां वा वसतिं करोति। परन्तु अद्य सुखुंवित् इति क्षेत्रे फोञ्चित् इत्याख्ये विशाले आपणे ततो निकटं च प्रतूनाम् इति क्षेत्रे कार्यं वर्तते। उभयत्र वस्त्राणां सञ्चयः आदेशेन प्रदत्तः। त्रयो मासा व्यतीताः . प्रतिभुक्तिर्नागता। अतस्तत्र गत्वा प्रतिभुक्तिराशिरद्यैव यथा प्राप्येत तथा यत्नः कार्यः। तदर्थमेव सुखुंवित्समीपमेव आवासव्यवस्थापि प्रचकेन कारिता रेम्ब्राण्ड्ट इत्याख्यायां पान्थशालायाम्।

प्रचकः कित्तिफोमादधिकतरं व्यावहारिकः। यद्यपि कित्तिफोमस्य सुपरिचितं विद्यते क्रुङ्थेपनगरम्, परन्तु प्रचकस्तेन सह नैकवारमिह समागत्य अत्रत्याः पान्थशालाः जानाति।

उपवनद्वारात् बहिरागत्यासौ टैक्सीचालकं समकेतयत्। - चापाइ नॉइ ख्रप्? (कुत्र गन्तव्यम् श्रीमन्?) इति चालकः पपृच्छ।

असोक- असावाह।

सुखुंवित् इति क्षेत्रं सुखकरं समृद्धं च। अत्र विशाला आपणाः, उत्तुङ्गानि भवनानि विविधानि उपवनानि च विलसन्ति। मुख्यमार्गे एव बेञ्चासिरी (वनजाश्रीः) इति रमणीयम् उपवनं विद्यते। सरोवरस्य वापिकायाश्च तटे शतशः कपोतपक्षिणो विचरन्ति। मुख्यमार्गे उभयोः पार्श्वयोः सन्ति विविधा आपणाः। द्वित्राणाम् आपणानामनन्तरं किञ्चन संवाहनकेन्द्रम्। अग्रतो गत्वा वर्तते असोक इत्याख्यं गगनचारिरेलयानस्य स्काइट्रेनसंज्ञकस्यावस्थानकम्।

बौद्धमतावलम्बिनं सम्राजम् अशोकं स्मारयति, केवलं थाईदेशीयास्तालव्यस्य स्थाने दन्त्यस्य उच्चारणं तन्नामग्रहणे कुर्वन्ति।

- कुत्र ? - टैक्सीचालकः पृच्छति।

- रोङ् रेम्- रैम्ब्राण्ड्ट - असावाह। थाईभाषायां पान्थशाला 'रोङ् रेम्' इति कथ्यते। पान्थशालाया परिसरे टैक्सीचालको वाहनं रुणद्धि । प्रतिभुक्तिं

गृह्णन् स सहसा चित्राणां सञ्चिकां कित्तिफोमाय दर्शयति। अर्धनग्नानां देहप्रदर्शनार्थं विविधभङ्गीभिर्लसन्तीनां युवतीनां नाना छवयः सहसा नरीनृत्यन्ते प्रसारितमात्रायां सञ्चिकायां कित्तिफोमस्य नयनयोरग्रतः। – इष्यते कापि किम्? संवाहनाय? – न- न- कित्तिफोमः अवदत्। ।

पान्थशालायाः स्वागतकोष्ठके तेन स्वनाम सूचितम्। पान्थाशालायाः कर्मचारी सादरमाह- विद्यते श्रीमतां नाम्ना आरक्षणम्। ततः स पञ्जिकायां तस्य नामादिकं लेखयित्वा प्रतीक्षकमाह- श्रीमतां परिच्छदं त्र्यधिकसप्तशततमे कक्षे नय।

प्रतीक्षकेन सह स उन्नयन्या (लिफ्टेन) उपरि याति। त्र्यधिकसप्तशततमे कक्षे परिच्छदं स्थापयित्वा प्रतीक्षकः पृच्छति- इष्यते किं रात्रौ संवाहनाय कापि रमणी?

– न, न।- कित्तिफोम आह।

पान्थशालायां स्नात्वा प्रातराशं कुर्वाणस्य तस्य मनो विचलितम्। टैक्सीचालकेन प्रसारितायाश्छविसञ्चिकायाः नाना चित्राणि नयनयोरग्रे नरीनृत्यन्ते।

विपदा यतः प्रभृति परित्यज्य गता, ततः प्रभृत्यसौ एकाकी तिष्ठति। स्त्रियं प्रति वितृष्णा मनसि जृम्भते। तं खिन्नं विषण्णं च मत्वा प्रचको द्विस्त्रिर्बलात् तं च्याङ्माइनगर्याः संवाहनकेन्द्रे निनाय। ततः क्वचित् कदाचित् कित्तिफोमस्तत्र गत्वा स्वकीयां रिरंसां तर्पयति। न तेन मनस्तुष्यति। यथा पिपासार्दितः पेयं गृह्णाति, यथा च बुभुक्षितो भोज्यं, तथाऽसौ स्त्रीशरीरं भुनक्ति। विपदया यत् कृतं तत्प्रतिशोधोऽनेन कर्मणा मया विहित इति क्वचिदनुभवति।

बैङ्काकनगरे विलसन्ति सहस्रशः संवाहनकेन्द्राणि। न तेषु क्वचित् कस्मिंश्चित् स गतवान्। यदा यदा आयाति बैङ्काकनगरम्, तदा तदा समय एव न भवति। आदिवसं व्यावसायिकं कार्यं सम्पाद्य प्रायः सायन्तनेन वाहनेन परावर्तनीयं भवति। परन्तु अस्यां यात्रायां वर्तन्ते बहूनि कार्याणि, प्रचकेनापि

साग्रहमुक्तम्- फ्लोञ्चित्केन्द्रात् प्रतूनामकेन्द्राच्च प्रतिभुक्तिं गृहीत्वैव आगन्तव्यम्, कामं दिवसत्रयं दिवसचतुष्टयं वा स्थातव्यं स्यात्।

मनो विचलति। वेल्लति। खिद्यति। अनुशयमिवानुभवति। अपि एतादृशमेव जीवनं गमिष्यति सकलम्? कार्यं तु सर्वं सम्पादयति कित्तिफोमः, किन्तु सामिप्रसन्नमनसा।

दिष्ट्या मध्याह्ने फ्लोञ्चित्केन्द्रे प्रतूनामकेन्द्रे च गत्वा तेन प्रतिभुक्तिर्लब्धा। सायंकाले स फहुराटं जगाम। तत्रत्याः वस्त्रव्यवसायिनः प्रायशः भारतदेशीयाः। ते सर्वे तं परिचिन्वन्ति। साग्रहं सानुरोधं स्वागतीकृत्य मधुरया गिरा तं भोजयन्ति, तस्य वस्त्रक्रयादेशान् शिरसा धारयन्ति, त्वरितं च प्रेषयन्त्यपि आदिष्टं वस्त्रसञ्चयम्। सोऽपि कालेन तेषां प्रतिभुक्तिं कारयति।

फहुराडापणेऽपि सद्यः सर्वं कार्यं सम्पन्नम्। मनः सामिप्रसन्नम्। टैक्सीं गृहीत्वाऽसौ सूक्ष्मविदं (सुखुंविदं) प्रति प्रस्थितः। बेञ्चासिरीं प्राप्य मनसि अभवत्- कियद्दूरं पद्भ्यां चलामि। ततश्च त्यक्तवान् टैक्सीम्।

बेञ्चासिर्युपवने केचन शिशवः कपोतान् भोजयन्ति। कपोता अहमहमिकया धान्यकणेषु परापतन्ति, केचन कपोता एकस्या बालिकाया हस्तादेव द्विदलरोटिकाया कवलान् गृह्णन्ति। बालिका उल्लसति। विहसति। स्फुरति तस्याः कतिपयकोमल- दन्तकुड्मलाग्रं वदनं हास्यच्छटाभिः। बालिकाया माता सहसा तामङ्क आदाय परिचुम्बति। कित्तिफोमस्य हृदयं सहसोत्कायते। सिरीः! सा न मया एवमुत्थाप्य अङ्केनादाय गाढं परिष्वज्य चुम्बिता। सा इदानीं कुत्र स्यात्?

च्याङ्माइनगरे व्यवस्थितः स यदा यदा बैङ्काकनगरमायाति, तदा तदा यतते विपदाया अन्वेषणाय। केवलं सिर्याः कृते। सिर्याः कृते विपदामपि पुनरङ्गीकरिष्यामि इति चिन्तयति स्म। यादृशी तादृशी वा स्याद् विपदा। तया सिरीर्जनिता। सिर्या लाभाय किमपि कर्तुं शक्नोमि।

कित्तिफोमः बहुकालं यावत् उद्यानस्य एकस्मिन् शिलापट्टक उपविष्टः। प्रसरति अन्धकारः परित उपवने। मनसि अपि तस्य प्रस- रति अन्धकारः।

शनैः शनैः उपवन- विहारार्थिनः प्रस्थिताः। विच्छिन्नो जनसम्मर्दः। शून्यं भवति उपवनम्। शून्यं भवति तस्य मनः। उत्थाय ततः प्रचलितः कित्तिफोमः। परितः सुखुविदापणम्।

सूक्ष्मवित् इति संस्कृतस्य कृते पालिभाषायां थाईभाषायां च सुखुंविदिति प्रयोगः। सम्प्रति आपणे अस्मिन् सूक्ष्मवेदिता न दृश्यते, अत्रत्यं चाकचाक्यमवश्यं चमत्करोति। सुखुं विदापणे राजमार्गस्योभयोः पार्श्वयोः मदिराशालाः बियरबारसंज्ञकाः मदमत्तैः पानार्थिभिः परिपूर्णाः। तेषु बहुसंख्यका भवन्ति योरोपीयाः। मधुबालाः कस्यचिदङ्के उपविशन्ति, कञ्चित् चुम्बन्ति, कोऽपि मदमत्तो वृद्धः कामपि तन्वङ्गीं श्यामां सहसा परिष्वजति। कश्चन प्रौढः षोडशीमालिङ्गति। सर्वमेतद् दर्शं दर्शं विचित्रा मनोदशा भवति कित्तिफोमस्य। पुनरपि तस्य मनसि वसन् भैरवो जागर्ति।

रैम्ब्राण्ड्टपान्थशालामेत्य उन्नयिन्या उपरि आरोहन्तं तं पुनरपि स एव परिवेषको मिलितः। - इष्यते किं रात्रौ संवाहनाय कापि रमणी? - स पृच्छति पुनरपि।

- आनय कामपि।– कित्तिफोमस्य मुखान्निःससार।

- न यां कामपि खुन् (श्रीमन्)– प्रतीक्षकः सोल्लासमाह– यादृशी भवता इष्येत तादृशीमानयामि। विद्यते मत्सकाशं छविसङ्ग्रहः।

भवान् परिश्रान्तो लक्ष्यते। किमपि गृह्णातु भक्ष्यं च पेयं च। अहमपि अन्येषु कक्षेषु सेवां विधाय सद्य आगमिष्यामि। ग्राहकाणां परितोष एव अस्माकं धनम्।

आदिवसं प्रतिभुक्तये वस्त्राणामादेशाय च इतस्ततोऽटन् कित्तिफोम आसीद् दृढं परिश्रान्तः। तन्द्रा तस्य चक्षूंषि हर्तुमारेभे। प्रायः होरार्धं विगतं स्यात्। अथ कक्षद्वारस्य घण्टिका टनटनायिता।

– चन् क्रप्। (आगम्यताम्)- कित्तिफोमः सहसा भग्नतन्द्र उच्चैर्जगाद।

– इमम् अवलोकयन्तु श्रीमन्तश्छविसङ्ग्रहम्– प्रतीक्षकः छविसङ्ग्रहं तस्य करयोरर्पयित्वा वदति स्म- अहं क्रुङ्थेपस्य सर्वश्रेष्ठं यत् संवाहनकेन्द्रं

तस्य कृते कार्यं करोमि। अस्या पान्थशालाया अनुमतिर्वर्तते, ततः प्रेषिता संवाहनकर्त्र्य इह आगन्तुं शक्नुवन्ति।

अनिच्छया शनैः शनैः कित्तिफोमश्छविसङ्ग्रहस्य पृष्ठान् परिवर्तयामास। छविसङ्ग्रहे विलसन्ति अर्धनग्नानां साकूतं क्वचिज्जङ्घे क्वचिदूरू क्वचिदुरोजौ दर्शयन्तीनां युवतीनां नाना चित्राणि।

एता युवतय आपाततो रमणीयाः प्रतिभान्ति परन्तु भवन्ति पर्यन्तपरितापिन्यः। एतासु सर्वा युवतयोऽपि न भवन्ति। नैका भवन्ति प्रौढाः। परन्तु चित्रे नवयुवत्य इव प्रकटीभवन्ति, प्रसाधनेन स्वकीयमायुः न्यूनादपि न्यूनं दर्शयितुं यतन्ते, निकटतोऽवलोकनेन बीभत्साः प्रतिभान्ति।

दर्शं दर्शं कित्तिफोमस्य मनोऽदूयत। का आवश्यकता आसीदस्य

कौतूहलस्य? तदादिष्टा संवाहनकर्त्री आगमिष्यति। संवाहनं विधास्यति, सुरतकर्मणि तं प्रवर्तयिष्यति। तेन किं स्यात्? सुरतावसाने स पापभावनया भवति ग्लानः। बौद्धमन्दिरे वसता तेन ये संस्कारा अर्जितास्तेषां प्रभावः स्यात्। ते संस्कारा दुर्निवाराः। भदन्तस्य सिरीसकस्य पापमपि चित्तपटलात् तेषां प्रोञ्छने नालमभवत्।

सहसा एकस्मिन् चित्रे तस्य नयने स्थिरीभूते। कापि अन्यैव छविः। सा उदासीनेव प्रतिभाति। अन्या यथा आमन्त्रयन्ति अश्लीलं च सङ्केतयन्ति, तथेयं न।

तेन तर्जन्या तच्चित्रं स्पृष्ट्वा छविसङ्ग्रहः प्रतीक्षकस्य पुरः सारितः। प्रतीक्षकोऽवदत्- 'ख्रप्, ख्रप्, खुन् (आम्, आम् श्रीमन्)। कीदृशी श्रीमतां सुरुचिः। इयमस्ति चित्रीया नाम बाला। सर्वथा अनाघ्राता कलिका। इयम् इतराः संवाहन- कर्त्र्य इव प्रगल्भा नास्ति। किन्तु अतीव सौम्या लावण्यमयी मुग्धा किशोरी वर्तते। चित्रे निवेश्य परिकल्पितसत्त्वयोगेव अस्पृशतेव विधात्रा विरचिता विभाति इयं चित्रीया। अरे भवान् जानाति रत्नं प्रत्यभिज्ञातुम्। होरार्धेन कालेन सा आगमिष्यति। कृपया त्रिसहस्रं मुद्रा देयाः।'

कित्तिफोमो धनराशिं तस्मै अददात्, - कप्खुन् ख्रप् कप्खुन् ख्रप् -

(धन्यवादाः धन्यवादाः) इति व्याहरन् विहसंश्च निर्ययौ प्रतीक्षकः कक्षात्।

गतः प्रतीक्षकः। कित्तिफोमश्चिन्तयति- किं मया कृतम्? किमर्थमहं संवाहिकानां प्रपञ्चे न्यस्यामि आत्मानम्? विपदया यत्किमपि कृतं तत्प्रतिशोधाय किम्? एतेन प्रतिशोधो भवति किम्? प्रत्युत विपदाया स्मृतिः पुनरपि मनःशल्यं जनयति। इयमात्मप्रवञ्च- नैव। तथापि किं क्रियेत? प्रतीक्षकस्तूक्तः। स आनेष्यति तां संवाहिकां या चित्रे निर्दिष्टा।

प्रतीक्षकेण सत्यमभिहितमासीत्। या युवती तदीयं कक्षमागता, सा न इतराः संवाहनकर्त्र्य इव प्रगल्भा। किन्तु यथा चित्रे दृष्टा तथैव सौम्या आकृतिः। सुदर्शनं वदनम्। यथा प्रतीक्षकेणाभिहितमासीत् तथैव लावण्यमयी पेलवा कापि छाया मसृणमसृणे तदीये गात्रे स्निग्धतया हरति हृदयम्। चित्रीया सत्यमेव चित्रे निवेश्य परिकल्पितसत्त्वयोगेव अस्पृशतेव

विधात्र्या विरचिता विभाति। वस्तुतः चित्रे तस्या लावण्यस्य लेश एव प्रत्यभात्।

– मदिरां ददामि उत संवाहनं प्रथमं करोमि? – सा पृच्छति।

चित्रीयायाः स्वरश्चमत्करोति चित्तम्।

इयं तादृशी न प्रतिभाति यादृश्योऽन्याः संवाहिकाः। क्वचित् प्रचकेनानुरुद्धः क्वचित् चेतसि समिद्धं हुतवहं प्रशमयितुमसौ वर्षे द्विस्त्रिर्वा संवाहनकेन्द्रं याति।

वाणिज्यं कुर्वन्ति सर्वाः संवाहिकाः। ता उच्चैर्हसन्ति, नाना भङ्गीर्दर्शयन्ति, स्वदेहप्रदर्शनं कुर्वन्ति, संवाहितस्य देहमपि प्रसाधयन्ति। किन्तु मनःप्रसादो न भवति तासां सान्निध्येन। परस्तात् ग्लानिरनुभूयते। इयं न तथा चेष्टते यथा ताः।

– चअनङ् (उपविशतु)– स आह–

– अहम् अस्मिन् व्यवसाये नवीना अस्मि। किमपि न जानामि। अतो यत्किमपि करणीयं स्यात् श्रीमन्त एव वदन्तु।- सा उपविश्य जगाद।

कित्तिफोमस्य हृदये वीणायाः तन्त्र्य इव झङ्कृताः। स तूष्णीं स्थितः।

आदिशन्तु श्रीमन्तः। सा पुनराह।

किमनयाऽभिहितम्– किं च मया कृतम्? इयं तु सर्वथा बालिकैव। - -कित्तिपोमस्य मनः सहसा वेदनया क्वथितम्- चित्रे यदा दृष्टा तदा तु न एतावती कनीयसी प्रत्यभात्।

चित्रीया शनैः शनैः स्वकरतलाभ्यां तस्य दक्षिणं चरणं गृह्णाति। शनैः शनैर्मर्दयति। अतीव कोमलः स्पर्शः। तरङ्गायते कित्तिफोमस्य मनः। स्पर्शेनानेन कथं कामपि निर्वृतिमनुभवामि–

सहसा तस्य मनसि आयातम्- चित्रीयया सह वार्तालापं करोमि। परं किं व्याहरामि? संवाहनकेन्द्राणां रमणयो भवन्ति प्रगल्भाः। ताः स्वयमेव यद्वा तद्वा भाषन्ते, मनोरञ्जनं च कुर्वन्ति वाण्याऽपि। तथापि ताभिः सह वार्तालापाय मनो न भवति उत्सुकम्। चित्रीया वर्तते स्तोकभाषिणी। अनया वार्तालापं विधातुमुत्कायते मनः।

– थन् आयु थाउ अराइ क्रप्? (भवत्या वयः कियत्?) कथञ्चिद् वार्तालाप- मुपक्रमितुमसौ तां पृष्टवान्।

चित्रीया कोकिलकण्ठेन मन्दं जहास। अवदच्च- अहं न जानामि। मन्ये संवाहन- केन्द्रस्य सञ्चालिका जानीयात्। मम माता तत्रैव कार्यं करोति स्म। सा निधनं गता। सञ्चालिका कृपया मां मातुः स्थाने न्ययोजयत्।

– तव पिता क्व वर्तते?

– तदपि अहं न जाने। मम माता पितरं त्यक्त्वा अन्येन पुरुषेण सह निवसति स्म। सोऽपि पुरुष एकदा तां विहाय गतः। माता अत्यन्तमनुशयखिन्ना अवर्तत। सा पितरमन्वेष्टुमपि भृशमयतत। पिता तु क्रुङ्थेपे स्वकीयं सर्वं व्यवसायं परिसमाप्य अन्यत्र गतः। तस्य कश्चनापि सङ्केतो न प्राप्यत। माता मां बोधयति स्म - तव पिता आसीत् सज्जनः। मयैव स्वभावचापल्यात् हृदयस्य दौःस्थ्याद्वा स तिरस्कृतः। यदि क्वचिदिदानीमपि स लभ्येत तर्हि साञ्जलि तं क्षमां याचिष्ये। त्वयि भृशं स्निह्यति स्म सः। त्वत्कारणादेव नावां तिरस्करिष्यति कित्तिफोमः। यदा सा अन्तिमं श्वासमगृह्णात्, तदानीमपि

अयमेव नाम तस्या जिह्वायामभवत् - कित्ति...

कित्तिफोमस्य मुखमुद्रां दृष्ट्वा सहसा सा व्यरमत्, अर्धोक्तं तस्या मुखे एव स्थितम्। - अपि न स्वस्थाः श्रीमन्तः? मया निरर्थकं स्वकथया भवन्त उद्वेजिताः' - इति सा अकथयत्।

कित्तिफोमस्य हृदयं स्तब्धम् आसीत्। किमनयाऽभिहितम्? काठिन्येन कथमपि तस्य मुखादिमे चत्वारः शब्दा विनिर्गताः - किं नाम तव मातुः?

– मम मातुर्नाम विपदा।

- अरे त्वं मम सिरीरसि। - सहसा संवाहनरतौ तस्याः करतलौ स्वहस्ताभ्यां गृह्णन् कित्तिफोम आह।

- किं भवानाह- अहमस्मि चित्रीया। सिरीरिति नाम्ना मम माता कदाचिन्मामाह्वयति स्म। भवान् कथं जानाति सिरीरिति मम नाम?

- अहं जानामि, यतो हि अहमस्मि कित्तिफोमः ...यस्य नाम त्वदीया माता अन्तिमेऽपि क्षणे स्मरति स्म। स एवाहं भाग्योपहतः ते पिता!

चित्रीया विस्फारितनेत्रा किमपि वक्तुकामा स्फुरिताधरोष्ठापि किमपि वक्तुमपारयन्ती चिरं तं निध्यायन्ती तस्थौ। अनन्तरं सा निःशब्दं फूत्कृत्य रोदितुमारब्ध।

– मात्रा वार्तापत्रेऽपि एकदा विज्ञापनं दत्तमासीत्- कित्तिफोम, अहं पश्चात्तपामि। यदि त्वमेतत् पठसि तर्हि एतेन सङ्केतेन मया सिर्या च सह सम्पर्कं साधय। - सिरी वदति स्म।

अनन्तरं सा –मए मए– (मातः मातः) इति उपांशु निगदन्ती पुना रुरोद।

पञ्चनिमेषानन्तरं कित्तिफोमः सोल्लासं स्वकक्षादेव दूरभाष्येण च्याङ्माइनगरस्थं स्वमित्रं प्रचकं सूचयति स्म- प्रचक, मिलिता अद्य मम दुहिता दैवेनापहस्तिता। आयाति सा मया सह च्याङ्माइनगरं श्वः। आवयोर्भवने एकं कक्षं तस्याः कृते सज्जीकारय।

- अरे मित्र! किं कथयसि? अहं इदं भवनं त्यक्त्वा स्वपुराणे भवने गच्छाम्यद्यैव। न तद् भवनं मया इदानीमपि विक्रीतम्। त्वं सुखं वस दुहित्र्या

सह।

- न। कोऽपि क्वापि न गमिष्यति। भवानपि तत्रैव स्थास्यति। वयं सर्वे सह निवत्स्यामः। - कित्तिफोम आह।

–000–

स्मितरेखा

-अरे रघुवीर...! त्वम्?

बहोः कालादनन्तरं रघुवीरेण समागमो जातः। आपणे गच्छन्नासम्। तत्रासौ सहसा दृष्टः। अहमेव रघुवीरं पर्यचिनवम्। रघुवीर एवासीत्, नासीत् शङ्कालेशावकाशः। सैव गम्भीरता, सैव मलिना मुखच्छाया। तादृशा आकृतिविशेषाः कथं विस्मर्यन्ते!

परन्तु स मां नैव प्रत्यभ्यजानात्। - अहं भवद्भिः कुत्र मिलितः? - सोऽपृच्छत्।

अरे आवां महाविद्यालये सहपाठिनौ आस्व। अहमस्मि रहमानः।

ओः...ओः..अरे प्रियभ्रातः रहमान-अली! अहं तु मन्ये सर्वेऽपि सखायो मां विस्मृतवन्तः। अरे त्वया अहं प्रत्यभिज्ञातः। त्वं महानसि। तव सदृशः कः स्यात्।

इत्थं 'यू आर ग्रेट, यार!' - इति मुहुर्मुहुर्लपन् स माम् आलिङ्गत्।

एतादृशी एव प्रकृतिस्तस्य तदानीमप्यासीत्। चिरपरिचितानपि नैव परिचिनुयात्, कदाचित् सहसा अपरिचातानामपि कृते चिरपरिचितत्वमाविष्कुर्वन् तैः सह यद्वा तद्वा चिरमालपेत्।

अतीतेषु दशसु वर्षेषु रघुवीरो मम सहपाठी अभूत्। रहस्यमयता सदैव तदीये आचरणे भवति स्म। अत एव वयं तस्य सर्वं कार्यकलापं कौतुकेन अपश्याम। कदाचित् स अत्यन्तम् उदासीन इव अस्मिन् लोके भवन्नपि अन्यत्र गत इव अदृश्यत। क्वचित् सोऽस्मासु तथा सम्मिलितो भवति यथा जन्मान्तरीयं सख्यं सर्वैरस्माभिस्तस्य स्यात्।

रघुवीरः सम्प्रति अतितरां गम्भीर इवालक्ष्यत। 'अत्रैव निकटमहं निवसामि' - स आह- 'यदि समयः स्यात् आगच्छ, किञ्चित्कालं स्वैरमालपामः'...

तेनानुरुद्धोऽहं तस्य गृहमगच्छम्। लघुगृहम्। परन्तु अत्यन्तं सुरुच्या

परिष्कृतं सुसज्जितम्। कणे कणे कोणे कोणे रघुवीरस्य कमनीया छायेव दरीदृश्यते। गृहे स एकाकी। सेवकः तेनादिष्टः चायं निर्माय आनीतवान्। चायम् उपस्पृशन्नहं तमनुयोजयामि स्म - अन्यत् सर्वमुपपन्नम्? कथय कीदृशस्ते कालो गच्छति?

– किं कथयामि मित्र! मम तु सर्वं गतम्– इत्युक्त्वा प्ररुदन्निव सनिःश्वासं हृतसर्वस्व इवासावदृश्यत।

– अरे - अहं सविस्मयं तस्य कृते सहानुभूतिं च प्रकटयन्नवदम् - किं सञ्जातम्?

मम स्वरे विद्यमानया करुणया स समधिकतरं द्रवीभूतः। - 'मम प्राणप्रिया ... सा

गता'... इति निगदतस्तस्य कण्ठोऽवरुद्धः, लोचने बाष्पकषायिते च जाते।

-ओह! - अहं सहानुभूतिगर्भितेन स्वरेण अवदम् अथ च - 'मया तु न ज्ञातं यत् त्वया कदा परिणीतमि'ति च वक्तुकाम आसम्, परन्तु तदीयामतिगम्भीरां मुखाकृतिं निर्वर्ण्य तूष्णीमभवम्।

रघुवीरो वक्तुमारभत - जानात्येव भवान् यदहं विरागी। न परिग्रहः कदापि कृतः। सा स्वयमेव मद्गृहं प्राप्ता। अहं तु उद्याने निष्कुटं परिष्करोमि स्म। सा आगत्य मम पादयोः स्वमुखं न्यदधात्।

....शिशुरेव साऽऽसीत्। निरीहनयनाभ्यां मां निध्यायति। अरे कस्येयं कुत इयमागता - इति चमत्कृतोऽहं विषण्णां मार्गभ्रष्टां तां चुचुत्कारैः सान्त्वयामि स्म।.... अहमचिन्तयम् - इयं शिशुरेव वर्तते... कस्माच्चित् प्रतिवेशिगृहादागता स्यात् - उच्छलन्ती कूर्दमाना यथा आगता तथा गमिष्यति – परन्तु सा न गता। सा मदीया जाता। अहं तस्या नामापि न जानामि। को वदतु किं स्यात् तस्या नाम? मयैव तस्या नामकरणमकारि। निम्मीः इति।'

अहमस्मये। यदा रघुवीरोऽस्माभिः सह अध्यैति स्म महाविद्यालये तदा निम्मीनाम्नी चलचित्राभिनेत्री तस्मै भृशं रोचते स्म। मन्ये निम्मीं प्रति

तदानीन्तनमाकर्षणमिदानीं यावत्तथैव लसति तदीये चित्ते।

भूयोऽपि रघुवीरः स्वकथामग्रे ततान - 'मया बहुशः प्रयतितं कस्तावदस्या अभिभावक इति ज्ञातुम्, वृत्तपत्रेषु विज्ञापनं दत्तम् यत् यस्य कस्यापि इयं स्यात् स आगत्य परिचिनोतु, नयतु चैनाम्, अनन्तरं पुलिसस्थानकं गत्वा तत्रापि सूचना प्रदत्ता। परन्तु न कोऽपि तस्याः परिवारजन आयातः। सा तु तपस्विनी सर्वथा मां प्रपन्ना...'

- परं सा तु अवश्यं जानीयात् कुत्र आसीत् तस्या गृहम् - त्वया नैव पृष्टं कुत्र ते गृहम् - कुत आगतेति -

- अरे निम्मी किं ब्रूयात् - वराकी - सा वक्तुं शक्नुयात् किम्?

अहं मनस्यकरवम् - अरे, तर्हि मूका आसीदस्य प्रिया निम्मीः। यदि सा लेखितुं अज्ञास्यत् तर्हि लिखित्वा स्वगृह- सङ्केतमदास्यत्। परन्तु अयं कथयति यत् सा शिशुरेव आसीत्। अतो पठितुं लेखितुमपि क्व जानीयाद्वराकी?

रघुवीरः पुनरपि स्वकथावितानं ततान - 'मम गृहे कोऽपि नास्ति। जानासि एव त्वं यदहमस्मि चिरकुमारः..'

– एवम्, एवम् - अहं सस्मितमब्रवम्।

रघुवीरस्य अनेकाभिश्चिरण्टीभिः प्रणयवृत्तानि अस्माकं महाविद्यालये प्रसरन्ति स्म। कदाचिदसौ विमलया संवदति, कदाचित् कमलया अल्पाहारगृहे चायं पिबन् दृश्यते। न कयापि स्थिरः सम्बन्धस्तस्य तिष्ठति। अद्य अस्या अधरोष्ठौ चुम्बितौ, अतः परं न सा किमपि कर्तुं ददाति इति विवादो जातः, तस्मिन् दिने तया स्वयमेवालिङ्गनं दत्तम् इत्येवं स्वीया गौरवगाथा अपि स सरहस्यं उपांशु जपति स्म अस्माकं मित्रमण्डल्याम्।

शीलया सार्धं तस्य प्रेमसम्बन्धाः दीर्घावधि प्रचलिताः। इदानीमवश्यम् उभौ विवाहं करिष्यत इति सर्वे अमन्यन्त। रघुवीरोऽपि शीलायाश्चिन्तायां चर्चायां चानिशं निमग्नो अदृश्यत। परन्तु कदा उभयोः सम्बन्धः सर्वथा विघटित इति नाज्ञायत। - अरे स तु पुरुष एव नास्तीति - कस्यैचित् सहपाठिन्यै शीला उक्तवतीति किंवदन्ती अपि कर्णाकर्णिकया स्यन्दमाना

सर्वत्र प्रससार। रघुवीरस्तु रमेशस्य अंसे स्वकपालं विनिवेश्य प्ररुदन् क्वचिज्जगाद - 'मित्र, मया ज्ञातं सा डाकिनी वर्तते। अभिचारकर्म करोति ...नेदानीं कयापि चिरण्ट्या सम्बन्धं योजयिष्यामि, चिरकुमार एव स्थास्यामि...'

रघुवीरः स्वकथावितानमग्रे अतनोत् - ' अस्म्येव चिरकुमारः, परन्तु यतः प्रभृति सा मम गृहं स्वयमागता, ततः प्रभृत्यहं गृहस्थ इव सञ्जातः। यत् किमपि तस्यै रोचते तदानयामि आपणात्। दुग्धं बिसकूटं च सा मदीयेऽङ्के उपविष्टा भुङ्क्ते। सा सर्वथा मयि विश्वसिति। किं वच्मि...जन्मान्तरीय एव मम तया सम्बन्धः स्यादन्यथा कथं नु घटेत एतावान् प्रेमा? कार्यालयादागमने मम यदि विलम्बः स्यात् होरार्धमात्रमपि तर्हि सा भामिनी कोपभवन आत्मानं काराबद्धां विधाय तिष्ठति, न खादति न पिबति, साभियोगं केवलं मां निध्यायति, बहुकालं संवाहिता, सचुचुत्कारम् अङ्के धारिता, समाश्वासिता कथञ्चित् करोति प्रणयं मम हस्तादेव कवलमेकं द्विचतुरान् वा कवलान् ग्रहीतुम्। किं कथयामि.. एतादृशः प्रगाढोऽनुरागः नान्यत्र कुत्रापि प्राप्येत। अहं शनैः शनैः सर्वथा तस्या वशंवदो जातः। सापि सर्वस्य गृहस्य रक्षां सावधानतया करोति.. सैव मम गार्हस्थ्यधूः सञ्जाता।

'क्रमेण च कृतं मधुमास इव वसन्तेन वसन्त इव पुष्पेण नवयौवनेन तस्याः कमनीये कलेवरे पदम्। समधिकतरं निशिता जातास्तस्य कटाक्षपाताः। भवांस्तु जानात्येव - उपदिशति कामिनीनां यौवनमद एव ललितानि इति। तस्याः कृते अहं चिन्तितो जातः। अस्यां वीथ्यां प्रागेव आहिण्डन्ते तस्यां वासनाकलुषितया दृष्ट्या तं गिलन्तस्ते गुण्डाः। किं करोमि, कथमस्याः परिणयं घटयामि केनापि सत्पात्रेणेति चिन्तितोऽहं जातः...'

अरे कथं शृङ्गाररसप्रसङ्गे सहसैवेयं वात्सल्यवर्षा? रघुवीरः स्वप्रणयिन्याः धर्मपुत्र्या वा स्मृतौ पुनरपि विषादमग्न इवादृश्यत। अवर्धत च मे कौतूहलम्।

ततः किम्? तस्या विवाहस्त्वया कारितः?' - अहमपृच्छम्।

– अरे का कथा परिणयस्य तस्यास्तपस्विन्याः? - स सनिःश्वासं विदीर्णहृदय इव नैराश्य- निमग्न इवाब्रवीत् - अनुरूपवरान्वेषणे मया सर्वा दिशः पाविताः।

कुत्र कुत्र न गतवान्। प्राप्तोऽपि आसीत् एकः युवा वरः। सोऽपि मत्प्रतिवेशिन एव पालितपुत्रः। परन्तु अस्मिन्नेव काले वज्रपातः सञ्जातः। अद्यापि विश्वसितुं न प्रभवामि... ' इति निगदन् रघुवीरः दुःखावेगवशात् तूष्णीम्भूतः।

अहमवदम् - 'धैर्यं धारयतु भवान्। एतादृश एवायं संसारः। किमुच्येत? भवतु, किमत्याहितम्?'

'अरे अत्याहितमेव तादृशं सञ्जातम्...सा वृश्चिकरोगेण ग्रस्ता..' इति कथयतस्तस्य पुनरपि वागवरोधोऽभूत्।

- 'अहो अत्याहितम्!' - अहमवदम्-

'सत्यमनर्थः सञ्जातः.. ममैव मूढस्य प्रमाद आसीत् - तस्या उरसि आसीत् एकश्चणकपरिमितो ग्रन्थिः। मयैव अवधानं न दत्तम्। सा तु मुग्धा। सा किं बुध्यतां नाम? क्रमेण च सा ग्रन्थिः प्रावर्धत। एकदा मम दृष्टिस्तां लालयतस्तस्यां ग्रन्थौ निपपात। अहमाशङ्कितोऽभूवम्। अनयं च निम्मीं चिकित्सकस्य पार्श्वे।

ततः प्रभृति निम्या उरसि प्ररूढा सा ग्रन्थिर्मम मनोग्रन्थिः सञ्जाता। यथा यथा वर्धते सा तथा तथा मम मनसि शयो वर्धते। चिकित्सका अप्याहुः भवता विलम्बः कृतः। इदानीं ग्रन्थिः प्रवृद्धा। शल्यक्रियां करिष्यामः, परन्तु वक्तुं न प्रभवामः - इयमरोगा भविष्यति वा न वा।

शल्यक्रियामधिकृत्य श्रावं श्रावं चिकित्सकानां वचांसि मदीये हृदये शल्यानि भवन्ति। तेषामपि अपराध आसीत्। तैः सद्यः शल्यचिकित्सा न कृता, त आहुः औषधानि दद्मः, कदाचित् तैरेव ग्रन्थिरियं सङ्कुचन्ती शुष्कायेत। परन्तु एते चिकित्सकाः! किमेते जानन्ति? यद्यहमभवं विदेशे कस्मिंश्चद् योरोपदेशे तदा एतत् सर्वं नाभविष्यत्, तत्र यदि कश्चित् चिकित्सक एतादृशीमनवधानतां विदध्यात्, तर्हि न्यायालये अभियोगे प्रवृत्ते कोटिकोटिडालराणि देयानि स्युः ...

भवतु....अन्ततः शल्यक्रियामेव ते अकार्षुः। सञ्जातायां शल्यक्रियायां त आहुः - 'सफला जाता शल्यक्रिया – स्वीकुर्वन्तु वर्धापनानि' इति।

कियती अनवधानता .. निम्याः उरसि या बाधा आसीत् सा तु न दूरीभूता। सा कष्टम् उच्छ्वसिति, केवलं मां सकरुणं निध्यायति। किमपि न वक्ति .. स शनैः शनैरीश्वरसमीपं यान्तीव, परमशान्ति- मनुभवन्तीव लक्ष्यते। मद्वियोगमुत्प्रेक्षमाणायास्तस्या नयनयोरश्रुधारा निस्सरति। अहो ते दिवसाः, अहं तां समाश्वासयामि - मा भैषीर्निम्मि, त्वमवश्यं नीरोगा भविष्यसि, परन्तु सा त्वजानात् -

पुनरपि रघुवीरस्य स्वरो बाष्पकषायितः। तथापि कथां स सन्तनयति स्म - 'महती पीडा आसीत् तस्या उरसि। केवलमनुभवति, किमपि न वक्ति निम्मीः। अहं तस्या नयने नयनं ददान एव जानामि।

'चिकित्सकास्ते धूर्ताः... केवलमाश्वासनं ददति- व्रणः वर्तते। व्रणः शुष्कः स्यात् तदा इयं स्वस्था स्यात् – एवं यद्वा तद्वा कथयन्ति –अरे मूढाः, किमेतावदेव युष्माकं ज्ञानम्- एतावती विशेषज्ञता?' इति निगदन् रघुवीरो आवेशवशाद् रक्तमुखः कोपाटोपस्फुरिताधरः क्षणं कामपि अदृश्यान् शत्रून् प्रहरन् प्रत्यादिशन् इव स्थितः।

– ततस्ततः? - अहमपृच्छम्।

'तस्मिन् दिने तां कष्टमुच्छ्वसन्तीं दर्शं दर्शं किमप्यत्याहितमाशङ्कमानोऽहं कार्यालयादवकाशं गृहीतवान्। द्वित्रेभ्यो दिनेभ्यस्तया न किमपि भुक्तमासीत्। अहं दुग्धं ददामि, बिसकूटं तस्या मुखं यावदानयामि। सा न प्रणयं करोति। मदीयेऽङ्के एव मम वक्षसि मुखं संस्थाप्य स्थिता। अहं तां संवाहयामि। केवलं मन्दं मन्दं सीत्कृतिं सा करोति। एवमेव सीत्कृतयः शनैः शनैः शिथिलायिताः, उच्छ्वासा अपि न श्रूयन्ते स्म। तर्हि सुप्तेयं तपस्विनी अन्तत इति कलयित्वा अहं तां शयने स्वापयितुमुत्थापयामि तावत् किं पश्यामि ... अरे किमहं पश्यामि यत् सर्वं समाप्तम्, गतैव सा.. तस्याः शिरोऽधो ललम्बे। अहो लुण्ठितोऽस्मि, वञ्चितोऽस्मि... '

अहं समाश्वासनकलायां पटुर्नास्मि। स च रोदिति स्म। यथाकथञ्चिदहमवदम् – 'धैर्यं धारयतु भवान्। अवश्यभवितव्ये किं क्रियेत।'

स करकर्पटेन अश्रूणि प्रमार्जयन्नवदत् - 'तथापि अहं त्वरितं कारयानं निस्सार्य चिकित्सालयं गतस्तामङ्क एव धृत्वा.. चिकित्सक आह- 'अधुना न किमपि कर्तुं शक्यते।' चिकित्सालयस्य समीपमेवासीत् श्मशानभूमिः, तत्रैव गोगर्तम् उत्खाय एनां मृताजिरशरणां कुर्म इति चिकित्सालयकर्मचारिण आहुः, परन्तु तेषां वचनं नाहमशृणवम्। अहं तां तथैवानीतवान् गृहम्। स्वगृहवाटिकायमेव मया निखातः स्वयमेव तस्याः कृते गोगर्तः। स्वयं च सा तत्र शायिता।...'

एतत् श्रुत्वा चकितोऽहमचिन्तयम्- अरे किमयं विक्षिप्तः सञ्जातो यत् सा स्वप्रिया अनेन स्वकीये उद्याने एव मृताजिरशरणीकृता। तथापि रघुवीरस्य व्यथान्वितामाकृतिं दर्शं दर्शं शनैरवमनोचम् - रघुवीर, किमेतत्, त्वया कृतम्, तां श्मशानं नीत्वा दाहसंस्कारः कथं न कृतः, एतत् सर्वं तु युष्माकं धर्मस्य विरुद्धमेव.. यत् त्वया कृतम्..'रघुवीर आह - अरे रहमानभ्रातः, किं वक्ति भवान्? कोऽत्र धर्माधर्मविचारः ... निम्याः को धर्मः, सा एतादृशतुच्छधर्माधर्म-विचारेभ्य उपरि तिष्ठति। सा महान् आत्मा।'वक्षसि मुखं संस्थाप्य स्थिता। अहं तां संवाहयामि। केवलं मन्दं मन्दं सीत्कृतिं सा करोति। एवमेव सीत्कृतयः शनैः शनैः शिथिलायिताः, उच्छ्वासा अपि न श्रूयन्ते स्म। तर्हि सुप्तेयं तपस्विनी अन्तत इति कलयित्वा अहं तां शयने स्वापयितुमुत्थापयामि तावत् किं पश्यामि ... अरे किमहं पश्यामि यत् सर्वं समाप्तम्, गतैव सा.. तस्याः शिरोऽधो ललम्बे। अहो लुण्ठितोऽस्मि, वञ्चितोऽस्मि... '

अहं समाश्वासनकलायां पटुर्नास्मि। स च रोदिति स्म। यथाकथञ्चिदहमवदम् -- 'धैर्यं धारयतु भवान्। अवश्यभवितव्ये किं क्रियेत।'

स करकर्पटेन अश्रूणि प्रमार्जयन्नवदत् - 'तथापि अहं त्वरितं कारयानं निस्सार्य चिकित्सालयं गतस्तामङ्क एव धृत्वा.. चिकित्सक आह- 'अधुना न किमपि कर्तुं शक्यते।' चिकित्सालयस्य समीपमेवासीत् श्मशानभूमिः, तत्रैव गोगर्तम् उत्खाय एनां मृताजिरशरणां कुर्म इति चिकित्सालयकर्मचारिण आहुः, परन्तु तेषां वचनं नाहमशृणवम्। अहं तां तथैवानीतवान् गृहम्।

स्वगृहवाटिकायमेव मया निखातः स्वयमेव तस्याः कृते गोगर्तः। स्वयं च सा तत्र शायिता।...'

एतत् श्रुत्वा चकितोऽहमचिन्तयम्- अरे किमयं विक्षिप्तः सञ्जातो यत् सा स्वप्रिया अनेन स्वकीये उद्याने एव मृताजिरशरणीकृता। तथापि रघुवीरस्य व्यथान्वितामाकृतिं दर्शं दर्शं शनैरवोचम् - रघुवीर, किमेतत्, त्वया कृतम्, तां श्मशानं नीत्वा दाहसंस्कारः कथं न कृतः, एतत् सर्वं तु युष्माकं धर्मस्य विरुद्धमेव.. यत् त्वया कृतम्..

'रघुवीर आह - अरे रहमानभ्रातः, किं वक्ति भवान्? कोऽत्र धर्माधर्मविचारः ... निम्याः को धर्मः, सा एतादृशतुच्छधर्माधर्मविचारेभ्य उपरि तिष्ठति। सा महान् आत्मा।'

-'सत्यम्, सत्यम्'.. अयं सर्वथा विक्षिप्तो जात इति विचारयन्नहमवदम्।

- 'उद्याने तस्या समाधिर्निर्मितः तत्र प्रतिदिवसं प्रातः पुष्पाञ्जलिं समर्पयामि... यत्र कुत्रापि सा स्यात् सुखेन भवतु .. अस्ति तस्या स्मृतिर्मम पार्श्वे.. इति कथयन्नसौ पाठपीठके स्थापितं चित्रसङ्ग्रहमादाय मह्यं ददान आह - पश्यतु भवान्, तस्याश्चित्राणि...

अहं चित्रसङ्ग्रहमुद्घाटितवान्। चित्राणि दर्शं दर्शमहमाकाशाद् भूमौ निपतितः ... 'तर्हि सा मानवी नासीत्..' इति च मम मुखान्निसृतम्।

- 'सत्यमुक्तं भवता। निम्मी मानवी नासीत्,, सा आसीत् कापि देवी।' - रघुवीर आह।

चित्रसङ्ग्रहे पामेरियन्-जातेः कस्याश्चित् शुन्याश्चित्राणि आसन्।

अहं रघुवीरस्य मुखमवालोकयम् - अत्यन्तं सूक्ष्मा स्मितरेखा कदाचित् तत्र आसीत् - विद्यार्थिजीवने यदा यदा स एवं बहु करुणापूर्ण यत्किमपि वक्ति स्म, तदा ईदृशी स्मितरेखा तु पश्चात् तस्य मुखे स्फुटं दृश्यते स्म।

—000—

Bhawan's Shri Shankaracharya Sanskrit ...
५४९

अष्टात्रिंशदधिकवर्षेभ्यः अध्यापनकर्मणि रतः प्रो. राधावल्लभः त्रिपाठी देशस्य वरिष्ठेषु प्राध्यापकेषु अन्यतमः अस्ति। नाट्यशास्त्रे साहित्यशास्त्रे च कृतभूरिपरिश्रमेण त्रिपाठिवर्येण बहूनि वर्षाणि यावत् सागरविश्वविद्यालये प्राध्यापनं कृतम्। शताधिकग्रन्थानां प्रणेत्रा तेन केन्द्रसाहित्य-अकादमीपुरस्कारः, के. के. बिरलान्यासस्य शङ्करपुरस्कारः इत्यादयः विंशत्यधिकाः प्रतिष्ठिताः पुरस्काराः प्राप्ताः सन्ति। पाण्डुलिपिग्रन्थानां प्रकाशनम्, राष्ट्रियसम्मेलनानाम् आयोजनम् इत्यादिषु नैकेषु उपक्रमेषु नितरां व्यापृतः प्रो. त्रिपाठी अधुना राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिपदम् अलङ्करोति। आधुनिकसंस्कृतसाहित्यनिर्मातृषु आदौ परिगणनाम् अर्हतः प्रो. त्रिपाठिवर्यस्य कथानां सङ्ग्रहः अस्ति 'स्मितरेखा'।

मूल्यम् - रू. ३५/-

ISBN - 978-81-87276-90-8